In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कान्त-काव्याञ्जलिः

(संस्कृतकाव्यसंकलनम्)

प्रणेता
रमाकान्त शुक्लः

देववाणी-परिषद्, दिल्ली

© Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Dr / Kant Kalyani
Dau / Kant Kalyani.
Kind Regd

TEERTHHARAN
DWIVEDI

E / 12 Nov 2017
RLS 2017
Kant Kalyani
Kanu Kalu
Kanpur

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कान्त-काव्याञ्जलिः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'देववाणी-परिषद्, दिल्ली' ग्रन्थाङ्कः - १३८

140

कान्त-काव्याञ्जलिः

(कविता-सङ्कलनम्)

प्रणेता

रमाकान्त शुक्लः

देववाणी-परिषद्, दिल्ली

आर ६, वाणी-विहारः,

नयी दिल्ली-११००५१ (भारतम्)

Padma Shri Ramakant Shukla Collection at Deva Vani Parisad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation, Delhi.

कान्त-काव्याञ्जलिः (संस्कृतकवितासङ्कलनम्)

लेखकः : डा० रमाकान्त शुक्लः

प्रकाशकः : देववाणी-परिषद्, दिल्ली
आर-६, वाणी विहारः,
नयी दिल्ली-११००५९ (भारतम्)

मुद्रकः : मयूर एण्टरप्राइज़ेज़,
डब्ल्यू ज़ेड-३, तिहाड़ गाँव,
नई दिल्ली-११००१८

संस्करणम् : प्रथमम्, २०१७ई०

मूल्यम् : षट्शतम् रूप्यकाणि (रु० ६००.००)

© लेखकः

ISBN - 978-81-85924-34-2

KĀNTA-KĀVYĀÑJALIḤ (Sanskrit Poetry)

Author : Shukla, Dr. Rama Kant

Publisher : Devavani Parishad, Delhi
R-6, Vani Vihar, New Delhi-110059
(India). Phone : 011-28561846

Printer : Mayur Enterprises,
WZ-3, Tihar Village,
New Delhi-110018

Edition : First 2017

Price : Six Hundred only Rs. 600.00

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अनुक्रमः

क्रमः	शीर्षकम्	पृष्ठांकः
	अनुक्रम	क (i)
	भूमिका	छ (vii)
१.	वाणीं वयं वन्दामहे	१
२.	सुरभारती विजयते	२
३.	वेदवाणीं नुमः	३
४.	दूरदर्शने प्रस्तुतं भाति मे भारतम्	५
५.	भजे भारतम्	१५
६.	मम भारतं विजयते	२१
७.	भारतभूमिर्विलसति	२३
८.	जय भारतमेदिनि!	२७
९.	भारताख्यः स्वदेशः	२८
१०.	दिव्यं मम भारतम्	३१
११.	उज्जयिनीयं जयति	३४
१२.	राजस्थानम्	३८
१३.	अहं स्वतन्त्रता भणामि	४३
१४.	रौति ते भारतम्	४७
१५.	राष्ट्रदेवते!	५१
१६.	भारतजनताऽहम्	५२

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्रमः शीर्षकम्	पृष्ठांकः
१७. एकं सद्बहुधा विलोक्यते भारतम्	६१
१८. उत्तरमङ्गलम्	६३
१९. वदत नेतारो मनाक्	७०
२०. किं जीवनं ते।	७५
२१. वन्दनीयास्ते	७९
२२. मदीयकविते! कुरुष्व गानम्	८४
२३. वन्द्यतां कापि सा शासनासन्दिका	८८
२४. लोकतन्त्रेऽस्मिन्	
२५. भारतस्य विजयोऽयम्	९७
२६. प्रणम्याः कारगिलवीराः	१००
२७. योऽयं कृतः शपथस्त्वया	१०३
२८. भावसन्धिः	१०७
२९. योऽयमातङ्कवादः	१०८
३०. महाकुम्भे	१०९
३१. भारतस्य जनता समीक्षते	१११
३२. किं कुर्यात् (१)	११६
३३. किं कुर्यात् (२)	११८
३४. यानावरोधो दुस्त्यज; शकटावरोधो	११९
३५. निर्वाचने प्राप्ते (१)	१२०
३६. निर्वाचने प्राप्ते (२)	१२५

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्रमः	शीर्षकम्	पृष्ठांकः
३७.	अभिनवहितोपदेशः	१२२
३८.	पुनर्नो भारते भूयात्	१२९
३९.	दीपमाला	१३१
४०.	राजतां कालिदासः	१३५
४१.	आशा महिमा	१३६
४२.	मम जननी	१६२
४३.	गुर्जरीयां धरां तां नमामो वयम्	१६४
४४.	कवित्वं मे तिरोभूतम्	१७०
४५.	पुस्तकम्	१७३
४६.	शीतलहरी	१७५
४७.	निदाघ-दिवसा इमे	१७७
४८.	ब्रूते मुम्बानगरी	१८४
४९.	वार्धक! नमो नमस्ते	१८९
५०.	प्रांगणबिल्ववृक्षः	१९६
५१.	समस्यापूर्त्तयः	१९८
५२.	किमु प्राचीनशास्त्रीयैव भाषासि	२०१
५३.	मनुजो न किं किं जायते	२०४
५४.	मतदाताऽहम्	२०६
५५.	सुदिनकुदिनपञ्चदशी	२०८
५६.	अवधानराजधानी	२११

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्रमः शीर्षकम्	पृष्ठांकः
५७. आक्रमणं कुरु	२१३
५८. शोभनं कृतम्	२२१
५९. अन्धं तमःप्रविष्टा देशस्य राजधानी	२२४
६०. दशमगुरुवरं नमामि	२२६
६१. विमुद्रीकरण-प्रश्नोत्तरम्	२२७
६२. राजकवित्वाकांक्षा	२२८
६३. राष्ट्रभाषा संस्कृतम्	२३०
६४. जलप्लावनं जम्मुकाश्मीरराज्ये	२३८
६५. भारतमुक्तकानि	२४१
६६. हरियाणाधरणी	२४३
६७. स्फुटपद्यानि	२४४
६८. गोम्मटेश जिनं तं मुदा भावये	२४५
६९. जयतु भारतं लसतु भारतम्	२४७
७०. सामान्यजनोऽहं भारतस्य	२५०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भूमिका

कान्त-काव्याञ्जलिरित्यस्मिन् संकलने मम काश्चन पूर्वप्रकाशिताः काश्चन च ग्रन्थरूपे अप्रकाशिताः रचनाः प्रकाश्यन्ते। प्रायः सर्वा अपि रचना देशस्य विविधभागेषु विविधसंस्थाभिः आयोजितेषु संस्कृतकविसम्मेलनेषु अथवा बहुभाषा कविसम्मेलनेषु पठिताः। आसु स्वराष्ट्रमहिमा, स्वराष्ट्रचिन्ता, प्रकृतिचित्रणं, सुभाषितानि, व्यङ्ग्यपरकरचना, विडम्बनकाव्यम्, स्वातन्त्र्यरक्षणाभिलाषा चेत्यादयः विविध भावाः सरलशब्देषु विविधैश्छन्दोभिः वर्णिताः।

अनेका रचनाः वर्तमानदशके एव प्रायः प्रणीताः। जम्मुकाश्मीरराज्ये जलप्लावनदृश्यानि, दूरदर्शनपटलेषु साक्षात् दृश्यन्ते स्म। तदानीं जलप्लावनं जम्मुकाश्मीरराज्ये इति शीर्षकेण भुजङ्गप्रयातवृत्तेन वर्णनात्मकानि पद्यानि आविरभवन्। एवमेव समये समये भाति मे भारतम् इति विषयमवलम्ब्य पद्यानि व्यरच्यन्त। हरियाणाधरणी इत्येषा संस्कृतरचना हरियाणासंस्कृताकादम्या पञ्चकूलानगरे 19.3. 2016तमे दिनांके समायोजिते संस्कृतकविसम्मेलने मया पठिता आसीत्। श्रीगोम्मटेशमहिमानमवलम्ब्य मया कानिचन पद्यानि श्रवणवेलगोलास्थाने रचितानि। अद्यत्वे न्यूइण्डिया इत्यस्य जयघोषस्य प्रचारः महता संरम्भेण क्रियते। मया नव्यभारतमवलम्ब्य कानिचन पद्यानि रचितानि। भारतस्य सैनिकानां पार्श्ववर्तिदेशद्वारा शिरोकर्तनं श्रुत्वा समस्तेऽपि राष्ट्रे यः क्रोधाग्निः प्रज्ज्वलितः, तस्य प्रतिबिम्बं द्रष्टुं शक्नुवन्ति सहृदयाः आक्रमणं कुरु इत्येतच्छीर्षकायां रचनायाम्। सर्जिकलस्ट्राइकवृत्तानन्तरं शोभनं कृतम् इतीयं रचना आविरभूत्। विगतवर्षे दीपावल्यनन्तरं दिल्ली धूमाविष्टा अस्वस्थाजायत। तदा मया अन्धं तमःप्रविष्टा देशस्य राजधानी इति रचना प्रणीता। 'मतदाताहं' मतं देयञ्चे इत्युभयत्र मतदानस्य महत्त्वं रेखांकितं भवति। मनुष्यः कथं अवसरानुरोधात् कार्यानुरोधाद् भाग्यानुरोधाद्वा विविधानि रूपाणि धत्ते इति विषयमवलम्ब्य मनुजो न किं किं जायते इत्येषा रचना विरचय्य दिल्लीसंस्कृताकादमी-संस्कृतकविसम्मेलने श्राविता। अद्यत्वे शुभदिनानाम् आगमनस्य बहुभिः भविष्यवाणी क्रियते, बहुभिश्च आशा क्रियते, बहुभिश्च तत्र उदासीयते। कानि दिनानि कदा शुभदिनानि भवन्ति, कदा च अशुभदिनानि भवन्ति इति न केनापि सद्यो ज्ञातुं शक्यते। तान्येव दिनानि कदाचित् सुदिनानि कैश्चित् स्वीक्रियन्ते। अपरैश्च तान्येव दिनानि कुदिनत्वेन

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अंगीक्रियन्ते। एतस्यां स्थितौ सुदिनकुदिनपञ्चदशीत्यस्यां रचनायां चिन्तनं विहितम्। एवमेव कानिचन स्फुटपद्यानि अपि अस्मिन् संकलने संयोज्यन्ते, यानि कतिपयवर्षाणि पूर्वं रचितानि आसन्। किमु प्राचीनशास्त्रीयैव भाषासि त्वमयि सुरवाक् इतीयं रचना उज्जयिन्यां कालिदाससमारोहे पठितासीत्, यत्र संस्कृतस्य प्राचीनत्वेन साकम् आधुनिकत्वमपि प्रतिपाद्यते।

कान्तकाव्याञ्जलिरिति शीर्षकस्य अभिप्रायद्वयं भवति। कान्तानां काव्यानाम् अञ्जलिः अथवा कान्तस्य (रमाकान्तस्य) काव्यानाम् अञ्जलिः। अत्र कान्तत्वमस्ति न वेति निर्णेतुं सहृदयाः पाठका एव प्रमाणम्। सामान्यजनस्तु आत्मीयं कवित्वं कान्तमेव मन्यते। अस्मिन्नञ्जलौ पुष्पाणां कण्टकानां च समुपस्थितिः समवलोकयितुं शक्यते सहृदयैः पाठकैः।

अस्य पुस्तकस्य अक्षरयोजना आचार्यजीवनशर्मणा अतिमनोयोगेन विहिता। तेभ्यः मामकीना साधुवादाः निवेद्यन्ते। कृतेऽपि प्रयत्ने यद्यत्र काश्चन त्रुटयो दृष्टिपथम् आगच्छेयुः तर्हि कुपालुभिर्विद्वद्भिः तासां समाधिर्विधेयः।

देववाणीपरिषदा अयं कान्तकाव्याञ्जलिः १३८तमग्रन्थरूपेण प्रकाश्यते इति तां प्रत्यस्मि प्रणतः कृतज्ञश्च। तन्महासचिवेभ्यो डॉ.ऋषिराजपाठवर्येभ्यो धन्यवादान् समर्पयामि।

विदुषामाश्रवः

'रमालयः', आर-६ वाणी विहारः,
नई दिल्ली - ११००५९
दिनांक : २४.१२.२०१७

(रमाकान्तशुक्लः)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वाणीं वयं वन्दामहे!

कुन्देन्दुहिमधवलां धवलवस्त्रावृतां हंसस्थितां
वरकच्छपीझङ्कृतिपरां ब्रह्मेशनारायणनुताम्।
मालाधरां पुस्तकधरां निःशेषजाड्यविलोपिनीम्
अक्षय्यविद्याविभवदां वाणीं वयं वन्दामहे॥१॥

यस्याः स्मरणमात्रेण पुम्भिर्लभ्यते ज्ञानप्रभा
यस्याः कृपालवलेशतः सुलभा शुभा वाचो विभा।
शब्दार्थगुणवृत्तिप्रदां रीतिप्रदां रसदायिनीम्
ध्वन्यौचितीवक्रोक्तिदां वाणीं वयं वन्दामहे॥२॥

प्रतिभाप्रदां व्युत्पत्तिदामभ्यासदां रचनात्मिकाम्
गद्यात्मिकां पद्यात्मिकां स्वरताललयतानात्मिकाम्।
श्रव्यात्मिकां दृश्यात्मिकां कविसहृयाख्याधारिणीम्
वागात्मिकां नादात्मिकां वाणीं वयं वन्दामहे॥३॥

निगमागमाकृतिधारिणीं सच्छास्त्रचिन्तनरूपिणीम्
विज्ञान-दर्शन-साहिती-भाषा-विभाषा-रूपिणीम् ।
शिक्षा-निरुक्त-व्याकरण-कल्पात्मिकां लिपिरूपिणीं
छन्दोमयीं ज्योतिर्मयीं वाणीं वयं वन्दामहे॥४॥

विश्वं समस्तं मूकवज्जायेत यत्कृपया विना
भुवनं भवेदन्धं तथा यस्या दयालोकं विना।
दूरेऽन्तिके वा तिष्ठतां तां योजयित्रीं प्राणिनां
लोकावलम्बनरूपिणीं वाणीं वयं वन्दामहे॥५॥

यास्ते परा पश्यन्तिका या मध्यमा या वैखरी
सृष्टिस्थितिप्रलयेश्वरी सुयशस्करी मङ्गलकरी।
तमसो जनान् ज्योतिर्नयति या, तां विधातुर्गेहिनीं
शुक्लां सुमतिदां मातरं वाणीं वयं वन्दामहे॥६॥

(रचना तिथिः १४-९-१९९४)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुरभारती विजयते

निगामागमैरुपेता विज्ञानरत्नम्या।
वेदाङ्गपूतकाया सुरभारती विजयते॥१॥

जयदेवशुभ्रगीतिः कविकालिदासकीर्तिः।
सौमिल्लभासहासा सुरभारती विजयते॥२॥

तत्त्वं विचारयन्ती ज्ञानं प्रचारयन्ती।
चित्तं विकाशयन्ती सुरभारती विजयते॥३॥

लोकं प्रबोधयन्ती शोकं विदारयन्ती।
चिन्तां विनाशयन्ती सुरभारती विजयते॥४॥

'विद्या ददाति विनयं' 'सत्यं सदा विजयते'।
इत्यादि कीर्तयन्ती सुरभारती विजयते॥५॥

अज्ञैर्मृतेति गदिता ह्यमरत्वभावभरिता।
नित्यं प्रवर्धमाना सुरभारती विजयते॥६॥

गीतासुघोषदात्री लालित्यभावधात्री।
नित्यं च सर्वशुक्ला सुरभारती विजयते॥७॥

(रचना तिथिः २४-१२-१९७५)

•

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वेदवाणीं नुमः

पश्य देवस्य काव्यं यदास्तेऽमृतं
यज्जराबाधितं नो भवेज्जातुचित्।
अस्य सञ्ज्ञास्ति वेदः, सदा पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥१॥

नैव पश्येदभद्रं नरश्चक्षुषा
नैव चाकर्णयेद्वाप्यभद्रं क्वचित्।
भावनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥२॥

अन्तरिक्षद्युवारिक्षमासु ध्रुवं
शान्तिसाम्राज्यमास्तां सदा राजितम्।
कामनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥३॥

स्याम ऐक्यस्थिताः, संवदध्वं समे
मानसं शैवसङ्कल्पपूतं भवेत्।
प्रेरणेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥४॥

अस्ति माता मदीया धरेयं तथै-
वास्म्यहं तत्सुतस्तसपर्यापरः।
घोषणेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥५॥

राष्ट्रमास्तां सुपुष्टं समृद्धं सदा
त्यागभोगौ सखायौ भवेतां तथा।
देशनेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वारिवाहः सुकाले समागच्छतात्
सन्तु गावश्च पुष्टाः समस्तास्तथा।
मार्गणेयं यदीयास्ति तां पावनीं
वेदवाणीं नुमो वेदवाणीं नुमः॥७॥

'मा जलानां तरूणां च हिंसां कुरु'
'द्यूतखेलां परित्यज्य कर्षं कुरु।'
मानवं या दिशन्ती, श्रुतिं तां मुदा
वेदवाणीं नुमो वेदवाणीं नुमः॥८॥

कर्म कुर्वञ्छताब्दं नरो जीवतात्
स्वस्ति पन्था भवेत्प्राणिनां सर्वदा।
ईदृशीं स्वस्थदृष्टिं दिशन्तीं नृणां
वेदवाणीं नुमो वेदवाणीं नुमः॥९॥

'नैकधर्मास्तथानेकवाचो नरा
मातरं भूमिमेनां सदा रक्षत।'
राष्ट्रियां वैश्विकीमेकतां तन्वतीं
वेदवाणीं नुमो वेदवाणीं नुमः॥१०॥

(रचनातिथिः २८-२-१९९५)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दूरदर्शने प्रस्तुतं भाति मे भारतम्

(प्रणेता, निर्देष्टा-डा० रमाकान्त शुक्लः)

भाति मे भारतम्, भाति मे भारतम् ।
भूतले भाति मेऽनारतं भारतम् ।।ध्रुवपदम्।।

प्रथमो भागः

विश्वबन्धुत्वमुद्घोषयत्पावनं विश्ववन्द्यैश्चरित्रैर्जगत्पावयत् ।
विश्वमेकं कुटुम्बं समालोकयद् भूतले भाति मेऽनारतं भारतम् ।।
'क्रुद्धहिंसाबले क्वास्त्यहिंसाजयः? कुत्र मुच्येत बद्धश्च मामन्तरा ?'
प्रश्नमित्थं जगत्सम्मुखे स्थापयद् भूतले भाति मेऽनारतं भारतम् ।।
वेशभूषाशनोपासना-पद्धति-क्रीडनामोद-संस्कार-वृत्त्यादिषु ।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा भूतले भाति तन्मामकं भारतम् ।।
दुःखपूर्णं जगत्सौख्यपूर्णं भवेद् यस्य रम्योपदेशैः सुधापूरितैः ।
जङ्गले मङ्गलं यच्च कर्तुं क्षमं भूतले भाति तन्मामकं भारतम् ।।
यत्र पुण्याय मान्यं परेषां हितं यत्र पापाय पीडा परेषां मता ।।
यत्र सत्यं जयं याति नैवानृतं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

द्वितीयो भागः

जाह्नवी-चन्द्रभागा-जलैः पावितं भानुजा-नर्मदा-वीचिभिर्लालितम् ।
तुङ्गभद्रा-विपाशादिभिर्भावितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
विन्ध्य-सह्याद्रि-नीलाद्रिमालान्वितं शुभ्रहैमाद्रि-हासप्रभापूरितम् ।
अर्बुदारावलीश्रेणि-सम्पूजितम् भूतले भाति मेऽनारतं भारतम् ।।
यत्र मन्दाकिनी पापसंहारिणी यत्र गोदावरी चारुसञ्चारिणी ।
देववाणी च यत्रास्ति मोदाकुला भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्प्रकृत्याः सुलीलास्थलं राजते पक्षिणां यद्विहारस्थलं विद्यते ।
यच्च षण्णामृतूणां विलासैर्युतं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

तृतीयो भागः

गोस्तनी-सेवपूर्णं मधुप्लावितं देवदारूद्वहं नौगृहैः रञ्जितम् ।
सुन्दरं यस्य काश्मीरकं राजते भूतले भाति तन्मामकं भारतम् ।।
क्षारमम्भोधिमापीय यस्मिन् स्थितैर्नारिकेलैः सुधोद्गारिभिः श्यामलः ।
शङ्कराचार्यदः केरलो राजते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
गण्डकी-शोण-गङ्गा-युता पाटली लिच्छिवी-सेविता चापि वैशालिका ।
भूषयामासतुर्यस्य पूर्वाञ्चलं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
श्रीदयानन्द-गान्ध्युज्ज्वलं गुर्जरं स्वर्णबङ्गं विवेकारविन्दोज्ज्वलम् ।
नानकाद्युज्ज्वलं पञ्चतोयं दधद् भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

चतुर्थो भागः

रामकृष्णावतारस्थले विश्रुते नेहरू-मालवीयादि-रत्नोज्ज्वले ।
उत्तरे यस्य देशेऽस्ति तीर्थाधिपो भूतले भाति तन्मामकं भारतम् ।।
गोखले-बालगंगाधराराधितं श्रीशिवाजी-तुकाराम-सम्बोधितम् ।
यन्महाराष्ट्रकं सह्यशृङ्गोच्छ्रितं भूतले भाति तन्मामकं भारतम् ।।
आलवारस्वरैर्मोहितं तामिलं मध्यदेशं तथा चम्बलाद्युज्ज्वलम् ।
यच्च सोल्लासमासाममङ्के दधद् भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
गोम्मटेशानुभावप्रभापूरितम् यस्य कर्णाटकं चन्दनामोदितम् ।
यस्य राजस्थलं वीरागाथांकितं भूतले भाति तन्मामकं भारतम् ।।
आन्ध्रनागारुणादिप्रदेशेषु यत् स्वीयभूतिं तनोति प्रभूतां सदा ।
यस्य सर्वस्थलेष्वस्ति प्रत्यग्रता भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

पञ्चमो भागः

भाखडाबन्ध-दामोदरीयोजना - बाणगङ्गा-फरक्कादिसिक्तोर्जितम् ।
ब्रह्मपुत्रादिसन्दर्शिताम्बुच्छटं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
विद्युदुत्पादने तैलसंशोधने, इन्धनान्वेषणे लौहनिष्पादने ।
यन्त्रनिर्माणकार्ये समर्थं च सद् भूतले भाति मेऽनारतं भारतम् ।।
यद्बरौनी-भिलाई-बुकारो-स्वनैः स्वोन्नतिस्यन्दनोत्थं शुभं घर्घरम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

Copyright Owner: Digitized by Ganga and Sarayu Trust Foundation Delhi

दिक्षु विस्तारयद् वीक्ष्यते सर्वदा भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
आर्यभट्टं वियन्मण्डले स्थापयत् पोखरण्-भूमिगर्भेऽणुशक्तिं किरत् ।
शान्तिकार्येष्वणुं प्रेरयत्सन्ततं भूतले भाति मेऽनारतं भारतम् ।।
यद्दरिद्रव्यथां हर्तुमाकाङ्क्षति यच्च वैज्ञानिकीमुन्नतिं वाञ्छति ।
यन्निजाध्यात्मरत्नप्रभालोकितं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

षष्ठो भागः

एशियाडं सुभव्यं समायोजयद् अन्तरिक्षे नरान् निर्भयान् प्रेषयत् ।
निर्गुटं राष्ट्रसम्मेलनं योजयत् भूतले भाति मेऽनारतं भारतम् ।।
रोगजालं चिकित्सालयस्थापनैरोषधोत्पादनैः शल्यशोधैस्तथा ।
नूतनाभिश्चिकित्साभिरुन्मूलयद् भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
अग्निमूर्जस्वलं स्वत्वरक्षाकृते साधनैरात्मनीनैः सुसंसाधयत् ।
युद्धापोतांश्च सिन्धूरसि स्थापयद् भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
रेल-नौका-विमानैस्तथा गन्त्रिभिर्यानकैस्तैश्च तैश्च प्रवेगान्वितैः ।
य''च्चरैवे'' ति नित्यं समुद्घोषयद् भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

सप्तमो भागः

मेघमालाकुलं विद्युदुद्द्योतकं काशहासान्वितं सर्षपश्रीयुतम् ।
पक्वगोधूमसस्यैश्च सम्पूरितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
कोकिलैः कूजितं षट्पदैर्गुञ्जितं केकिभिर्नृत्यपारङ्गतैर्नादितम् ।
सारिका-कीर-वादप्रवादैर्युतं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
हंस-कारण्डवैस्सारसैर्वर्तकैः कौञ्चकाकैः पिकैः खञ्जरीटैः शुकैः।
तित्तिरैष्टिट्टिभैः श्येनगृध्रैश्चितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
श्यामलानोकहश्रीसमृद्धान्तरं पद्मनेत्रैस्सरोभिस्समालोकितम् ।
निर्झरैः श्वेतफैनैस्समृद्धाञ्चलं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

अष्टमो भागः

द्वारकां सेतुबन्धं पुरीं बदरिकां तिरुपतिं मधुपुरीं चाजमेरं दधत् ।
पुष्करामृतसरस्तीर्थराजैर्युतं भूतले भाति मेऽनारतं भारतम् ।।
हस्तिगुम्फामजन्तामलौरां दधत् खर्जुराहो-गया-सारनाथैर्लसत् ।
ताज-कोणार्क-विष्णुध्वजैर्मण्डितं भूतले भाति मेऽनारतं भारतम् ।।
होलिका-दशहरा-पर्वकोजागरी-पोङ्गल-श्रावणी-दीपमालामयम् ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.
लोहडीदौणमाद्युत्सवैः पूरितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
ओडिसीं मणिपुरीं कथक-गर्बादिकं कूचिपूडिं च गिद्दां छऊं भङ्गडाम् ।
कथकलीं डाण्डियां भरतनाट्यं दधद् भूतले भाति मेऽनारतं भारतम् ।।
मन्दिरैर्मस्जिदैश्चैत्य-गिर्जागृहै-रार्यगेहैर्गुरुद्वारकैर्भ्राजितम् ।
कर्मभूः शर्मभूर्धर्मभूर्मर्मभूः भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

नवमो भागः

वेदभाभासितं सत्कलालासितं रम्यसङ्गीत-साहित्य-सौहित्य-भूः ।
भारती-वल्लकी-झङ्कृतैझङ्कृतं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
संस्कृतं प्राकृतं तामिलं तेलुगुं कन्नडं कैरलीं बाङ्गलामाङ्गलाम् ।
वाचमन्यां च तां तां ब्रुवद् वर्धते राष्ट्रभाषायुतं मामकं भारतम् ।।
यत्र पुण्याः सरित्सङ्गमा राजिता यत्र पाषाणतश्चामृतं स्यन्दते ।
भावना यत्र बोधेन सङ्गच्छते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
आर्षवृन्देषु शान्तिप्रधानेषु वै यत्र गूढं हि तेजः प्रदाहात्मकम् ।
साध्यते यत्र योगो मुदा साधकैर्भूतले भाति तन्मामकं भारतम् ।।
यस्य वात्सल्यभावेन पूर्णं शुभं दिव्यमुत्सङ्गमाश्रित्य वैदेशिकैः ।
शान्तिराध्यात्मिकी निर्भयैः पीयते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

दशमो भागः

भूधराकाशतोयेषु रक्षापरो यत्र शत्रून् भटो हेलया नाशयेत् ।
यत्र वीराङ्गना युद्धभूमिं गता भूतले भाति तन्मामकं भारतम् ।।
यत्प्रजातन्त्ररक्षापरैर्मानवैर्नास्ति हीनं कदापि प्रभाभासुरम् ।
आत्मतेजोमयं तद्धयहिंसामयं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
साधकैस्सद्भिरध्यात्मचिन्तापरैर्देशभक्तैर्विपश्चिद्भिरापूरितम् ।
कर्षकैः कार्मिकैः स्विन्नगात्रैर्युतं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
प्रेरणादायकं सत्कथागायकं ज्ञानविज्ञानतेजोबलाधायकम् ।
दुःखदारिद्र्य-दग्धान् सदा पालयन्मोदते मे सदा पावनं भारतम् ।।ध्रुव०।।
यत्र नास्त्यङ्कुशो वाचि कस्यापि वै यत्र नास्त्यङ्कुशो मानसे कस्यचित् ।
यत्र नास्त्यङ्कुशः कर्मणि क्वापि वै भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation, Delhi.
जीवदास्ते न जानामि कस्माद्युगात् साम्प्रत निधनत्वेऽपि सञ्जीवति ।
मृत्युहीनं जराहीनमाशान्वितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

एकादशो भागः

मानवामानितं दानवाबाधितं निर्जराराधितं सज्जनासाधितम् ।
पण्डितैः पूजितं पक्षिभिः कूजितं भूतले भाति मेऽनारतं भारतम् ।।
यस्य संदृश्य संदृश्य शोभा नवा यस्य संस्मृत्य संस्मृत्य गाथा शुभा ।
रोमहर्षो नृणां जायते वै सतां भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
यच्च विश्रामभूमिर्मतं प्राणिनां यस्य चित्ते प्रभूतोऽवकाशस्तथा ।
यत्र चागत्य गन्तुं न कोऽपीच्छुको भूतले भाति तन्मामकं भारतम् ।।
पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः शस्त्रिभिः शास्त्रिभिर्वर्णिभिर्गेहिभिः ।
वानप्रस्थैश्च सन्न्यासिभिर्मण्डितं भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।
यस्य चेतोहरा भान्ति लोके कला यस्य शिल्पान्यपूर्वाणि चैवासते ।
यत्पुराणैर्नवैर्वैभवैः पूरितं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

द्वादशो भागः

यत्त्रयीसाङ्ख्ययोगादिमार्गैर्युतं जीवनं मुक्तमाकर्तुमाकाङ्क्षति ।
शीलसन्तोषसत्यादिभी रक्षितं भूतले भाति तन्मामकं भारतम् ।।
दर्शनज्ञानचारित्र्यसम्मेलनं यत्र मोक्षस्य मार्गं भणन्त्यागमाः ।
ज्ञानमास्ते च भारः क्रियां वै विना भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
व्यासवाल्मीकिरत्नाकरैरुज्ज्वलं स्वादुकादम्बरीपानलुब्धं सदा ।
कालिदासेन भासेन संद्योतितं भूतले भाति मेऽनारतं भारतम् ।।
योगवासिष्ठगीतामहाभारतैर्ग्रन्थरत्नैश्च तैस्तैः प्रबुद्धं तथा ।
मानसं बीजकं सूरसिन्धुं दधद् भूतले भाति मेऽनारतं भारतम् ।।
यत्र माता पिताचार्य आराध्यते देवतेव प्रधीभिर्जनैस्सादरम् ।
यत्र दुःखी दरिद्रोऽस्ति नारायणो भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
यस्य विश्वे समस्तेऽपि विद्योतते पावनं नाम दिव्यं यशश्चोज्ज्वलम् ।
प्राणिसङ्घं च प्रीणाति यद्दर्शनं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्रयोदशो भागः

यत्स्वतन्त्रं विधातुं हुतं जीवनं देशभक्तैरसङ्ख्यैर्विलम्बं विना ।
यस्य सौख्यं समृद्धिश्च साध्ये सदा भूतले भाति तन्मामकं भारतम् ।।
यत्र झञ्झेव झांसीश्वरी कुर्वती क्रूरदुर्नीतिदुष्टैः सहायोधनम् ।
कर्तुमैच्छत्स्वदेशं स्वतन्त्रं द्रुतं भूतले भाति तन्मामकं भारतम् ।।
'जन्मसिद्धाधिकारः स्वराज्यं हि मे तं गृहीत्वैव तुष्टिं गमिष्याम्यहम् ।'
बालगङ्गाधरो यत्र घोषं ददौ भूतले भाति तन्मामकं भारतम् ।।
'दीयतां मे स्वरक्तं भवद्भिस्समैरात्मतन्त्र्यं भवद्भ्यो मया दास्यते ।'
घोषमित्थं सुभाषस्य संश्रावयत् भूतले भाति मेऽनारतं भारतम्।।ध्रुव०।।
स्वीयदाढ्र्येन कार्यैस्तथा नीतिभिर्लौहवीरः पटेलः सदा धीरधीः ।
एकतां रक्षितुं यस्य संस्मर्यते भूतले भाति तन्मामकं भारतम् ।।
'सैनिकाः कर्षकाश्चाप्नुयुर्वै जयम्' इत्थमुद्घोषयन् शास्त्रिवर्यः प्रधीः ।
यत्र चक्रे समुत्साहदीप्तान् जनान् भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
नायकाश्चापरे नूतनैर्नूतनैर्यैश्च घोषैर्जनान्दोलनं चक्रिरे ।
स्मारयत्तान् यथाकालमाशाप्रदान् भूतले भाति मेऽनारतं भारतम् ।।ध्रुव०।।

चतुर्दशो भागः

मातृभूमेर्विपज्जालमुच्छेदयन् मृत्युपाशं च कण्ठे सहर्षं धरन् ।
भक्तसिंहोऽस्ति यत्रामरत्वं गतो भूतले भाति तन्मामकं भारतम् ।।
'स्मो नु विक्रेतुकामा वयं स्वं शिरः, दर्शनीयं बलं किं नु हन्तुः करे' ।
इत्थमाभाषते बिस्मिलो यत्र तद् भूतले भाति मेऽनारतं भारतम्।।ध्रुव०।।
शेखरश्चन्द्रपूर्वोऽशफाकस्तथाऽन्येप्यनेके हुतात्मान उत्साहिनः ।
जीवनं स्वं यदर्थं बलिं चक्रिरे भूतले भाति तन्मामकं भारतम् ।।
घर्घरस्वानपूर्वं पुरः प्रस्थितान् शत्रुटैङ्कान् करीन्द्रानिव ध्वंसयन् ।
श्रीहमीदो बभौ केसरी यत्र तद् भूतले भाति मेऽनारतं भारतम् ।।
'डोगराई' स्थले राम आशायुतः शत्रुटैङ्कान् विभिन्दन् खलांस्तर्जयन् ।
मातृपूजापरो यत्र नाकं गतो भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
देशभक्तान् प्रति स्वादरं व्यञ्जयद् भीषणं युद्धदावानलं वारयत् ।
कालकूटं पिबच्चापि मोदं वहद् भूतले भाति मेऽनारतं भारतम्।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पञ्चदशो भागः

देहली राजधानी यदीया प्रिया नूतना नूतना प्रत्यहं स्पन्दते ।
स्वाङ्कमाप्तान् जनान् पालयन्ती सदा भूतले भाति तन्मामकं भारतम् ।।
जन्वरीमासषड्विंशके वासरे इण्डियागेट-पार्श्वस्थितो दर्शकः ।
यस्य शोभाप्रवाहे मुदा मज्जति, भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
यस्य दिल्लीस्थिते रक्तदुर्गे शुभे संसदश्चोत्तमाङ्गे त्रिरङ्गध्वजः ।
सार्वभौमीं स्वसत्तां वदत्युल्लसन् भूतले भाति तन्मामकं भारतम् ।।
वाजिराजिं गजालिं च न्यक्कुर्वता पण्डितेन्द्रेण यस्मिल्लवङ्गी वृता ।
सुस्तनी मस्तकन्यस्तकुम्भा प्रिया भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
यस्य दिल्लीस्थिते पण्डितैर्मण्डिते भव्यवाणीविहारे मुदा तन्यते ।
श्रीरमाकान्तशुक्लेन काव्यप्रभा भूतले भाति तन्मामकं भारतम् ।।
यस्य वैदेशिकैर्यात्रिभिः कीर्तिता चारुकीर्तिः ककुब्व्यापिनी प्रोज्ज्वला ।
यस्य धर्मो विदेशैस्समालिङ्गितो भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

षोडशो भागः

यच्च तीर्थैः पवित्रैर्व्रतैरुत्सवैः पर्वभिर्दर्शनीयैः स्थलैः शोभितम् ।
यच्च नानाजयन्तीगणै राजितं भूतले भाति तन्मामकं भारतम् ।।
प्राच्यपाश्चात्त्यशिक्षाप्रणालीयुतैर्बालबालायुवप्रौढविद्यालयैः ।
विश्वविद्यालयैः शोधगेहैर्युतं भूतले भाति मेऽनारतं भारतम् ।।
यद्रसालं रसालैस्तथान्यैः फलैः षड्रसैर्भोजनैर्लोकतृप्तिप्रदम् ।
यत्र पूज्या लताः पादपा देववद् भूतले भाति तन्मामकं भारतम् ।।
यत्र दृश्या वनानी (वनाली) मनोमोहिनी यत्र दृश्या हिमानी मनोमोहिनी।
वाटिकोद्यानसत्क्षेत्रशोभावहं भूतले भाति मेऽनारतं भारतम् ।।
सागरीयैस्तटैर्गोचरैः प्राञ्जलैः पक्षिणां वा पशूनां विहारस्थलैः ।
सौम्यरौद्रस्वरूपैः प्रकृत्याः युतं भूतले भाति मेऽनारतं भारतम् ।।
पर्वतीयान् प्रदेशान् जगन्मोहनान् यत्र पर्यट्य यात्रिव्रजो मोदते ।
पर्वतारोहिणां यच्छरण्यस्थलं भूतले भाति तन्मामकं भारतम्।।ध्रुव०।।
आहिमाद्रेस्तथैवा च कन्याकुमार्यन्तरीपाद्यदास्ते जनानां तपः ।
तेन विश्वस्य सौख्यं सदा साधयद् भूतले भाति मेऽनारतं भारतम्।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सप्तदशो भागः

अर्थकामान्वितं धर्ममोक्षान्वितं भक्तिभावान्वितं ज्ञानकर्मान्वितम् ।
नैकमार्गैः प्रभुं चैकमाराधयद् भूतले भाति मेऽनारतं भारतम् ।।
शम्प्रदं शङ्करं माधवं राघवं पार्वतीं राधिकां जानकीं च स्तुवत् ।
विट्ठलं बुद्धदेवं जिनं च स्मरद् भूतले भाति मेऽनारतं भारतम् ।।
विश्वनाथं महाकालमाराधयद् एकलिङ्गं भजद् वेङ्कटेशं स्मरत् ।
कालिकां पूजयद् वैष्णवीं च स्तुवद् भूतले भाति मेऽनारतं भारतम् ।।
कुंकुमैश्चन्दनैः पुष्करैः पाटलैः सर्वगं सच्चिदानन्दमाराधयत् ।
सर्वभूतेषु दृष्टिं समां धारयद् भूतले भाति मेऽनारतं भारतम् ।।
कृष्णलीलायुतं वेणुसन्नादितम् पावनं भावनं यत्र वृन्दावनम् ।
शम्भुशूलस्थिता यत्र वाराणसी भूतले भाति तन्मामकं भारतम् ।।
यन्मुनीनां तपस्यास्थली कथ्यते यत्परब्रह्मलीलास्थली विद्यते ।
यच्च नानाकथानां निधी राजते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
मामकीना गिरः शक्तिमत्योऽपि नो वर्णनं पूर्णतो यस्य कर्तुं क्षमाः ।
वर्णनातीतमेवानुभूयेत यद् भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

अष्टादशो भागः

लोकगीतेषु चित्तं यदीयं रतं लोकनृत्येषु चित्तं यदीयं रतम् ।
लोककृत्येषु चित्तं यदीयं रतं भूतले भाति तन्मामकं भारतम् ।।
कुम्भसिंहस्थवैशाखिमुक्तेश्वर-सोनपूरादिमेलापकै रञ्जितम् ।
रासलीलायुतं रामलीलायुतं भूतले भाति मेऽनारतं भारतम्।।ध्रुव०।।
यत्कुरुक्षेत्रमध्ये स्वयं श्रीहरिर्निष्क्रियं पार्थमाश्वासयद् गीतया ।
स्वीयरूपेण तं च व्यधात्कर्मठं भूतले भाति तन्मामकं भारतम् ।।
शुक्रतालास्पदे यत्र वैयासकिः पापहन्त्रीं कथामाह साप्ताहिकीम् ।
यत्र चाद्याप्यवृद्धो वटो राजते भूतले भाति तन्मामकं भारतम् ।।
यत्कवीनां गणैरस्ति संशोभितं यच्च वैज्ञानिकानां गणैः राजितम् ।
यस्य सङ्गीतकारा जगद्विश्रुता भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
यस्य शिष्यास्तथाध्यापका विश्रुताः यस्य विद्याप्रशाखाश्च विश्वश्रुताः ।
संस्कृतं संस्कृतिर्यस्य विश्वश्रुते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.
तिष्ठतोत्तिष्ठता गच्छता क्रीडता कुर्वतानेककर्माणि मे जीवने ।
गीयतां गीयतां सप्रमोदं मया 'भूतले भाति मेऽनारतं भारतम्' ।।ध्रुव०।।

एकोनविंशो भागः

कर्दमाक्रान्तवीथिषु सौधेषु वा यस्य पादातमार्गेषु गेहेषु वा ।
जीवनं लोकसेवापरं लक्ष्यते भूतले भाति तन्मामकं भारतम् ।।
वह्निभूकम्पझञ्झाजलप्लावनैर्भीषितं चापि यत्साहसं न त्यजेत् ।
ईतिभीतिप्रभावांस्तथा तर्जयेत् भूतले भाति तन्मामकं भारतम्।।ध्रुव०।।
वञ्चकैस्तस्करैर्भञ्जकैः स्वार्थिभिर्वञ्चितं लुञ्चितं खण्डितं दण्डितम् ।
किन्तु नैजैरमेयैर्बलैर्वर्द्धितं भूतले भाति मेऽनारतं भारतम् ।।
शासनासन्दिकाराधनैकव्रतं नेतृवृन्दं समालोक्य छद्मावृतम् ।
यत्र नित्यं हसन्ति प्रजानां गणाः भूतले भाति तन्मामकं भारतम् ।।
व्यावृतास्याः समस्याः समाधाय यत् स्वावलम्बं समालब्धुमाकाङ्क्षति ।
मार्गमुच्चावचं लङ्घयित्वा चलद् भूतले भाति तन्मामकं भारतम् ।।
यत्र हत्याबलात्कारसम्पीडिता दस्युतोत्कोचमाहार्घ्यसंशोषिताः ।
नो हताशा जना आयतिप्रेक्षका भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
आर्तरक्षार्थमस्त्राणि शस्त्राण्यथो यत्र मान्यानि हन्तुं न चानागसः ।
जागरूका यदीयाः सदा सैनिका भूतले भाति तन्मामकं भारतम् ।।
यत्र नग्नाः क्षुधार्ता अगेहा अपि स्वाभिमानं जहत्येव नो मानवाः ।
यत्र दृप्तं निरीहस्तृणं मन्यते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।

विंशो भागः

रक्तपातं विना शस्त्रपातं विना यत्र सङ्क्रान्तिरायाति मन्दस्मिता ।
येन विश्वं सदा शिक्ष्यते प्रेर्यते भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
शासकानां मदं हेलयैव प्रजा यत्र हन्ति प्रजातन्त्ररक्षापरा ।
त्यागिनो यत्र नैव म्रियन्ते क्वचिद् भूतले भाति तन्मामकं भारतम् ।।
निर्बलं निर्धनं कैश्चिदुक्तं सदप्यस्ति यत्स्वाभिमानेन पूर्णं सदा ।
शारदाश्रीसपर्यापरं पावनं भूतले भाति तन्मामकं भारतम् ।।ध्रुव०।।
यस्य तिष्ठन्ति गेया अनेके गुणा यस्य तिष्ठन्ति गेया अनेकाः क्रियाः ।
अस्ति यस्मिन्ननेकत्व एकस्थितिर्भूतले भाति तन्मामकं भारतम् ।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः किन्तु नाहं प्रपश्यामि तान् मन्दधीः ।
वन्दनीयं मया कीर्तनीयं मया मोदतां वर्धतां राजतां भारतम् ।।
शोषितो नात्र कश्चिद्भवेत्केनचिद् व्याधिना पीडितो नो भवेत्कश्चन ।
नात्र कोऽपि व्रजेद्दीनतां हीनतां मोदतां से सदा पावनं भारतम् ।।
एत बालाः किशोर्यो युवत्यस्समा एत बालाः किशोरा युवानस्तथा ।
प्रौढवृद्धाः ! समैः गीयतां गीयतां 'भूतले भाति मेऽनारतं भारतम्' ।।ध्रुव०।।

*(१-१० भागानां प्रथमं प्रसारणं २१-१-१९९० तः २१-४-१९९० यावत्
प्रातः ८-३६ वादनवेलायां जातम्। ११-२० भागानां प्रथमं प्रसारणं
दिल्लीदूरदर्शनकेन्द्रात् २३-१-१९९२ तः ३-२-१९९२ यावत्
रविवारवर्जं ३१-१-१९९२ तमतारिकावर्जं च प्रतिदिनं
प्रातःकालीनराष्ट्रियकार्यक्रमे ७-१५ वादनवेलायां
जातम्। पुनःप्रसारणमनेकधा जातम्)*

'भाति मे भारतं' काव्यं राष्ट्रप्रगतिहेतवे ।
श्रीरमाकान्तशुक्लस्य नवला जपमालिका ॥
दूरदर्शनसश्रीका सूरिसंसद्बहुश्रुता ।
सेयं कवयितुर्जीयात् कविताकल्पवल्लरी ॥
– त्रिपाठिनो भास्कराचार्यस्य

⌘⌘⌘

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भजे भारतम्!

(१)

सदाज्ञानविध्वंसकारी मनोज्ञः
समालोक्यते यत्र वाणी-विहारः।
विधत्ते स्वमित्रं च यः प्राणिमात्रं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२)

कुटुम्बं धरित्री दया यस्य मित्रं
मनुष्यत्वसेवा यदीयोऽस्ति धर्मः ।
असत्यं च शत्रुः समस्तेऽपि लोके
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(३)

प्रजातन्त्ररक्षा यदीयं हि लक्ष्यं
तितिक्षा यदीयास्ति संसारगीता ।
तथैवार्जवं यस्य वित्तं वरेण्यं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(४)

स्वकीयां बुभुक्षां पिपासां नियम्य
सदा रक्षिता येन भीताः प्रपन्नाः ।
यमाहुर्विदग्धास्तथा शान्तिदूतं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

न मम्लौ यदीयं मुखं निःस्वतायाम्
विमूढं न चित्तं च वित्तोपलाभे ।
सदा दानशीलश्च यो याचकेभ्यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(६)

स्फुरद्रत्नसङ्काशविद्वद्वरेण्यैः
समाराधितानेकशास्त्रैश्च शिष्यैः ।
गभीरैश्च चित्तैः सदालङ्कृतो यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(७)

क्वचिज्जाह्नवी तुङ्गवीचिः प्रसन्ना
क्वचिद्भानुजागोमतीव्यासशिप्राः ।
क्वचिन्नर्मदायौवनश्रीर्यदन्तो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(८)

क्वचिद्वीरपुञ्जः समुत्साहधीरः
क्वचिन्नेतृवर्गः प्रजोद्बोधरक्तः ।
क्वचिच्छीलवान् यत्र सङ्घो मुनीनां
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(९)

क्वचिद्विज्ञगोष्ठी क्वचिच्छास्त्रचर्चा
क्वचित्काव्यसन्ध्या क्वचिन्नाट्यवेला ।
क्वचिद्गीतिगानं च यस्य स्वभावो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

(१०)
In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कला कालिदासस्य बाणस्य वाणी
रवीन्द्रस्य गीतिर्विवेकस्य वाणी ।
लता-तानसेन-स्वरा यत्र मुग्धाः
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(११)

निवासः सतामाश्रयः सद्गुणानाम्
जरामृत्युहीनः प्रकृत्या विलासः ।
तथा सच्चिदानन्दसेवापरो यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(१२)

धनं विद्यतेऽध्यात्मसंज्ञं यदीयं
जगद्दुःखसङ्घातविध्वंसदक्षम् ।
कला यस्य चेतोहरा भान्ति लोके
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(१३)

कलाज्ञानविज्ञानवाणिज्यशोधै-
स्तथा कल्पनाभावनातर्कबोधैः ।
त्रिलोक्यां त्रिकाले प्रभाभासुरो यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(१४)

अतीतं भविष्यत्तथा वर्तमानं
जगत्प्रेरणादायकं वै यदीयम् ।
चतुर्वर्गसिद्धिं दिशन् यः प्रसिद्धो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१५)

पवित्रैर्व्रतैरुत्सवैस्तीर्थसंघै-
स्तथा दर्शनज्ञानचारित्र्यपुञ्जैः ।
नवाभिः कथाभिस्समृद्धश्च योऽस्ति
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(१६)

क्षिपन्नैपलं भास्करं चार्यभट्टं
हसन् भाखडाभा-नरौरा-मिषेण ।
भिलाई-बुकारोस्वनैर्यश्च गर्जन्
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(१७)

क्वचिच्चञ्चलायाः नवीनैर्विलासैः
क्वचिच्छारदायास्तथा शुक्लहासैः ।
सदा नूतनो मोदते राजते यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(१८)

क्वचिद्राजनीतेर्वितानैः प्रपूर्णः
क्वचिद्गृध्रगोमायुसंवादपूर्णः ।
क्वचिद्यश्च साहित्यसंगीतपूर्णः
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(१९)

क्वचिच्चाटुकारैः क्वचिन्मानवित्तैः
क्वचिन्मित्रघातैः क्वचिद्भीतचित्तैः ।
क्वचित्सिंहनादैश्च यश्चित्रवर्णो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२०)

नितान्तं विहीनः कदाचित्तु यः स्याद्
गृहस्फोटकैर्दस्युभिः षिड्गसंघैः ।
तथा वञ्चकैस्तस्करैर्भ्रष्टकृत्यैः
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२१)

बलात्कारहत्यापहारप्रहाराः
अशिक्षावधूदाहभिक्षाप्रचाराः ।
कदाचित्तु लुप्ताः भविष्यन्ति यस्मात्
(अवश्यं विलुप्ता भविष्यन्ति यस्मात्)।
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२२)

'मदीयः स्वदेशः', 'प्रियं भारतं मे'
'मदीया प्रिया मातृभूमिः पवित्रा' ।
इतीत्थं त्रिलिङ्ग्यां जनैर्गीयते यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२३)

न यत्राङ्कुशः कस्यचिद्वाचि शक्यो
न वा कार्यजाते, न वा चित्तवृत्तौ ।
विनीतोऽपि यः स्वाभिमानव्रतोऽस्ति
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२४)

मदीया परिच्छिन्नवाणी यदीयान्
अशेषान् विशेषान् यथार्थं प्रगातुम् ।
अशक्तास्त्यशक्तास्त्यशक्तास्ति नूनं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२५)

अहो यस्य लोकोत्तरैः स्तोत्रपुञ्जैः
रमाकान्तशुक्लोऽपि धन्योऽद्य जातः ।
विदग्धाशिषां राशिभिर्लाल्यते च
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२६)

न यत्रास्तु कश्चिद्बुभुक्षापरो ना
न वा वासहीनो न वासोविहीनः ।
न वा शोषितः क्वापि केनापि कोऽपि
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२७)

प्रणम्यः प्रणम्यो मया यः स्वदेशः
सदा कीर्तनीयः सदा वन्दनीयः ।
सदा वर्धतां मोदतां राजतां यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२८)

उपेक्ष्येत नो यत्र वैदुष्यपुञ्जो
न वै वर्धतां यत्र दारिद्र्यपुञ्जः ।
तथा दुर्बलाघात आस्तां न यत्र
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मम भारतं विजयते!

(१)

निगमागमैरुपेतं विज्ञानरत्नरम्यम् ।
वेदाङ्गपूतगात्रं मम भारतं विजयते ॥

(२)

लोकप्रबोधशीलं शोकप्रणाशशीलम् ।
चेतोविकाशकुशलं मम भारतं विजयते ॥

(३)

सह्याद्रिविन्ध्यहिमवत्सप्ताद्रिकीर्तितश्रि ।
गंगाजलैः पवित्रं मम भारतं विजयते ॥

(४)

क्वापि श्रमेण सहितं क्वापि प्रमोदभरितम् ।
नानाक्रियाकलापं मम भारतं विजयते ॥

(५)

गांधीरवीन्द्रगौतमनहरूप्रभृत्यनेकैः ।
जननायकैः समृद्धं मम भारतं विजयते ॥

(६)

कम्बन्कबीरतुलसीकविकालिदासगीतम् ।
विबुधैः सदैव चेष्टं मम भारतं विजयते ॥

(७)

कोणार्कताजसाँचीखजुराहसारनाथैः ।
कुतुबादिना च महितं मम भारतं विजयते ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(८)

श्रुतभाखडानरौराकोटाभिलाइकल्पैः ।
संयन्त्रकैः समिद्धं मम भारतं विजयते ॥

(९)

सिंहस्थकुम्भसारणनवचण्डिकादिभव्यैः ।
मेलापकैः प्रसन्नं मम भारतं विजयते ॥

(१०)

विश्वस्य बन्धुभूतं मोक्षस्य साधकं यत् ।
गायच्च पञ्चशीलं मम भारतं विजयते ॥

(११)

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु कामम् ।
नित्यं विकाशमानं मम भारतं विजयते ॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतभूमिर्विलसति!

(१)

वैदिक-सौगत-नास्तिक-
चार्वाकार्हत-प्रभृतिबहुधर्माः ।
वादे वादे बोधं,
यत्र लभन्ते मुदोत्फुल्लाः ॥

(२)

औदार्यं धार्मिक्यम्,
आध्यात्म्यं नित्यप्रगतिशीलत्वम् ।
अन्ये चापि यदीयाः,
विश्वस्मिन् सद्गुणाः ख्याताः ॥

(३)

प्रकृतिविलासो यस्यां,
विकिरति हासं स्वकीयमवदातम् ।
कष्टसहिष्णुत्वं च,
यस्याः प्रकृतौ सहजसिद्धम् ॥

(४)

विरोधिनां तत्त्वानां,
सत्त्वानाञ्चापि विषमवृत्तीनाम् ।
समन्वयं या कुरुते,
नवनवशोभाभिवृद्ध्यर्थम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

आशावादरतायाः ,
आदर्शोद्घोषसुनिपुणायाः ।
यस्या निखिलापीयं,
वसुधैव कुटुम्बकं भवति ॥

६)

लोकोत्तरचरितानां,
लोकाराधननियुक्तमनुजानाम् ।
या जन्मभूमिरुदिता,
रुदिता अपि यत्र हसिताः स्युः ॥

(७)

स्नेहं दयां च सौख्यं,
जायामपि यत्र लोकपूजार्थम् ।
मुञ्चन् रामोऽद्यापि,
भगवानिव पूज्यते लोकैः ॥

(८)

गीता गङ्गा गावो,
गीर्वाणगवी तथा च गीतानि ।
ग्रामाः गुरवो ग्रन्थाः,
यस्या गरयन्ति गरिमाणम् ॥

(९)

अक्रोधेन क्रोधं,
साधुतया चाप्यसाधुतासरणिम् ।
दानेन या कदर्यं,
जयेदहिंसाबलेन हिंसां च ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१०)

सत्पुत्राणां हि यथा,
कुपुत्रकाणां तथैव या चेष्टाः ।
समबुद्ध्या किल सहते,
यतो न माता कुमाता स्यात् ॥

(११)

वाणीविहारशीला,
शीलाब्धितरङ्गिता जलधिरशना ।
सुजला सुफला शस्य-
श्यामा सुखदा तथा वरदा ॥

(१२)

अगणितगुणगणपूर्णा,
चित्रविचित्रैर्जनैस्सदा लसिता ।
आर्या भारतभूमि-
र्विलसति जगतीतले सेयम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जय भारतमेदिनि विश्वनुते!

(१)

हिमवत्कलहासमरीचिसिते !
यमुनाजलनीलविभामहिते !
रविचुम्बितकोकनदारुणिते !
जय भारतमेदिनि विश्वनुते !

(२)

नवसर्षप-पीतदुकूलयुते
बहुशस्यसमूहविभाहरिते !
मलयानिलमोदकलाकलिते !
जय भारतमेदिनि विश्वनुते !

(३)

अतिपुण्यपुरातनपद्धतिभि-
र्नवनूतनयोगप्रयोगचयैः !
समयोचितनीतिबलैः सहिते !
जय भारतमेदिनि विश्वनुते !

(४)

त्रिविधैः खलु तापचयैर्विकले
मनुजे शुभनिर्वृतिमादधती ।
नवमङ्गलदानविधानकरे !
जय भारतमेदिनि विश्वनुते !

(५)

मुनिभिर्मनुजैर्दनुजैर्विबुधैः
कविभिर्नवचित्रकलैश्च तथा ।
निजजन्मसु जन्मसु काम्यतमे !
जय भारतमेदिनि विश्वनुते !

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(६)

जय वेदविभासितचित्तगुहे !
बहुदर्शनगोप्यरहस्ययुते !
अपवर्गसुभक्तिविधानकरे !
जय भारतमेदिनि विश्वनुते !

(७)

अभिमानधनैः रणशौण्डभटैः
कृषिकर्मपरैः श्रमिकैर्लसिते ।
शुचिशान्तिसुधाभरिते वरदे
जय भारतमेदिनि विश्वनुते !

(८)

जय नैकप्रदेशप्रभालसिते !
बहुवर्णजनौघविभालसिते !
बहुलोकसुरीतिरसैः सरसे
जय भारतमेदिनि विश्वनुते !

(९)

करुणाकलिते ! मुदिताभरिते !
सरसे ! सरले ! मृदुले ! ललिते !
सुदृढे ! दुरितौघविनाशकरे !
जय भारतमेदिनि ! विश्वनुते !

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारताख्यः स्वदेशः

(१)

सलिलनिधितरङ्गैर्धौतपादाम्बुजोऽसौ
हिमगिरिशुभहासैर्भासयन्नाननं स्वम्।
प्रकृतिकलविलासैर्मोदकारी जनानां
जयति जगति नित्यं भारताख्यः स्वदेशः ॥

(२)

शिखिकुलकलकेका काकली कोकिलानाम्
कलयति कलकाले कान्तकान्तारप्रान्तान् ।
प्रकृतिकलविलासान् यत्र पश्यन्ति नित्यं
विकचकमलनेत्रैर्हर्षफुल्लैस्सरांसि ॥

(३)

नवपरिमलगन्धैर्मन्दशीतैः समीरैः
प्रकृतिनववधूटीस्वाङ्गरागैः परागैः ।
धृतमधुकरपुञ्जैर्गुञ्जितैर्मञ्जुकुञ्जै-
र्विलसति मधुमत्तो यत्र राजा ऋतूनाम् ॥

(४)

भृगुकलकलनादैः किञ्चिदाभाषयन्त्यो
जलपतनजफेनैर्मोदमाना हसन्त्यः ।
मरकततृणवासैरावृता यत्र रम्या
विदधति गिरिमालाः स्वैः पयोधृद्भिराशाः ॥

(५)

भ्रमिकरजलवीचिभ्रूकटाक्षान् क्षिपन्त्य-
स्तटगतखगशब्दैः सिन्धुमाकारयन्त्यः ।
धृतबहुविधरत्नं यान्ति लावण्यपूर्णं
सरलतरलनद्यो यत्र नित्यं नदीशम् ॥

Padma Shri Rama Kant Sharma Collection, Lekhak Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(६)

वनविटपिकदम्बैः केलिलीलाकदम्बै-
मुरलिवटसनाथैर्भृङ्गकृष्णैः स्थलैश्च ।
चलरवितनयायाः श्यामिकाभिश्च यत्रा-
नुभवति खलु वृन्दाकाननं कृष्णमीशम् ॥

(७)

भवति मृदुलशोभा सर्षपाणां वसन्ते
शरदि कमलराशिः प्रस्फुटो जायते च ।
हरितवसनशोभां वर्द्धयन्ती पृथिव्या
विलसति तृणराजिर्यत्र वर्षर्तुकाले ॥

(८)

कनकगुणनिबद्धैः कुन्तलानां कलापैः
सम इह चलविद्युद्दामशोभः प्रसन्नः ।
करिवर इव कृष्णो नीरगण्डूषकारी
स्वनति मृदुगभीरं तोयवाहः सुकाले ।

(९)

क्व मिलति विषधृद्भिर्मित्रता चन्दनानाम् ?
क्व च मलयजगन्धो याति धीरः समीरः?
क्व च वितरति मोदं शुभ्रकाश्मीरशोभा ?
षड्ऋतुकलविलासो भारतादन्यतः क्व ?

(१०)

क्व च मुनिगणपूर्णा आश्रमा सम्भवन्ति
नवकिसलयरागा यत्र चित्तं हरन्ति ।
त्यजति ऋजुमुनीनां क्रोडमागत्य यत्र
नवमृगसुतवृन्दं नाभिनालानि, चित्रम् !

Padma Shri Rama Kant Shukla Collection at Deva Kant Pratishtan, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(११)

क्वचिदपि हरिणाली सञ्चरन्ती चकास्ति
क्वचिदपि च गजानां यत्र यूथं प्रसन्नम् ।
क्वचिदपि दृढनादो यत्र कण्ठीरवाणाम्
उपवन-वनभागा ईदृशाः कुत्र सन्ति?

(१२)

धवलजलपवित्रा पापनाशे प्रसक्ता,
क्वणितजलतरङ्गा कच्छपीधारिणी च ।
जलगणशुचिकर्त्री नीलकण्ठासना च
विलसति शुभगङ्गा शारदा च क्व शुभ्रा ?

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दिव्यं मम भारतम्

विविधपण्डितमण्डलमण्डिता
प्रकृतिपुण्यविलाससमाहिता ।
विविधवीरवरावृतमण्डला
जयति भारतभूमिरियं भुवि ॥१॥

यस्मिल्लोकगणः सुखेन वसति
प्राप्तोऽभयं सर्वदा ।
गौरश्यामविभेदहीनजनता
यत्रास्ति कार्याकुला ।
स्वातन्त्र्येण चमत्कृतं च परितो
यत्रास्ति भूमण्डलम् ।
दिव्यं तन्मम भारतं विजयते
संसार-सम्भूषणम् ॥२॥

येषां देशसुरक्षणाय नभसि
प्रज्वालिते चानले ।
झञ्झावातसमेतवृष्टिषु मनो
यातुं सदा प्रस्तुतम् ।
सन्त्येतादृशवीरभावभरिता
यस्यान्तराले भटाः ।
भव्यं तन्मम भारतं विजयते
संसार-सम्भूषणम् ॥३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्स्वातन्त्र्यदिनप्रमोदसमये
मोदाकुला मेदिनी ।
आशाः सौरभमण्डिता विजयते
मुग्धस्त्रिरङ्गो ध्वजः ।
यत्रानेकविधै प्रमोदकरणै-
रातिथ्यकृत्यैर्नवैः
मान्यन्तेऽतिथयः स मे विजयते
देशः सदा भारतम् ॥४॥

यन्त्रोद्योगकलानिकेतनयुतं
वैज्ञानिकैः पावितम् ।
कीर्तिश्रीयुतदेशभक्तचरितै-
श्चित्रं चमत्कारकम् ।
विद्यारक्षणदक्षपण्डितगणै-
र्नित्यं समाराधितम् ।
विस्तीर्णं वसुधातले विजयते
मे भारतं भारतम् ॥५॥

यद्भूमौ प्रवहन्ति देवसरिता
साकं नदीनां गणाः ।
यन्मूर्द्धा हिमशैलमण्डनयुतः
पादाः समुद्रादृताः ।
यद्भूमिर्नितरां सुवर्णसहिता
धान्यैः सदा दृश्यते ।
दिव्यं तन्मम भारतं विजयते
संसार - सम्भूषणम् ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यद्वृन्दाविपिने मुकुन्दचरिता-
न्यद्यापि साक्षादिव ।
यत्काशीश्वरविश्वनाथकृपया
पापान्धकारापहा ।
यत्तीर्थानि सदैव पापदहनं
कुर्वन्ति शान्तं जलैः ।
भव्यं तन्मम भारतं विजयते
संसार - सम्भूषणम् ॥७॥

यस्मिन्नस्ति सहिष्णुतापरिमिता
तोषः परं राजते ।
यत्रास्ते ऋजुता परं प्रमुदिता
यस्मिंश्च शान्तिः परा ।
वैपुल्यं भजते च यत्र विदुषां
पाण्डित्यपुञ्जः सदा ।
दिव्यं तन्मम भारतं विजयते
संसार - सम्भूषणम् ॥८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उज्जयिनीयं जयति

क्षणमपि दृष्टा यालोकयितुर्जातु जहाति न चित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥
उज्जयिनीयं जयति विशाला कविगणवन्द्या नित्यम्॥

(१)

उद्घाटयति निजं हृदयं ब्रूते निजकथा अतीताः
श्याममृत्तिका स्पृष्टा प्रेम्णा यस्या लोकातीता।
कालिदास-शूद्रक-विक्रम-वेताल-विलक्षणघटनाः
कविकुलवर्णितविविधदेशवस्तूच्चयरीतिविरचनाः॥
प्रत्यक्षं तनुते मानसमोदाय समेषां सततम्
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

(२)

उदयन-वासवदत्ता-सेना-चारुदत्त-कल-गाथाः
केकित्रासककबरीभाराः सुरभिलधूपसनाथाः।
लोलापाङ्गैर्लसितास्तन्व्यः श्यामा मध्ये क्षामाः
श्रोणीभाराद्विलसितगमनाः तन्त्रीवादनकामाः॥
पदे पदे साक्षात्क्रियन्ते यत्र सहृदयैर्नित्यम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

(३)

हारास्तारास्तरला गुटिका भाण्डसमूहा भव्याः
पुष्पस्तबकाः शेखरहारा माला नव्याः नव्याः।
शिप्रावाताः कविसङ्घाता महाकालशिवभक्ताः
शास्त्रकाव्यनाटकसङ्गीतानां गोष्ठीष्वनुरक्ताः॥
यत्राद्याप्यविरतं हरन्ति प्रेक्षावतां सुचित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

Padma Shri Rama Kant Sanskrit College, Jodhpur Devalyan Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४)

अत्रैवाभिरूपभूयिष्ठा विक्रमपरिषत् शुशुभे
या कविकालिदासकृतनाटकवीक्षणाय खलु लुलुभे।
अत्रैवापरितोषाद्विदुषां कविना यत्नोऽकारि
बाणो विजहारात्र निश्चितं सहृदयहृदयविहारी॥
अत्रागत्य जायते चित्तं शिवं सुन्दरं सत्यम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

(५)

शिप्रास्नानं यत्र धर्मिणः कलिमलदारणनिपुणम्
अर्थकामिनो विपणिविभागं नानापण्यसुपूर्णम्।
कामकामिनोऽभिमतं स्थानं नवलविलासोल्लसितम्
मोक्षार्थिनो महाकालेशं ज्योतिर्लिङ्गं प्रथितम्।
क्षीरसागरं[1] यान्ति च रसिका नद्यो यथा समुद्रम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

(६)

'चल चल भामिनि चल सिंहस्थं द्वादशवर्षैर्लब्धम्'
'चल गजगामिनि कार्तिकमेलाक्षेत्रं कौतुकलुब्धम्।'
'चल मूढे क्रीणामि सुमाल्यं मालीपुरे त्वदर्थम्'
'अहो श्रूयते कार्तिकमासे शृणु शृणु कोकिलविरुतम्'॥
यत्रेत्थं चाटूयति रमणो दयितानिर्दयचित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

(७)

प्रतिवर्षं खलु यस्याः शिप्रातीरे विचलितधीरे
'माच' - दर्शनोत्सुकैर्मालवैः मेलाशीतसमीरे।
अविदितगतयामा रजनी नीयतेतरां निश्चिन्तम्
झञ्झावाते घनघनवर्षे वापि शीतले नीरे॥
अहो मधुरिमा, अहो प्रमोदो यस्या अतुलो नित्यम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

Padma Shri Rama Kant Shukla Collection at Devavani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(८)

रविकरचुम्बितकमलविकासैः मदकलसारसनादैः
मालविकानां सुमधुरहासैः विबुधशिरोमणिवादैः।
देवोत्थानवह्निखेलाभिर्नवनवदीपविलासैः
भैरवगढमुद्रितवस्त्राणां चेतोहरैः सुहासैः॥
बालवृद्धयूनां परिहासैर्या जयति जगच्चितम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

(९)

चमरपुच्छिका[1]खण्डितकन्दुक[2]कुसुमनोहरवर्षैः
कविकविताप्रस्तुतिवेलायां सहृदयसुहृदां हर्षैः।
अतिथीनां विदुषां सचेतसां सुमनोरथचङ्क्रमणैः
व्याससमासरीतिवक्तव्यैः भावानां सङ्क्रमणैः।
कीर्तिमन्दिरं भाति हि यस्याः कालिदासमहममहितम्
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

(१०)

पक्षप्रहारैश्चञ्चुश्लेषैः गुटरगुटरगूँकारैः
मानैरनुधावनैरथो मदनाज्ञापालनचारैः।
द्वाभ्यां तथा तृतीयस्योत्सारणैर्यत्र सव्यूहः
अश्मभ्योऽपि हि प्रेमकलामुपदिशति कपोतसमूहः॥
विक्रमकीर्तिमन्दिरं तद्यस्या अक्षय्यं वित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥10॥

(११)

हरसिद्धिं योगेश्वरसदनं मङ्गलनाथं रम्यं
भर्तृहरेर्गह्वरं, चाश्रमं सान्दीपनेः पवित्रम्।
ज्येष्ठगणेशं, पञ्चमुखं हनुमन्तं भवभयहरणम्
दर्शनीयमथ नानातत्त्वं यस्यां विस्मयकरणम्॥
वीक्ष्य भवति नहि कस्य मनो वद श्रद्धा-विस्मयभरितम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१२)

यत्रागत्य निवर्तितुमिच्छति नैवागन्तुकलोकः
श्रावं श्रावं यस्या गाथां तृप्तिं याति न लोकः।
स्मारं स्मारं यस्या विभवं भवति विस्मितो लोकः
पायं पायं यस्या शोभां माद्यति सर्वो लोकः।
यस्या विरहो जनयति मोहं, व्यथयति दृढमपि चित्तम्।
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

(१३)

विहरति विहसति विलसति नृत्यति या मानसे न केषाम्?
सुखयति मदयति रमयति रसयति या मानसं न केषाम्?
सरला सरसा मुग्धोदारा या राजते समेषाम्।
शुभदा सुखदा वरदादरदा या राजते समेषाम्।
सर्वशुक्लया वाग्देव्या खलु यत्र समोदं हसितम्॥
उज्जयिनीयं जयति विशाला बुधजनवन्द्या नित्यम्॥

(रचनातिथिः ३१-११-१९८२, उज्जयिन्याम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राजस्थानम्

यद्विदुषां वीराणां धनिनां श्रमिकाणां च निधानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(१)

शिलादेवि - गलताजी - बालाजी - श्रीनाथद्वारैः।
एकलिङ्ग - पुष्कर - कौलायत - करणी - रामद्वारैः॥
रामधाम - रणछोड़ - साँभरा - सर्वेश्वर - जयकारैः।
श्रीद्वारकाधीश - लोहार्गल - प्रभृतितीर्थपरिवारैः॥
त्रिविधतापतप्तेभ्यो नित्यं यद्ददाति शमदानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(२)

बप्पारावल - राणासाँगा - गोरा - बादल - वीरैः।
सिंहप्रताप - सदृशरणवीरैः सन्धापालनधीरैः॥
दुर्गावती - पद्मिनी - हाडीरानी - विश्रुतवृत्तैः।
अङ्गीकृतसुव्रतजौहरनारीणां दिव्यसुचरितैः॥
यद्विदधाति जगज्जनतायाश्चारित्र्यस्योत्थानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(३)

डिङ्गल - पिङ्गल - वयणसगाई - काष्ठपुत्तलीनृत्यैः।
रत्नपरीक्षा - प्रस्तरखण्डन - ढोला - मारू - वृत्तैः॥
अणुविस्फोटपरीक्षण - पुस्तकगृह-परमाणुविकासैः।
आर्हत - वैदिक - धर्मप्रचारैर्विविधकलानां हासैः॥
यद्ददाति तैस्तैश्च विशेषैर्निजवैभवप्रमाणम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४)

तप्ते यन्मरुदेशे मधुरा 'मत्तीराः' रसपूर्णाः।
यस्य 'राबड़ी' लोकप्रसिद्धा आस्वादैरापूर्णा॥
यन्मरुभाषाबद्धवाङ्मयं शोधकमोदविधायि।
दुग्धसारशष्कुलीसेवनं यस्य च तृप्तिविधायि॥
यन्मालिन्या बीकानेर्याः सिद्धं तुलाविधानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(५)

'अस्मि प्रेमप्रमत्ताहं मम पीडां वेद न कश्चित्'।
'गिरिधरपुरतो नर्तिष्यामि रोत्स्यति मां नहि कश्चित्'॥
'मम तु केवलं गिरिधरगोपो नान्यः कोऽपि जगत्याम्'।
इत्येवं वचसा मनसा कर्मणा रताया भक्त्याम्॥
अमृतं कृत्वा विषं पिबन्त्या यन्मीरायाः स्थानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(६)

घघरा - कञ्चुक, बिन्दुशाटिका - गोटावृतवसनानाम्।
कटक-बोरला-नूपुर- नथली-वलयाङ्गद-रशनानाम्॥
टड्डे - वाटे - बँगड़ी - कङ्कन-चूड़ा - हथफूलानाम्।
टीका-झुमका-हँसली-टिकली-कटिका-रमझोलानाम्॥
विच्छित्त्या भरितं यत्तनुते चारुत्वस्य वितानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(७)

कज्जलकलितललितनयनानां मँहदीरक्तकराणाम्।
धृतविविधाभूषणवसनानां लोकरीतिपरकाणाम्॥
दूर्वालङ्कृतकरकमलानामर्चनगीतपराणाम्।
बालानां सौभाग्यवतीनां धृतमस्तककलशानाम्॥
उपचारैर्विविधैर्विलसति यस्मिन् गणगौरविधानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(८)

मुरकी - कमरी - पगड़ी - धोती - धौड़ीपादत्राणैः।
लसिता यस्य जना शोभन्ते नित्यं श्मश्रूत्थानैः॥
अश्मखण्डने मूर्तिविरचने शोभनगृहनिर्माणे।
यस्य श्रमिका नित्यं निरता मार्गाणां च विधाने॥
प्रकृतिकोपदलिता अपि नित्यं विदधति देशोत्थानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(९)

गिरिधरशर्मचतुर्वेदोपमविद्वद्रत्नैर्लसितम्।
मञ्जुनाथमथुरानाथोपमकविवरवैभवलसितम्॥
बाँकीदास - सूर्यमल्लागरचन्दयशोभिर्लसितम्।
काँकर- झाबरमल्ल-सबा-रांगेय-गुलेरी-लसितम्॥
विद्याधरमहितं यद् धत्ते ज्ञानमथो विज्ञानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(१०)

हल्दीघाटी - चेतकशौर्यं स्मारं स्मारं यस्य।
अर्बुदलोकोत्तरसौन्दर्यं दर्शं दर्शं यस्य॥
अगणितवीराणां कलगाथाः श्रावं श्रावं यस्य।
अभिनवकुल्याजलसञ्चारं लोकं लोकं यस्य॥
अवसन्नस्यापि जनस्य मनो लभतेऽद्भुतमुत्थानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(११)

क्षणे क्षणे या नवतां धत्ते कणे कणे कलगानम्।
गृहे गृहे या कमलां धत्ते पदे पदे सम्मानम्॥
दिनं दिनं या पर्व विधत्ते जनं जनं सोल्लासम्।
नयने नयने लीलां धत्तेऽधरेऽधरे च सुहासम्॥
एवम्भूता पाटलनगरी यस्यानन्दनिधानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१२)

पवनप्रासादेन वैद्यविदुषां नैपुण्यविलासैः।
चन्द्रप्रतोल्या चतुष्पथैरथ रम्योपवनविलासैः॥
चित्रविचित्रनामपट्टैरापणिकोदारसुमार्गैः
आगन्तूनां वित्तहराणामापणिकानां भागैः॥
लसिता यज्जयपुरी विधत्ते वृद्धं जनं युवानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(१३)

घर्मच्छायापीतश्यामा क्वाप्यरावली रम्या।
क्वापि कुरङ्गाली चलचरणा रोमन्थिनी विलोक्या॥
क्रमेलकानां क्वचिदपि मानवकार्यार्थं सहयोगः।
दृश्यः क्वचिदपि गोण्डवणानां रूपस्वरसंयोगः॥
यस्मिन् दृश्यं क्वापि नृत्यगीतानां मधुरविधानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(१४)

दिलवाड़ा-गोविन्द-बिहारी-मन्दिराणि दिव्यानि।
राजसमन्दं बालसमन्दं स्थानान्यथ भव्यानि॥
आमेरे बीकानेरे जैसलमेरे दुर्गाणि।
जोधपुरोदयपुरामेर - जल - झील - काच - महलानि॥
श्वेतरक्तपाषाणानथ धत्ते यत्ताम्रनिधानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(१५)

अर्थिकामपूरणं विधत्ते यत्र गरीबनवाजः।
भूमण्डले समस्ते व्याप्तो यद्व्यापारिसमाजः॥
यस्य श्रमिका जगत्प्रसिद्धाः सत्वरकर्मविधाने।
यस्य च धनिका जगत्प्रसिद्धा धर्मार्थं धनदाने॥
रणाङ्गणे यद्वीरस्तनुते ह्यनुपमशौर्यवितानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१६)

असमयवृष्टिं दुर्भिक्षं वा भूमेरूषरतां वा।
वह्निवातभूकम्पावर्षणजनितानुपद्रवान् वा॥
पेयजलाभावं पशुचाराभावं वस्त्राभावम्।
समुचितशिक्षावसराभावं वृत्तिनिश्चयाभावम्॥
जेतुं यतते श्रमबलतो यन्नित्योत्साहनिधानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(१७)

यद्वर्णयितुं यज्ज्ञापयितुं शब्दास्तिष्ठन्त्यल्पाः।
यस्य द्रष्टुं वैभवमखिलं ह्यपेक्षिता वै कल्पाः॥
यस्य सरो (झील)-वापिका-सागरान् को वा मातुं शक्तः?
विजयस्तम्भं यस्य चोन्नतं को विस्मर्तुं शक्तः?
नानादेशसमायातानां विहगानां यत्स्थानम्।
जयति मनोज्ञं राज्यललामं तदिदं राजस्थानम्॥

(रचनातिथिः १३-४-१९८३)

●

Padma Shri Rama Kant Shukla Collection at Devo Vani Parishad, Uttam Nagar New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अहं स्वतन्त्रता भणामि[१]

अहं स्वतन्त्रता भणामि मद्वचो निशम्यताम्।
निधाय मानसे च तद् यथोचितं विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(१)

मदर्चनाकृते शिरांस्युपायनीकृतानि यैः,
धनं वपुस्तथा मनः सहर्षमर्पितानि यैः।
अवापुरात्मवक्षसि ज्वलद्भुशुण्डिगोलिकाः,
गतास्त एव मे जना सदैव वन्दनीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(२)

भवद्भिरन्तरिक्षगा जनाः स्वदेश ईक्षिताः,
भवद्भिराततायिनाशकारिणोऽपि दीक्षिताः।
कृतं भवद्भिरेशियाद्व्यशीतिखेलयोजनम्,
तदेतदर्थमद्य मे शुभेहितं प्रगृह्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

(३)

भवद्भिरद्य दृश्यते यथार्थिकी समुन्नतिः,
भवद्भिरद्य दृश्यते नवा च या विनिर्मितिः।
भवद्भिरद्य यः स्वतन्त्रतारसो निपीयते,
तदेतदात्मजीवने चिरं चिराय धार्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

(४)

शुभाः हि कामनाः भवत्कृते समर्पयाम्यहम्,
समुन्नतिं सुखं च वः सदैव चिन्तयाम्यहम्।
परन्तु वर्तमानया विचित्रकाललीलया,
मनाग् विचिन्तिता यदेव वच्मि तन्निशम्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

Padma Shri Rama Kant Shukla Collection, Prevayar Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

मया न कल्पितं कदापि दुर्बलाभिशोषणं
मया न कल्पितं कदापि दुर्जनाभिपोषणम्।
मया न कल्पितं कदापि सज्जनावमाननम्
सहेऽखिलं च च तद् यथा सहै न तद्विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(६)

विलोकयामि वृत्तिहीनतामहं यदा यदा,
विलोकयामि नीतिहीनतामहं यदा यदा।
नतानना गतासुका भवाम्यहं तदा तदा,
इयं दशा न मेऽस्तु येन तत्सदा विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(७)

यदा यदा शृणोम्यहं वधूविदाहपातकम्,
यद यदा शृणोम्यहं बलात्कृतिं विहिंसनम्।
तदा तदा भवाम्यरुन्तुदव्यथाप्रपीडिता,
इयं व्यथा प्रणाशमेतु येन, तद्विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(८)

स्वदेशवासिभिः स्वदेशवासिनां विहिंसनम्,
पृथक्त्वभावपोषणं स्वदेशदेहदारणम्।
अधीतिपण्यविक्रयं करप्रदातृनिःस्वतां,
विलोक्य यां शुचं गतास्मि सा द्रुतं विलोप्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

(९)

जलं न लभ्यते तथा, यथा सुरा पदे-पदे,
वचांसि सन्ति भूरिशो न हि क्रियाः पदे-पदे।
पुनश्च भेदभावना प्रवर्त्यते पदे-पदे,
इदं दशा समर्थनं किमर्हतीति चिन्त्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

Padma Shri Rama Kant Shukla Collection at Sarv Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१०)

दलाद् दले पलायनं, प्रवञ्चनां क्षणे क्षणे
प्रतारणं जने जने, विहिंसनं पणे पणे।
विलोक्य रोगदायकं विमिश्रणं कणे कणे,
गतास्मि यां शुचं हि सा द्रुतं द्रुतं विलोप्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

(११)

अयोग्यता पदोन्नता, सुयोग्यता पदच्युता,
अमोघलाभकारिणी मता च चाटुकारिता।
इयं स्थितिर्विलोक्यते यदा, तदा मम स्थितिः,
सुपुष्टतां भजेत्कथं? भवद्भिरेव कथ्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

(१२)

क्वचिद्विलाससाधनैर्विमण्डिता विलासिनः,
क्वचित्क्षुधाप्रपीडिता वसन्ति देशवासिनः।
क्वचित्पयस्विनी धनस्य कुत्रचिच्च निःस्वता,
इयं दशा विलोपमेतु येन तद्विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(१३)

कथं पदातिमार्ग एव शेरते हि कार्मिकाः,
कथं च धर्मनाम्नि सर्वमाचरन्ति धार्मिकाः।
कथं च देहविक्रयो विधीयते सुयोजितम्
इदं निरीक्ष्य मानसे समीक्षणं विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(१४)

अहं स्मरामि कष्टपद्धतिं पुरानृणां यदा,
अहं भवामि गद्गदाभिमानसंयुता तदा।
विलोक्य किन्तु वर्तमाननेतृलाभकाङ्क्षितां,
व्रजान्यहं मुदं ह्यथो शुचं? स्वयं विचार्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१५)

धनस्य वा श्रमस्य वा न कृच्छ्रतास्ति भारते
समस्तधातवो मिलन्ति भारते प्रभारते।
उदेति या यदा-कदा तथापि बुद्धिहीनता
न सा कदाप्युदेतु येन तत्सदा विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(१६)

न निर्धनो न निर्बलो जनोऽत्र कोऽपि जायताम्,
न कस्यचित्समादरो विखण्डितश्च जायताम्।
निजावलम्बनं जने जने सदा प्रवर्धताम्,
जनो जनोऽस्य भारतस्य मोदताम्, प्रमोदताम्॥
अहं स्वतन्त्रता भणामि.....॥

(रचनातिथिः १५-८-१९८३)

(आकाशवाणीतः ३, ६, ११, १३, ४ संख्याकानि पद्यानि न प्रासार्यन्त। इयं कविता इत पूर्वम् अर्वाचीनसंस्कृतस्य पञ्चमवर्षीये चतुर्थेऽङ्केऽपि प्रकाशिता बभूव किन्तु २, १३ संख्याके पद्ये तत्र न आस्ताम्।)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रौति ते भारतम्!

कश्चिदुवाच -

कोई बोला–

किं रमाकान्त! नित्यं त्वया भण्यते
'भाति मे भारतं भाति मे भारतम्।'
किं न पश्यस्यनेकैरभावैर्युतं
रौति ते भारतं रौति ते भारतम्॥१॥

कुत्रचिद्दीर्घपङ्क्तिस्थिता मानवाः
यापयन्ति स्वकालं प्रतीक्षापराः।
मोचयन्ति स्वनिःश्वासराशीनहो!
यैर्व्यथामाप्नुवद् रौति ते भारतम्॥२॥

रेलयानेषु भिक्षापरान् बालकान्
अङ्गहीनानवस्त्रान् दयोत्पादकान्।
गालिभिः पोषितान् न्यक्कृतैस्तोषितान्
वीक्ष्य चिन्तामयं रौति ते भारतम्॥३॥

वृत्तपत्रेषु नित्यं बलात्कारिणां
निन्द्यपैशाचकृत्यानि पश्यत् पठत्।
किञ्च हत्यापहारादिगाथा वहत्
रौति ते भारतं रौति ते भारतम्॥४॥

क्वाप्यशिक्षातमोभिर्वृतं कष्टदैः
क्वापि रोगैः परीतं महादारुणैः।
नित्यमुत्कोचलीलाविलासैर्युतं
रौति ते भारतं रौति ते भारतम्॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Kant Baruah Smriti Sansthan Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यौतुकप्रेप्सुभिर्लोलुपैर्निन्दितै-
मर्त्यरूपे स्थितै राक्षसैः कौटिकैः।
दह्यमाना वधूर्वीक्ष्य दुःखेन हा
रौति ते भारतं रौति ते भारतम्॥६॥

देहपण्याजिरे नूपुराकर्णनैः
पारवश्याङ्कितैर्नृत्यकृत्यैस्तथा।
येन दारिद्र्यगाथोच्चकैर्गीयते
तद् व्यथापूरितं रौति ते भारतम्॥७॥

यत्र रक्षाभटैः रक्षणीयो हतो
यत्र गोप्ता न गोप्यं क्षमो रक्षितुम्।
यत्र सन्तो मता दस्यवो हिंसका
रौति तद् भारतं रौति तद् भारतम्॥८॥

उच्चशिक्षां समाप्यापि वृत्त्यर्जने
न क्षमो जायते यत्र यूनां गणः।
यत्र कुत्रापि वृत्त्यर्थमाहिण्डते
रौति तद् भारतं रौति तद् भारतम्॥९॥

हा कराधानकर्ताधिकारी स्वयं
यत्र धत्ते स्वगेहे विना सूचनाम्।
कृष्णवित्तं तथा स्वर्णभाण्डं महद्
रौति तद् भारतं रौति तद् भारतम्॥१०॥

कार्यरोधैस्तथा हिंसकान्दोलनैः
चाटुकारप्रणीतैर्वृथा भाषणैः।
ईश्वरम्मन्यमानैरहो दम्भिभी
रौति ते भारतं रौति ते भारतम्॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उग्रकृत्यैर्नरैर्यत्र मध्येपथं
पूर्वसेनापतिर्हन्यते गोलिभिः।
यत्र चार्ता भिषग्भिर्बलाद्दूष्यते
निन्द्यकृत्यान्वितं रौति तद् भारतम्॥१२॥

यत्र यूनां नवैर्मादकैर्वस्तुभिः
क्षीयते शक्तिरोजस्तथा लुप्यते?
यत्र दृश्या युवानो जराजर्जरा
रौति तद् भारतं रौति तद् भारतम्॥१३॥

कर्हिचिद्विश्वबन्धुत्वमुद्घोषयत्
पावयद्विश्ववन्द्यैश्चरित्रैर्जगत्।
यत्तदेवाद्य विद्वेषहिंसाप्लुतं
रौति ते भारतं रौति ते भारतम्॥१४॥

कर्षकेभ्यो यदान्नं भवेद् दुर्लभं
कार्मिकेभ्यश्च गेहं यदा दुर्लभम्।
वस्त्रकृद्भ्यश्च वस्त्रं यदा दुर्लभं
तर्हि नूनं हहा! रौति ते भारतम्॥१५॥

कर्गले राष्ट्रभाषास्ति नो भाषणे
संस्कृतं स्तूयते, नैव तत्सेव्यते।
स्वीयपादे कुठारः स्वयं पात्यते
वीक्ष्य सर्वं ध्रुवं रौति ते भारतम्॥१६॥

रमाकान्त उवाच –

यत्त्वया कीर्त्यते दोषजातं सखे!
तन्मया सूचितं ह्येकपद्ये[1] पुरा।
दोषवर्जं मया सद्गुणाः सञ्चिता-
स्तेन प्रोक्तं मया 'भाति मे भारतम्'॥१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कीर्तनेनैव वा क्रन्दनेनैव वा
लोपमेष्यन्ति दोषा न देशस्य वै।
तेन सर्वै क्रियन्तां सदा सुक्रियाः
येन भातु प्रसन्नं सदा भारतम्॥१८॥

लोलुपा नायका नैव सन्त्वत्र भोः
सन्तु कर्तव्यशून्या न चापि प्रजाः।
देशसेवां मिलित्वा कुरुध्वं समे
येन भूयोऽपि भासेत नो भारतम्॥१९॥

(रचनातिथिः १२-१०-१९८५)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राष्ट्रदेवते

राष्ट्रदेवते! कथं नु पूजनं करोमि ते?
ब्रूहि देवते! समर्चनं कथं करोमि ते?॥१॥

उग्रताविहिंसनोत्थचीत्कृतीः शृणोमि चेत्
राष्ट्रदेवते! कथं नु कीर्तनं करोमि ते॥२॥

यावदाननानि हर्षफुल्लतां न चाप्नुयुः
ब्रूहि देवते! सुमार्पणं कथं करोमि ते॥३॥

दन्दशूकवेष्टितं हि कार्यतन्त्रमस्ति चेत्
चन्दनं कथं समर्पयामि राष्ट्रदेवते॥४॥

वीक्ष्य कर्दमावृता हि कोटि-कोटिवीथिकाः
राष्ट्रदेवते! कथं सुगन्धमर्पयामि ते॥५॥

सौमनस्यसूत्रगुम्फिता न चेत्स्थिता जनाः।
राष्ट्रदेवते! कथं सुमाल्यमर्पयामि ते॥६॥
(राष्ट्रदेवते! कथं नु हारमर्पयामि ते॥)

पेयवारि दृश्यते यदा च वै सुदुर्लभं
स्नानवारि पावनं समर्पयामि किं नु ते॥७॥

हा! वधूप्रदाहचीत्कृतीर्निशम्य नित्यशः
स्तोत्रमापठामि ते कथं नु राष्ट्रदेवते!॥८॥

द्वेषकृत्प्रभञ्जनो हि यावदेति नो शमं
दीपकं कथं प्रदर्शयामि राष्ट्रदेवते!॥९॥

एकलोऽपि वीक्ष्यतेऽन्नपीडितो मया यदि
राष्ट्रदेवते! कथं नु भोज्यमर्पयामि ते!॥१०॥

वर्धते धनं हि, किन्तु निर्धनेषु तन्न चेत्
राष्ट्रदेवते! कथं नु दक्षिणां ददामि ते॥११॥

मिष्टमर्पितं पुरैव 'भाति भारतं' हि ते।
यन्मया कटूक्तमत्र तत्क्षमस्व देवते!॥१२॥
(रचनातिथिः २९-१२-१९८५)

●

Rama Shri Rama Kant Shukla Collection. Digitized by Sarayu Trust Foundation Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतजनताऽहम्

(१)

अभिमानधना विनयोपेता
शालीना भारतजनताहम्।
कुलिशादपि कठिना कुसुमादपि
सुकुमारा भारतजनताहम्॥

(२)

निवसामि समस्ते संसारे
मन्ये च कुटुम्बं वसुन्धराम्।
प्रेयः श्रेयश्च चिनोम्युभयं
सुविवेका भारतजनताहम्॥

(३)

विज्ञानधनाहं ज्ञानधना
साहित्यकला-सङ्गीतपरा।
अध्यात्मसुधातटिनी-स्नानैः
परिपूता भारतजनताहम्॥

(४)

प्रस्तरखण्डेषु मयोत्कीर्णा
मूर्तयः सजीवा भाषन्ते।
दिग्विजयिन्यो मे कलाः सन्ति
सहृदयास्मि भारतजनताहम्॥

(५)

मम गीतैर्मुग्धं समं जगत्
मम नृत्यैर्मुग्धं समं जगत्।
मम काव्यैर्मुग्धं समं जगद्
रसभरिता भारतजनताहम्॥5॥

Padma Shri Rama Kant Shukla Collection at Deevaani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(६)

उत्सवप्रियाहं श्रमप्रिया
पदयात्रा - देशाटन - प्रिया॥
लोकक्रीडासक्ता वर्धे-
ऽतिथिदेवा भारतजनताहम्॥

(७)

कल्पनातीतदुःखानां वा
सौख्यानां वापि पराः काष्ठाः।
समभावतया सोढुं शक्ता
समबुद्धिर्भारतजनताहम् ॥

(८)

कृत्वा भूमण्डलपर्यटनं
यं देशं स्वर्गं मनुते ना।
तस्यैव नृपस्तस्यैव प्रजा
ऋजुचरिता भारतजनताहम्॥

(९)

नाहं भ्रमेऽस्मि नाहं मोहे
विश्वं भ्रान्त्वा तथ्यं वदामि।
प्रेरणां जगन्मत्तो लभते
धृतिशीला भारतजनताहम्॥

(१०)

विश्वस्मिन् जगति गताहमस्मि
विश्वस्मिन् जगति सदा दृश्ये।
विश्वस्मिन् जगति करोमि कर्म
कर्मण्या भारतजनताहम्॥

(११)

लङ्घिताः पर्वता अवरुद्धा
नद्यः प्रपूरिता जलाशयाः।
सिक्ता मरवश्च यया बहुधा
महिता सा भारतजनताहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१२)

किं किं न तपस्तप्तं हि मया
स्वातन्त्र्यदेवताराधनाय? ।
किं किं न सहे तद्रक्षार्थं
श्रमशीला भारतजनताहम्॥

(१३)

ये मह्यं गालीर्ददुस्तथाऽ-
कुर्वन्नपकारं मम नित्यम्।
जितवती तानहं तपोबलै-
र्गम्भीरा भारतजनताहम्॥13॥

(१४)

दारिद्र्यदुःखदावाग्निदग्ध-
देहापि नो म्रिये ह्यद्यावधि।
साहस-जिजीविषा-कर्मठता-
पुत्तलिका भारतजनताहम्॥

(१५)

दम्भोलिसन्निभा अपि विपदोऽ
नायासमेव सर्वा हि सहे।
विषपानपरापि स्मितवदना
सर्वंसहभारतजनताहम् ॥

(१६)

आयातु यातु लक्ष्मीः स्तुवन्तु
निन्दन्तु नीतिनिपुणाः कामम्।
उच्चावचमार्गे गच्छन्ती
सोत्साहा भारतजनताहम्॥

(१७)

अण्वस्त्रनिर्मितिर्नो कठिना
मम कृते तथापि न तामीहे।
वास्तविकी हेतिरहिंसा मे
निर्भीका भारतजनताहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१८)

सङ्गणकयन्त्रजालोऽपि मेऽस्तु
भौतिक्युन्नतिरपि मे तथास्तु।
जीवनरसश्च मा शुष्को भू-
दितिकामा भारतजनताहम्॥

(१९)

आक्रमणं नैव करोमि कदा-
प्याक्रमणं नैव कदापि सहे।
आर्जवं न मे मूर्खत्वमस्ति
दृढकवचा भारतजनताहम्॥

(२०)

मैत्री मे सहजा प्रकृतिरस्ति
नो दुर्बलतायाः पर्यायः।
मित्रस्य चक्षुषा संसारं
पश्यन्ती भारतजनताहम्॥

(२१)

ज्वालामुखिनं गिरिमारूढं
परमाणुदैत्यविकलितचित्तम्।
अधुनापि जगच्छान्तिं ब्रूते
या सैषा भारतजनताहम्॥

(२२)

विद्वांसो वीराः शिल्पकराः
श्रमिणः सन्तः किं किं न मेऽस्ति।
स्यादत्र न गृहभेदनपाप-
मितिकामा भारतजनताहम्॥

(२३)

अपि सहे बलात्कारान् हत्या
अपहृतीस्तथा तस्करवृत्तीः।
नो सहे किन्तु देशस्य भङ्ग-
मुन्निद्रा भारतजनताहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२४)

नग्ना बुभुक्षिता निर्गेहा
सत्यपि जीवामि बहोः कालात्।
जीविष्यामि च कल्पान्तमहं
मृत्युञ्जय - भारतजनताहम् ॥

(२५)

जिह्वां मे कीलयितुं शक्तः
कः कोऽत्र जगति मातुर्जातः।
वाणी विहरति मे सदोज्ज्वला
गर्जन्ती भारतजनताहम् ॥

(२६)

नक्राश्रुजलं जाने सम्यग्
जाने च गृध्रगोमायुगिरम्।
जाने करटक-दमनक-चरितं
हृदयज्ञा भारतजनताहम्॥

(२७)

तस्करा हिंसका गेहभिदो
मूढाश्च सन्तु मयि यदा कदा।
ते किन्तु नैव परिभाषा मे
समुदारा भारतजनताहम्॥

(२८)

दृप्तानामङ्कुशतां भजामि,
नम्राणां रक्षकतां भजामि।
दुष्टानां शिक्षकतां भजामि
लोकज्ञा भारतजनताहम्॥

(२९)

शासनासन्दिकामधिरोढुं
प्रतिनिधयो मे कुर्वन्ति न किम्?
तां प्राप्य केऽपि यां विस्मरन्ति
मुग्धा सा भारतजनताहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३०)

मुग्धा त्वहमस्मि परं दृप्तान्
लेहयामि धूलिं निजौजसा।
जनतन्त्रपद्धतेर्गुडाकेश-
गोप्त्री खलु भारतजनताहम्॥

(३१)

भारतभूमेरुत्पन्नाह-
मस्याञ्च विलीये सामोदम्।
सेविष्ये ह्येनामाजीवन-
मतिहृष्टा भारतजनताहम्॥

(३२)

मोदे प्रगतिं दर्शं दर्शं
वैज्ञानिकीं च भौतिकीं, परम्।
दूयेऽद्यत्वे लोकं लोकं
शठचरितं भारतजनताहम्॥

(३३)

दारिद्र्यं वृत्तेर्न्यूनत्वं
सर्वमप्युपेक्षे काममहम्।
नोपेक्षे किन्तु सतां पीडां
करुणार्द्रा भारतजनताहम्॥

(३४)

आचरति दुर्जनो नीचकर्म
यत्तसर्वं जाने, जाने।
प्राप्नोमि तथापि न निष्ठुरतां
करुणार्द्रा भारतजनताहम्॥

(३५)

देशे निरागसां संहारं,
लुण्ठनं सतां च वधूदाहान्।
श्रावं श्रावं दर्शं दर्शं
व्यथमाना भारतजनताहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(३६)

पश्यामि यदा कुटिलैः क्लृप्तां
मूढैश्च कृतां विघटनसरणिम्।
विलपामि तदा खिन्ना खिन्ना,
चिन्ताकुलभारतजनताहम् ॥

(३७)

अभिसन्धि-धार्मिकोन्माद-भैक्ष्य-
शारीरपण्य-मिश्रणदोषैः।
अस्वास्थ्यकरैश्च प्रदूषणै-
रतिविकला भारतजनताहम्॥

(३८)

पश्यामि यदा मलिनां गङ्गां
सरितोऽन्या अग्निमथोद्गिरतीः।
तासां पवित्रतां शीतलतां
चेच्छन्ती भारतजनताहम् ॥

(३९)

स्वीयैरपराधैः ह्रीणाहं
स्वीयैर्दोषैरतिखिन्नाहम् ।
एकतां कामये नित्यं स्वां
जगदीश्वर! भारतजनताहम्॥

(४०)

युवकात्मघात - मादकपदार्थ-
सेवनोत्कोच - दुर्बलघाताः ।
नो सन्तु मदीये देशेऽस्मि -
न्नितिकामा भारतजनताहम्॥

(४१)

अविरुद्धान् वापि विरुद्धान् वा-
प्येकस्मिन् सूत्रे स्थापयितुम्।
किं किं न मया क्रियते लोके
यत्नस्था भारतजनताहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४२)

ये दृश्या मयि दोषा नैकेऽ-
रुन्तुदा अवाच्याः कष्टकराः।
कामये विलोपं वै तेषा-
मतिशीघ्रं भारतजनताहम्॥

(४३)

आक्रमिणो लुण्ठक-सङ्घाता
आगता येऽपि मयि गता लयम्।
विविधाप्येका विलसामि सदा
बहुवर्णा भारतजनताहम्॥

(४४)

अभितः परितः समया निकषा
मां यद्घटते तत्प्रेक्षेऽहम्।
सर्वस्य कृते खलु सज्जा या-
सावहिता भारतजनताहम्॥

(४५)

सागरे वियति धरणीपृष्ठे
भूधरशृङ्गेषु वनेषु मरौ ।
निजमातृभूमिरक्षणदक्षा
जितनिद्रा भारतजनताहम्॥

(४६)

क्षेत्रेषु खलेषु तथा चैवम्
उद्योगगृहेषु कुटीरेषु ।
नित्यं समृद्धिमुत्पादयामि
निस्तन्द्रा भारतजनताहम्॥

(४७)

नेतॄणां वार्तां नो करोमि
निजवार्तामेव परं भणामि।
आराध्यदैवतं मे भारत-
माराधक - भारतजनताहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४८)

किं किं स्मरामि किं विस्मरामि,
किं किं लिखामि किं किं पठामि!
किं वा गायामि निजां गाथाम्
अविकत्थनभारतजनताहम् ॥

(४९)

जलबुद्बुदसङ्काशाः कति नो
संस्कृतयो लुप्ताः संसारे।
गङ्गाप्रवाह इव सनातनी
गतिशीला भारतजनताहम्॥

(५०)

अथवा किं बहुना रमाकान्त?
सङ्क्षिप्ततया तथ्यं भणामि।
हरिमेव जगज्जगदेव हरिं
पश्यन्ती भारतजनताहम्॥

(५१)

परतन्त्रो मा भूत्क्त्वापि कोऽपि
सर्वः सर्वत्र सदा नन्दतु।
जगतः स्वतन्त्रतामिच्छन्ती
मोदे खलु भारतजनताहम्॥

(५२)

रथ-रमाकान्त-राजेन्द्रमिश्र-
कवितालहरीः पायं पायम्।
विस्मरति सुधाधारामपि या
रसिका सा भारतजनताहम्॥

(५३)

यत्कथितमस्ति तत्सत्यमस्ति
अपि कश्चित्तन्मिथ्याकरोति?
श्रद्धेयं वचनं व्याहरामि
प्रामाणिकभारतजनताहम् ॥

(रचना तिथिः १५-७-१९८६)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एकं सद् बहुधा विलोक्यते भारतम्

एकं सद् बहुधा विलोक्यते भारतम्।
बहुधा सच्चैकं विराजते भारतम्।
एकमखण्डमभिन्नमस्ति मे भारतम्।
रम्यमस्ति सुरवन्द्यमस्ति मे भारतम्॥१॥

एकं सद्.....।

यदि पादेऽस्य कदापि निविशते कण्टकम्
निखिलतनौ पीडनं भवति मर्मान्तकम्।
यदि वेदना शिरसि समुदेति तदा ध्रुवं
व्यथते सकलतनौ मे निखिलं भारतम्॥२॥

एकं सद्.....।

भिन्नमस्तु भाषाभूषासु पदे पदे
भिन्नमस्तु लोकाचारेषु पदे पदे।
भिन्नमस्तु पूजापद्धतिषु पदे पदे
आत्मन्येकमभिन्नमस्ति मे भारतम्॥३॥

एकं सद्.....।

कोटिकोटिजनताचेतस्सु विराजितम्।
नित्यनवीनोत्सवपर्वावलि - राजितम्।
विश्वबन्धुता - जिजीविषा - विस्तारकम्।
जगतो हृदयं जयति जगति मे भारतम्॥४॥

एकं सद्.....।

वीक्ष्य समृद्धिं यन्त्रोद्योगाणां भृशम्।
वीक्ष्य समृद्धिं कृषिसम्पत्त्या वा भृशम्।
वीक्ष्य समृद्धिं ज्ञानकलादीनां भृशम्,
मोमुदीति मनसा निखिलं मे भारतम्॥५॥

एकं सद्.....।

Padma Shri Rama Kant Shukla Collection at Devarshi Kanishad, Gram Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यदा व्योम्नि सागरे शैलशृङ्गेषु वा,
विकटकर्दमे मरौ विजनविपिनेषु वा।
सावधानभटनिवहो रक्षति जन्मगां
गर्वमेति विपुलं निखिलं मे भारतम्॥६॥

एकं सद्.....।

क्वापि पतति सङ्कटे प्रजातन्त्रं यदा,
अवरुध्यते जनानां कण्ठो वा यदा।
सर्वातङ्कभयाशङ्काः परिहृत्य वै,
गर्जति सकलं समुज्ज्वलं मे भारतम्॥७॥

एकं सद्.....।

क्वापि भवति कुलवधूदाहपापं यदा,
रक्ष्यभक्षणं दुर्बलघातो वा यदा।
क्वापि भवति यदि हिंसाक्रीडा दुःखदा,
रोरुदीति करुणं सकलं मे भारतम्॥८॥

एकं सद्.....।

आशां वृणुते नैव निराशां भारतम्,
सद्गुणमेव स्मरति न दोषं भारतम्।
कलहविवादान् शमयति लोके भारतम्,
शान्तिं जगति तनोति शुभं मे भारतम्॥९॥

एकं सद्.....।

यत्र यत्र सत्यं ऋजुता समुदारता,
यत्र यत्र करुणा श्रमपरता वीरता।
यत्राहिंसा - त्याग - विवेक - सहिष्णुताः,
तत्र तत्र विलसति सुतरां मे भारतम्॥१०॥

एकं सद्.....।

केवलशासनतन्त्रं नो मे भारतम्,
केवलमवनी गृहसम्पन्नो भारतम्।
कोटिकोटिजनतपःश्रमौ मे भारतम्,
सङ्गच्छध्वं संवदध्वमिति भारतम्॥११॥

एकं सद्.....।

(रचनातिथिः ३१-१-१९८९)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उत्तरमंगलम्

मित्र! लब्धा मया ते शुभाः कामना-
स्तत्कृतेऽहं कृतज्ञो भवन् भूरिशः।
स्वास्थ्यदं मोददं कीर्तिदं सौख्यदं
नूतनं वत्सरं ते शुभं कामये॥१॥

यत्र गेहे वसेर्यत्र वीथ्यां वसे-
र्ग्रामके वा नगर्यां वसेस्त्वं सखे।
वैमनस्याग्निरुग्रो न तत्र ज्वले-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥२॥

येन मार्गेण यात्रा भवेत्तावकी
तत्र पुष्पाणि नित्यं हसेयुः सखे!
कण्टकं न स्पृशेत्ते पदं कोमलं
नूतने वत्सरे ते भवेन्मङ्गलम्॥३॥

कुत्र चिन्तात्र लोके न संदृश्यते
कुत्र वा दुःखशोकादयो न स्थिताः?
त्वकृते किन्तु तिष्ठन्त्वदृश्या इमे
नूतने वत्सरे ते भवेन्मङ्गलम्॥४॥

यत्र देशेऽस्ति वासः, सखे तावक-
स्तत्र कर्त्तव्यशून्यो न कश्चिद्भवेत्।
स्युः प्रजातन्त्ररक्षापरास्तन्नरा
नूतने वत्सरे ते भवेन्मङ्गलम्॥५॥

उष्यते यत्र राष्ट्रे त्वयाहर्निशं
तत्र कार्यं चिकीर्षुर्यदि स्याज्जनः।
प्राप्नुयात् कार्यवृत्तिं तदा स ध्रुवं
नूतने वत्सरे ते भवेन्मङ्गलम्॥६॥

Padma Shri Rama Kant Shukla Collection at Devarshi Rankhad, Gram Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ज्ञातमस्त्येव मे, त्वं हि सामाजिकं
वीक्ष्य वैषम्यमाप्नोषि तापं सखे!
आयतावीदृशी ते दशा नो भवे-
नूतने वत्सरे ते भवेन्मङ्गलम्॥७॥

वृत्तपत्रेषु नित्यं बलात्कारिणां
निन्द्यपैशाचकृत्यानि न त्वं पठेः!
नापि हत्यापहारादि-गाथा नवा
नूतने वत्सरे ते भवेन्मङ्गलम्॥८॥

प्रोन्नतिर्दुजनानां सतां दुर्गति-
र्वृत्तिकष्टार्दितानां च यूनां गतिः।
नो दुनोतु त्वदीयं द्रुतं मानसं
नूतने वत्सरे ते भवेन्मङ्गलम्॥९॥

नैव वध्वाः न पत्युर्न वा कस्यचि-
ज्जीवितप्राणिनो दाहमाकर्णयेः!
नैव दारिद्र्यपीडा जनान् बाधये-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥१०॥

लोलुपा नायकास्सन्तु देशे नहि
स्वाधिकारात्प्रमता न चापि प्रजाः।
स्वैरिणो नो भवेयुस्तथा शासका
नूतने वत्सरे ते भवेन्मङ्गलम्॥११॥

मुग्धलोकं सखे! वञ्चनाचुञ्चवो
गृध्रगोमायवो वञ्चयेयुर्नहि।
क्षेमदे शान्तिदे हर्षदे श्रीप्रदे
नूतने वत्सरे ते भवेन्मङ्गलम्॥१२॥

देववाणीमुपेक्ष्य प्रभाभासुरां
येऽवनत्या गता अन्धकूपे नराः।
तेऽपि गृह्णन्तु शिक्षां सखे! सत्वरं
नूतने वत्सरे ते भवेन्मङ्गलम्॥१३॥

Padma Shri Ramakanta Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दैन्यहीनं दयापूर्णमाशान्वितं
जीवनं कर्मठं ते सदा राजताम्।
त्वं सुखीः स्याः, लभस्व प्रियं काङ्क्षितं
नूतने वत्सरे ते भवेन्मङ्गलम्॥१४॥

ये जना आसते ते कुटुम्बे सखे!
ते प्रसन्नास्समर्था लसेयुस्सदा।
विश्वमेकं कुटुम्बं च ते राजताम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥१५॥

अत्र लोके सतो रक्षितुं सर्वदा
दुष्कृतीः हर्तुमुत्साहिनस्स्युर्नराः।
निर्मितिर्नूतना स्यात्सदा शङ्करी
नूतने वत्सरे ते भवेन्मङ्गलम्॥१६॥

नैव याचे धनं, स्वर्गमेवाथवै-
काकिनस्ते न सौख्यं सखे! कामये।
सन्तु सर्वत्र सर्वे सदा नन्दिता
नूतने वत्सरे ते भवेन्मङ्गलम्॥१७॥

सन्तु बाला युवानोऽथ वृद्धास्समे
निर्भयाः कर्मठा लोकसेवापराः।
आदरः कस्यचित्खण्डितो नो भवे-
नूतने वत्सरे ते भवेन्मङ्गलम्॥१८॥

सत्यनिष्ठा जयेल्लेखनी निर्भया
निर्भया वाग् जयेल्लोकसंरक्षिणी।
साधुभावस्तथा ज्ञानपूतो जये-
नूतने वत्सरे ते भवेन्मङ्गलम्॥१९॥

आर्तरक्षार्थमस्त्राणि शस्त्राणि वै
सन्तु, नैव प्रहर्तुं तथानागसि।
कण्टकानां च लोकस्य लोपो भवे-
नूतने वत्सरे ते भवेन्मङ्गलम्॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

येषु चित्तेषु दावानलो भीषणो
द्वेषभावस्य जागर्ति धूधूत्करः।
जागृयात्तेषु वासन्तिकी श्रीः शुभा
नूतने वत्सरे ते भवेन्मङ्गलम्॥२१॥

नूतना नूतना येऽपराधाः खलै-
र्नित्यमाविष्क्रियन्ते जगद् बाधितुम्।
ते समुन्मूलिताः स्युः समाजाद् द्रुतं
नूतने वत्सरे ते भवेन्मङ्गलम्॥२२॥

वारिवाहः सुकाले समागच्छतात्
सन्तु गावश्च पुष्टाः सवत्साः समाः।
शं स्वकार्येषु लग्नाः समे प्राप्नुयु-
र्नूतने वत्सरे ते भवेन्मङ्गलम्॥२३॥

क्षेत्रकेष्वन्नमुत्पादितं स्याद्बहू-
द्योगशालास्वथोत्पादवृद्धिर्भवेत्।
सन्तु सत्यश्रमाभ्यां समाः सिद्धयो
नूतने वत्सरे ते भवेन्मङ्गलम्॥२४॥

नैव पश्येदभद्रं नरश्चक्षुषा
नैव चाकर्णयेद्वाप्यभद्रं क्वचित्।
नैव वाचा भणेद्वाक्यमुद्वेजकं
नूतने वत्सरे ते भवेन्मङ्गलम्॥२५॥

स्वस्थपुष्टं समेषां शरीरं लसे-
न्मानसं शैवसङ्कल्पपूतं भवेत्।
सच्चिदानन्द आत्मा स्वरूपं भजे-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥२६॥

वाचि विद्या, करे कर्म, दृष्टौ दया
पादयोश्च प्रकृष्टा गती राजतम्।
सुप्रवृत्तेन्द्रियैस्तोषमीयुर्जना
नूतने वत्सरे ते भवेन्मङ्गलम्॥२७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ये बुभुक्षाहता वस्त्रहीनाश्च ये
सन्ति पादातमार्गे शयानाश्च ये।
अन्नवस्त्राश्रयान् प्राप्नुयुस्ते द्रुतं
नूतने वत्सरे ते भवेन्मङ्गलम्॥२८॥

धर्मभाषाविवादा लभेरन् शमं
दुष्कृतिर्लुप्यताम् सत्कृतिर्वर्धताम्।
नित्यमौदार्यभावो जयेत्क्षुद्रताम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥२९॥

आधयो व्याधयोऽकालमृत्युस्तथा
पीडयेयुर्न लोकं श्रमाराधकम्।
कर्म कुर्वञ्छताब्दं नरो जीवता-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥३०॥

यत्र साहित्य-सङ्गीत-पूजा भवेत्
सत्कलाशिल्पशास्त्रार्चना वा भवेत्।
तत्र विघ्नो न कश्चित्समुत्पाद्यताम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥३१॥

सात्त्विका राजसास्तामसाः प्राणिनोऽ
न्योन्यमाश्रित्य कल्याणिनस्स्युस्सदा।
वाचि चित्ते च कार्ये सदेकं वसे-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥३२॥

प्रेमभङ्गो न कस्यापि लोके भवेत्
प्रेमिणो विप्रयुक्ता मिलेयुर्मुदा।
स्युः स्मितास्याः समे फुल्लपद्मोपमा
नूतने वत्सरे ते भवेन्मङ्गलम्॥३३॥

पीडिता येऽप्यभावैर्मनःक्लेशिभि-
स्ते जयेयुः समस्तानभावान्नराः।
निष्फला नैव कस्यापि काङ्क्षा भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥३४॥

Prof. Shri Rama Shri Rama Kant Shukla Collection at Devi Ahilya Bai Holkar Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शैशवं लालितं वशार्धकं पूजितं
यौवनं भोगतृप्तं हसेत्सर्वदा।
त्याग-भोगौ भवेतां सखायौ सदा
नूतने वत्सरे ते भवेन्मङ्गलम्॥३५॥

येऽपि चिन्तासहस्रैः परीताः जनाः
सन्ति पीतानना लुप्तहासस्मिताः।
सन्तु रक्तानना: पूर्णकामाश्च ते
नूतने वत्सरे ते भवेन्मङ्गलम्॥३६॥

जीवनं विश्वसम्पद् बुधैरुच्यते
तच्च विश्वस्य सेवार्थमेवार्प्यताम्।
सद्विवेकः क्रियात्तस्य रक्षां सदा
नूतने वत्सरे ते भवेन्मङ्गलम्॥३७॥

पर्वतानां वनानां नदीस्त्रोतसां
निर्झराणामृतूनां दिशां प्राणिनाम्।
वारिधीनीं च चेतः सदा प्रीयताम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥३८॥

खे जले कौ च वायौ तथा तेजसि
स्त्रग्विणी शान्तिराप्नोतु नित्यं जयम्।
क्रान्तिरेयात्परं रक्तपातं विना
नूतने वत्सरे ते भवेन्मङ्गलम्॥३९॥

तावको देश आस्तां सदा रक्षित-
स्तावकं विश्वमास्तां सदा रक्षितम्।
तावकी कीर्तिरास्तां सदा रक्षिता
नूतने वत्सरे ते भवेन्मङ्गलम्॥४०॥

स्वाभिमानोऽस्तु ते सर्वदाः रक्षित-
स्तावकी स्यात्प्रतिज्ञा सदा रक्षिता।
तावकं स्यात्तपो रक्षितं सर्वतो
नूतने वत्सरे ते भवेन्मङ्गलम्॥४१॥

Padma Shri Rama Kant Shukla Collection at Lava Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्वं हि विश्वेश्वरं विश्व आलोकये-
भूर्भुवः स्वः प्रसन्ना भवेयुश्च ते।
प्रीयतां ते रमाकान्त आजीवनं
नूतने वत्सरे ते भवेन्मङ्गलम्॥४२॥

कामना मे वशे पूरणं तद्वशे[1]
ईह आशायुतः कामनापूरणम्।
शारदाया रमायाः प्रसादोऽस्तु ते
नूतने वत्सरे ते भवेन्मङ्गलम्॥४३॥

नूतनं वत्सरं वीक्ष्य सम्प्रेषिता
यैरनेकैः सुहृद्भिः शुभाः कामनाः।
त्वद्बलेनैव तेषां कृतेऽपि ब्रुवे
'नूतने वत्सरे वो भवेन्मङ्गलम्'॥४४॥

यन्मया नोदितं यच्च काम्यं त्वया
यच्च पथ्यं भवेन्मङ्गलाधायकम्।
तत्सुलभ्यं भवेत्त्वत्कृते सत्वरम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥४५॥

वक्तुमास्ते सखे! भूरि मन्मानसे
किन्तु वीक्ष्य त्वदीयामतिव्यापृतिम्।
पत्रमत्रैव सम्पूर्णतां प्रापये
नूतने वत्सरे ते भवेन्मङ्गलम्॥४६॥

(रचनातिथिः १५-१-१९९०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वदत नेतारो मनाक्!

किं कुरुथ किं वा करिष्यथ वदत नेतारो मनाक्।
किं मनसि वो वर्तते भो भणत नेतारो मनाक्॥१॥ध्रु०॥

'अद्य युष्माकं प्रयासैर्देशगौरवमेधते।'
कश्चिदपि वक्तुं किमिच्छति चिन्तयध्वं रे मनाक्॥२॥

धर्मजातिग्रामभाषावर्णभेदोद्दीपनैः।
कीदृशं कृशरं पचध्वे वदत नेतारो मनाक्॥३॥

जनमनस्सु द्वेषवह्निर्वः प्रयासैर्ज्वालितः।
किमुचितं भवदीयकृत्यं वदत नेतारो मनाक्॥४॥

छिन्नमुद्यानं भवद्भिः पुष्पगन्धाढ्यं महत्।
दूयते न च मानसं वो हन्त! नेतारो मनाक्॥५॥

नाशितं जनजीवनं पितृसद्मतां नीताः पुरः।
कारिताः शालाश्च काराः किं न लज्जध्वे मनाक्॥६॥

रेलयानानां निरसनैर्निग्रहैश्च निरागसाम्।
किं भवति किं वा भविष्यति? वदत नेतारो मनाक्॥७॥

यैर्न दीपाली व्यलोकि स्वदितमथ न च यौवनम्।
वैशसात् तेषां न शङ्कध्वे कथं क्रूरा मनाक्॥८॥

यौवनं प्रज्वाल्यते, प्रतिभा सतामवहेल्यते।
जनमतं समुपेक्ष्यते, भद्रा बिभिथ चेतसि मनाक्॥९॥

नैव काशी नैव मथुरा नाप्ययोध्या नो पुरी।
नैव चोज्जयिनी विधत्ते वो भयं चेतसि मनाक्॥१०॥

नृषु नृषु च विद्वेषभावो रोपितो निजभाषणैः।
येऽप्यवाच्या भवदुदन्ता नोद्गिरति तान् कापि वाक्॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सौमनस्याधारभूतां भरतवसुधां नित्यशः।
कालकूटमयीं कुरुध्वे, किं न शङ्कध्वे मनाक्॥१२॥

नित्यमेव क्रूरतानृतछद्मभेदाराधकाः।
कां गतिं यूय गमिष्यथ वदत नेतारो मनाक्॥१३॥

'स्फोटयथ शासथ'-नियमतः खण्डयथ राष्ट्रैकताम्।
कुत्र गच्छथ कुत्र यास्यथ? वदत नेतारो मनाक्॥१४॥

यद्यदाचरथ स्वदेशीये जनेऽत्र प्रत्यहम्।
किं तदाचरितं कदाचित् आङ्ग्लकुटिलैरपि मनाक्॥१५॥

देशसेवां कर्तुमागच्छथ कुरुथ यादृच्छिकम्।
व्यवहृतिः केयं स्फुरति वश्चिन्तयध्वं रे मनाक्॥१६॥

निर्धना निर्धनतरास्तैस्तैरभावैः क्लेशिताः।
आढ्यता नवनूतना वो वन्दनीया किं मनाक्॥१७॥

क्लिश्यते दुष्यति च शुष्यति भिक्षते रोदिति जनः।
अत्थ पिबथ स्वपिथ हृष्यथ! किं न लज्जध्वे मनाक्॥१८॥

वीक्ष्य देशे कुव्यवस्थां वृत्तिकष्टं हिंसनम्।
निस्त्रपाः क्रन्दथ हसथ वा? वदत नेतारो मनाक्॥१९॥

वस्त्रराहित्यं कुपोषणमत्र वापि महार्घता।
नित्यमग्रे किमिति धावति? वदत नेतारो मनाक्॥२०॥

नो कृषध्वे किन्तु कृषकाणां भवन्तो नायकाः।
वीक्ष्य युष्मान् किं प्रसीदति कोऽपि सन्ना भुवि मनाक्॥२१॥

अर्थयन्तारोऽपि यूयं धर्मगुरुगुरवस्तथा।
काममोक्षविचारका अपि! बिभिथ रे चेतसि मनाक्॥२२॥

उपचिताः खलु यैर्भवन्तस्ते भवद्भिर्लुण्ठिताः।
रे प्रजातन्त्रस्य हन्तारो बिभिथ लोकान्मनाक्॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लुञ्चिता न्यायालया जनता वराकी लुञ्चिता।
किमपरं भो लुञ्चयिष्यथ वदत नेतारो मनाक्॥२४॥

अहह! सज्जनता भवद्भिर्लुण्ठिता व्यापादिता!।
लोकयथ ननु लोकयथ कीर्तिं स्वकीयां रे मनाक्॥२५॥

देशसेवा लुण्ठनापर्यायभूता वो मते।
किं न पश्यथ नैजचरितं? वदत नेतारो मनाक्॥२६॥

विश्ववन्द्यं शान्तिदूतं चैकनीडं यत्सताम्।
भारतं तत्कथं लुञ्चथ, वदत नेतारो मनाक्॥२७॥

भङ्क्थ चित्तं भङ्क्थ वित्तं भङ्क्थ विश्वासं नृणाम्।
किं न नैजं भङ्क्थ गर्द्धं वदत नेतारो मनाक्॥२८॥

चोरयथ जनसौमनस्यं चोरयथ जनजीवनम्।
चोरयिष्यध्वे स्वकीयं भ्रष्टकृत्यं किं मनाक्॥२९॥

किन्नु परवञ्चनविधिज्ञा मातृभूपरितापकाः।
नरकरचनापाटवं वो नो दुनोति मनो मनाक्॥३०॥

यत्र यत्रालोक्यते शान्तिर्भवद्भी रक्षिता।
उप्यते कलहस्य बीजं तत्र, जिह्रीथ न मनाक्॥३१॥

गिरथ कोषं गिरथ पदवीं गिरथ सर्वं सुविधया।
किं स्वतृष्णामपि गरिष्यथ? वदत नेतारो मनाक्॥३२॥

तनुथ देशे सङ्कटं कलहं तथातङ्कं स्वतः।
किं न तनुथ स्वीयचेतसि राष्ट्रभक्तिं रे मनाक्॥३३॥

चिन्तयथ नित्यं स्वकीयं हितमपरिमितमेव रे।
चिन्तयध्वं देशहितमपि लोलुपा यूयं मनाक्॥३४॥

युष्मदीयैर्नित्यकृत्यै राष्ट्रदेवी लज्जिता।
निस्त्रपा जीवथ न मज्जथ चुलुकवारिणि रे मनाक्॥३५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हिंसया अनृतेन पैशुन्येन भवतां जीविका।
कोऽपि सम्बन्धोऽस्ति किं सत्यश्रमाभ्यां वो मनाक्॥36॥

सन्ति ये लालाटिका आस्थाननलिनीका बकाः।
कुत्र युष्मान् पातयेयुश्चिन्तयध्वं रे मनाक्॥३७॥

पादयोः प्रणिपत्य घोणाघर्षणं कृत्वा मुहुः।
याचितं यन्मे मतं तस्यादरं रक्षत मनाक्॥३८॥

दूरदर्शनतन्त्रतो लब्ध्वा विभुत्वं प्रत्यहम्।
भाष्यते यदनर्गलं रे वित्थ तस्यार्थं मनाक्॥३९॥

मनसि वचसि च कर्मणि प्रविरुद्ध्यते यैः प्रतिपलम्।
सन्ति सन्तो वै कियन्तो वोऽतिरिच्य वदत मनाक्॥४०॥

नैककविभिर्नवपुराणैर्यस्य महिमा गीयते।
भारतं तत्किं न रक्षथ, वदत नेतारो मनाक्॥४१॥

यस्य रक्षायै भटा उत्साहिनः खे भुवि जले।
यूयमपि तद्देशरक्षार्थं कुरुत यत्नान् मनाक्॥४२॥

येऽप्यपश्यन्नैकतायामेकतां भारतभुवि।
भवत तेष्वपि भो कृपालव आत्मपूर्वजनृषु मनाक्॥४३॥

'यातु देशो ह्यन्धकूपे रक्षितं स्यान्मे मतम्।'
इति विचारपरम्परां स्वां त्यजत नेतारो मनाक्॥४४॥

चिनुथ यूयं पूर्वजानां दुर्गुणानेव, क्षणम्।
सद्गुणानपि किन्तु तेषां चिनुथ नेतारो मनाक्॥४५॥

किं तुदध्वे राष्ट्रदेवं किं तुदथ देशावनिम्।
संस्कृतिं नः किं तुदध्वे वदत नेतारो मनाक्॥४६॥

किं कृतघ्नैर्लप्स्यते कीर्तिर्यशो वा निस्त्रपैः।
मनसि चिन्तयथ क्वचिद् एकान्त आसीना मनाक्॥४७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शासनासन्दीमवाप्य व्रजत नो गर्वं क्षणम्।
आगते विपरीतकाले कोऽपि रक्षति किं मनाक्॥४८॥

ये समागच्छन्ति भङ्क्तुं वोऽभिमानं द्वारि वः।
किं नु शक्ष्यथ रोद्धुमेतान्? वदत नेतारो मनाक्॥४९॥

किरथ जनसम्मर्दं निरागसमात्मनोऽहङ्कारतः।
किमिति तच्छक्तिं करिष्यथ वदत नेतारो मनाक्॥५०॥

ध्वसितुं मे भारतं यूयं स्थिता यदि तत्पराः।
निश्चितं यूयं विनङ्क्ष्यथ, सावधाना रे मनाक्॥५१॥

प्राक्तना नेतार आसंस्त्यागशीलाः प्रायशः।
अद्यतननेतार आध्वे तत्सदृक्षाः किं मनाक्॥५२॥

ते मृता अपि पूजनीया यैर्हि देशः सेवितः।
जीविता अपि किन्तु यूयं पूजनीयाः किं मनाक्॥५३॥

भारभूता मातृभूमेर्यूयमेतन्मे मतम्।
अत्र किं ब्रूते मनो वो वदत नेतारो मनाक्॥५४॥

अद्य युष्माकं सुकृत्यैर्नित्यनूतनशोभनैः!
लोक्यते यद्दिग्दिगन्तं तद्यशः पश्यत मनाक्॥५५॥

ये कविम्मन्या यशो वो दूषयन्ति धिगस्तु तान्।
न्याय्यमार्गान्न स्वकीयात् प्रविचलत धीरा मनाक्॥५६॥

उपकृतं बहु तत्र किं कथ्येत जीवत रे चिरम्।
कुत्र वो दिव्यं यशः स्वल्पाक्षरा क्व च मेऽत्र वाक्॥५७॥

(रचनातिथिः २९-१०-१९९०)

●

Padma Shri Rama Kanshmula Collection Sadhevani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किं जीवनं ते!

मनसि चिन्तय सखे! किं जीवनं ते!
रहसि शीलय सखे! किं जीवनं ते!

न वा स्वार्थः परार्थो नापि बन्धो!
त्वया चेत्साध्यते, किं जीवनं ते! ॥१॥

न साहित्यं, न सङ्गीतं, कला वा
न रासिक्यं च ते, किं जीवनं ते! ॥२॥

न दाक्षिण्यं, न सौशील्यं, न कीर्तिः
न सेवा, नो दया, किं जीवनं ते! ॥३॥

विपदि धैर्यं, तथाभ्युदये क्षमा नो
न वा युधि विक्रमः, किं जीवनं ते! ॥४॥

गुरोः पित्रोर्न चरणा वन्दिताश्चेत्
अहङ्काकारात्त्वया, किं जीवनं ते! ॥५॥

न कश्चित्प्रेमबन्धे त्वामबध्नात्
वृथाजीविन् सखे! किं जीवनं ते! ॥६॥

त्वया यदि शासनासन्दीमवाप्य
न लोको रञ्जितः, किं जीवनं ते! ॥७॥

अहो दैनन्दिनी मतयाचना ते
वनीयक नेतृवर! किं जीवनं ते! ॥८॥

न निःश्वसितं, न रुदितं, मूर्च्छितं नो
प्रियाविरहे त्वया, किं जीवनं ते! ॥९॥

वियोगे ते जनो नो कोऽपि खिन्नः
न योगे प्रीतिमान्, किं जीवनं ते! ॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनोभावो न निर्द्वन्द्व प्रकटितः
कपटचारिंस्त्वया, किं जीवनं ते! ॥११॥

विषामृतयोर्विवेकं नैव कर्तुम्
त्वमीशश्चेत्तदा किं जीवनं ते! ॥१२॥

न दुष्टास्तर्जिताः स्वीयेन महसा
न सन्तो मानिताः, किं जीवनं ते! ॥१३॥

करालः काल इव नाभासि चेत्त्वम्
कुकृत्यानां कृते, किं जीवनं ते! ॥१४॥

त्वया स्वान्तःसुखार्थं देववाणी
न पठिता, न श्रुता, किं जीवनं ते! ॥१५॥

प्रभुः कर्ता च भर्ता चैव हर्ता
न चेदाराधितः, किं जीवनं ते! ॥१६॥

निपीतं नैव मधु प्रेम्णः कदाचित्
विरस मृल्लोष्ठ रे! किं जीवनं ते! ॥१७॥

न रसिता रसवशात्त्वत्पार्श्वमाप्ता
रहसि काचित्त्वया, किं जीवनं ते! ॥१८॥

वृथा चन्द्रो वृथा मधुयामिनीयम्
न पार्श्वे ते प्रिया, किं जीवनं ते! ॥१९॥

स्वदेशः सेवितो न प्राणपणतः
विकत्थन धूर्त रे, किं जीवनं ते! ॥२०॥

मुखे मधु ते मनसि ते कालकूटः
तृणावृत कूप रे! किं जीवनं ते! ॥२१॥

कृतघ्नत्वं कदाचारः पिशुनता
इमे त्वद्बान्धवाः, किं जीवनं ते! ॥२२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वयं नष्टः परान्नाशयसि नित्यम्
व्यसनशतशालिनः किं जीवनं ते! ॥२३॥

क्षणे रुष्टः क्षणे तुष्टः सखे! त्वम्
अहो चलचित्त रे! किं जीवनं ते! ॥२४॥

मुखे ते मक्षिकाः कुर्वन्ति भिन्-भिन्
न चोड्डाययसि रे! किं जीवनं ते! ॥२५॥

सुरक्षितमस्ति नो पदमपि पलार्थम्
अहो मन्त्रिप्रवर! किं जीवनं ते! ॥२६॥

प्रदर्शन - गालिका - कार्यावरोधैः
अहो प्राचार्यवर! किं जीवनं ते! ॥२७॥

प्रकृत्यङ्के न ते क्रीडा बभूव
सदा हर्म्यस्थ रे! किं जीवनं ते! ॥२८॥

न दुग्धं माहिषं व्यायामिनस्ते
(पयो गव्यं न चेद् व्यायामिनस्ते)
सुलभमास्तेऽन्वहं! किं जीवनं ते! ॥२९॥

न चेत् पार्श्वे सखे ते स्वास्थ्यवित्तम्
धनैरेतैरलं, किं जीवनं ते! ॥३०॥

उपायैस्तैश्च तैर्धृतमपि मनस्ते
प्रियां नोपैति चेत् किं जीवनं ते! ॥३१॥

उपालम्भो न चानुनयोऽपि तुभ्यं
अहो प्रणयिन् युवक! किं जीवनं ते! ॥३२॥

तवागमने तथा गमने न चर्चा
वराक प्राघुणिक! किं जीवनं ते! ॥३३॥

परोक्षे शत्रुभिर्मित्रैस्तटस्थैः
न चेच्छ्लाघ्योऽसि रे, किं जीवनं ते! ॥३४॥

Prof. Shri Rama Kant Shukla Collection at Deva Kam Ranshad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अयं श्रोता न बोधति भाषणं ते
अनर्गलजल्पिनः किं जीवनं ते! ॥३५॥

न दीनाः सेविताः शुद्धेन मनसा
कुनेतृ न्! सेवसे, किं जीवनं ते! ॥३६॥

न माता जन्मभूर्बन्धो! मता चेत्
किमेतेनायुषा, किं जीवनं ते! ॥३७॥

न दृष्टं भारतं स्निग्धेन मनसा।
अहो विश्वभ्रमिन्! किं जीवनं ते! ॥३८॥

कृपेशस्याशिषो यदि वा गुरूणाम्।
न लब्धा जीवने, किं जीवनं ते! ॥३९॥

त्वयार्वाचीनसंस्कृतमपि न पठितम्?
न दूर्वालोकिता? किं जीवनं ते! ॥४०॥

रमाकान्तोऽभिराजो वा रथो वा।
श्रुतो यदि न त्वया, किं जीवनं ते! ॥४१॥

(रचनातिथिः २९.३.१९९१)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वन्दनीयास्ते

इयं स्वर्गाधिका मे मातृभूमिर्वन्दनीयास्ते।
परं यास्या दशाद्यत्वे, कथय किं वन्दनीयास्ते? ॥१॥

चतुर्दिक् दृश्यते यासौ प्रगतिरभिनन्दनीयास्ते।
चतुर्दिक् दुःस्थितिर्यालोक्यते, किं वन्दनीयास्ते? ॥२॥

जना ये भारतं पुष्णन्ति, नित्यं वन्दनीयास्ते।
अथो तत्पांसुलं कुर्वन्ति ये, किं वन्दनीयास्ते? ॥३॥

जना एकत्वसूत्रे यैर्निबद्धा वन्दनीयास्ते।
जनान् ये योधयन्ति प्रत्यहं किं वन्दनीयास्ते ॥४॥

अभिघ्नन्तो रिपून् युद्धे चलन्तो वीरगत्याग्रे।
दिवं ये देशरक्षार्थं प्रयाता वन्दनीयास्ते ॥५॥

न ये देशस्य किन्तु स्वीयवंशस्यैव दारिद्र्यम्।
अपाकर्तुं यतन्ते नेतृवर्या वन्दनीयास्ते?॥६॥

अतस्मिंस्तस्य बुद्धिं ये दधाना वन्दनीयास्ते।
पुनर्ये तत्र तद्बुद्धिं दधति, नो वन्दनीयास्ते?॥७॥

नहि प्रत्यक्षमनुमानं न शाब्दं नेषदुपमानम्।
प्रमाणं मन्यते या सा मतिः किं वन्दनीयास्ते? ॥८॥

चिरान्निटिले य आसीत् स्थापितः केनापि साहङ्कृति।
कलङ्को मार्जितोऽसौ यैर्न केषां वन्दनीयास्ते ॥९॥

करामलकं न पश्यन्ती खपुष्पं चैव पश्यन्ती।
असौ लोकोत्तरा दृष्टिः सखे! ते वन्दनीयास्ते? ॥१०॥

पुरा दुर्भावनादीप्तिस्ततः सद्भावनायात्रा!
इयं नीतिर्मता येषां जना नो वन्दनीयास्ते ॥११॥

Padma Shri Rama Kant Shukla Collection at Devarshi Rankhad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रजासु प्रत्यहं कलहं विवर्धयसे स्वपोषार्थम्!
इयं वृत्तिः सखे नेतस्त्वदीया वन्दनीयास्ते ॥१२॥

अहिंसाचत्वरे हिंसा, सहिष्णुत्वाजिरे द्वेषः।
क्वचिद् गृहयुद्धघोषः, किं दशेयं वन्दनीयास्ते? ॥१३॥

अहो राष्ट्रध्वजं गणतन्त्रदिवसं ये बहिष्कुर्युः।
किमेते भारतीयाः? भारतीयैर्वन्दनीयास्ते? ॥१४॥

प्रियं सत्यं हितं सारं वचो या वक्ति सा वाणी।
न ते वन्द्या, परं विपरीतवक्त्री वन्दनीयास्ते? ॥१५॥

यमेवारुह्य यात्रां कुर्वते पारं प्रयातुं तम्।
प्लवं विच्छेत्तुकामा बालिशा ये, वन्दनीयास्ते? ॥१६॥

चतुर्दिक् दन्दशूका निर्भयाः फूत्कुर्वते लोके।
गरुत्मन्! मौनवृत्तिस्ते किमेषा वन्दनीयास्ते? ॥१७॥

परीते वह्निना देशे ज्वलति धूधूधधग्धगिति।
असौ तूष्णीकृता ते किं मनागपि वन्दनीयास्ते॥१८॥

न जाने केन सन्दीप्तात्र हिंसा ताण्डवं कुरुते।
करे धृत्वा करं ये संस्थिताः, किं वन्दनीयास्ते? ॥१९॥

इयं हिंसासुरी व्याप्नोति हा! देशं समस्तं मे।
इयं दैनन्दिनी शोच्या स्थितिः किं वन्दनीयास्ते? ॥२०॥

उपद्रविणां कृते शस्त्रास्त्रसङ्घातोऽन्यदेशीयः।
कथं देशे प्रविष्टः? किं सुरक्षा वन्दनीयास्ते? ॥२१॥

उपद्रविभिः कृता निर्दोषनृणां जीवतां दाहाः।
इमे रुधिरप्रवाहाः किं प्रशासक! वन्दनीयास्ते? ॥२२॥

रमन्ते साङ्ख्यपुरुषाभा जनाः स्वासन्दिकायां ये।
अकर्तारश्च पश्यन्तोऽखिलं, नो वन्दनीयास्ते ॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जनं विनिपात्य दुर्घोरेऽसुरक्षावह्निकुण्डे ये।
सुरक्षामण्डले गुप्ता रमन्ते, वन्दनीयास्ते? ॥२४॥

क्वचिद्ये धर्मनिरपेक्षाः क्वचिद्धर्मस्य वक्तारः।
क्वचिद्धर्मावतारा नायका नो वन्दनीयास्ते? ॥२५॥

'कथं निर्वाचने भाविन्यहं विजयी भवामी'ति।
इदं येषां परं लक्ष्यं, न केषां वन्दनीयास्ते! ॥२६॥

पदं मद्यं धनं मानं यशो लब्धुं मृषा ब्रुवते।
वराका 'बुद्धिजीवी' सञ्ज्ञका ये, वन्दनीयास्ते! ॥२७॥

तिलं ताडं, समुद्रं गोष्पदं, मेरुं कणं कर्तुम्।
समर्था आसते ये सूचनादाः, वन्दनीयास्ते! ॥२८॥

अहिंसा सत्यमुपकारः श्रमः प्रेमा मतो धर्मः।
अतो ये सन्ति निरपेक्षा इदानीं वन्दनीयास्ते! ॥२९॥

यया नीत्या समे सद्भावसूत्रे गुम्फिता न स्युः।
असौ नीतिः किमस्माकं समेषां वन्दनीयास्ते? ॥३१॥

नरे शठतां दधाना सत्कृतिं दूरे प्रकुर्वाणा।
इयं या राजनीतिर्दूरतो मे वन्दनीयास्ते! ॥३१॥

इमे प्राक्पादयोः पतितास्तदनु ये पृष्ठमांसादाः।
खला मशका इवासृक्चूषका नो वन्दनीयास्ते! ॥३२॥

यदीच्छसि भद्र! भद्रं दुर्जनान् वन्दस्व नित्यं त्वम्।
अरे! ये सज्जनास्ते सज्जनाः, किं वन्दनीयास्ते! ॥३३॥

प्रजाशिक्षासुरक्षाभरणरूपं स्वीयकर्तव्यम्।
न पालयितुं समर्थाः शासकाः, किं वन्दनीयास्ते? ॥३४॥

क्वचिद्वित्तीयघोटालाः, क्वचित्क्रयविक्रयोत्कोचाः।
क्वचिच्चान्ये ह्यवाच्या येऽप्युदन्ता वन्दनीयास्ते? ॥३५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कदाचित्खाडकूचर्चा कदाचिज्जङ्गजूचर्चा।
इयं या दुर्दशालोक्या किमेषा वन्दनीयास्ते? ॥३६॥

न यद्दातुं समर्थस्तत्कृते कुरुषे प्रतिज्ञां त्वम्!
अपूर्या किं प्रतिज्ञा तावकीना वन्दनीयास्ते? ॥३७॥

अहो पूजास्थलं निर्मासि, पूजां नैव कुरुषे त्वम्!
कथय भक्तप्रवर! ते भक्तिरेषा वन्दनीयास्ते? ॥३८॥

ययोद्गिरतो विषं स्वस्मिन्निमान् कुम्भीनसान् सहसे!
अये चन्दनतरो! सैषा धृतिस्ते वन्दनीयास्ते। ॥३९॥

अये पञ्चानन! त्वां कुक्कुरोऽयं प्रत्यहं निन्दति।
सहानेन त्वदीया मित्रता किं वन्दनीयास्ते? ॥४०॥

कवेर्व्याजोक्तिरन्योक्तिः स्वभावोक्तिश्च वक्रोक्तिः।
अनुक्त्वा किञ्चिदपि सर्वं भणन्ती वन्दनीयास्ते॥ ॥४१॥

जना देशस्य रक्षार्थं तथा विश्वस्य कुशलार्थम्।
यतन्ते ये न निजकृत्यैः, कथय किं वन्दनीयास्ते? ॥४२॥

नरा नार्योऽबलाः सबलाः कनिष्ठा मध्यमा ज्येष्ठाः।
स्वदेशंये न वन्दन्ते मताः किं वन्दनीयास्ते? ॥४३॥

स्वदेशं निन्दयन्तो विश्वबन्धुत्वस्य वक्तारः।
फलं काङ्क्षन्ति ये मूलं विना, नो वन्दनीयास्ते! ॥४४॥

यजन्ते ये विधानोक्तैः स्वकर्मभिरात्मजन्मभुवम्।
नराः कुत्रापि निवसन्तो न केषां वन्दनीयास्ते? ॥४५॥

बुधा वीराः कृषाणाः कार्मिका उद्योगिनः कवयः।
कालाकाराः स्वदेशोन्नायका ये वन्दनीयास्ते। ॥४६॥

निबद्धास्ताडिता निहता तथा विकलाङ्गतां याताः।
जना ये देशरक्षार्थं, न केषां वन्दनीयास्ते? ॥४७॥

Padma Shri Rama Kant Shukla Collection at Deen Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जना ये मातृभूमेर्वन्दनार्थं वन्दिनो जाताः।
स्मितास्याः कालपाशं ये चुचुम्बुर्वन्दनीयास्ते! ॥४८॥

अये मे मातृभूमे! ते महिम्नो रक्षणार्थं ये।
बलिं चक्रुः स्वसर्वस्वं, न केषां वन्दनीयास्ते? ॥४९॥

जननि! ये त्वां नराः क्षतविक्षतां कर्तुं समीहन्ते।
कृतघ्नाः कस्य वा पापीयसो वद वन्दनीयास्ते? ॥५०॥

अयं स्वातन्त्र्यसहकारः सदा सफलः समृद्धः स्यात्!
स्वरक्तैः सेचितोऽयं यैर्न केषां वन्दनीयास्ते? ॥५१॥

रमाकान्त! व्यथां देशस्य विश्वस्याथ निजकृत्यैः।
जना ये वर्धयन्ति प्रत्यहं किं वन्दनीयास्ते? ॥५२॥

न शब्दो नैव चार्थो न ध्वनिर्नैवास्त्वलङ्कारः।
तथापीयं कवे! कविता त्वदीया वन्दनीयास्ते! ॥५३॥

(रचनापूर्तितिथिः १४.१.१९९३ ई.)

●

Padma Shri Rama Kant Shukla Collection at Deep Vani Parisar Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मदीयकविते! कुरुष्व गानम्

सरस्वतीपादपद्मसेवा
यदीयमास्ते परं हि लक्ष्यम्।
बुधाग्रगाणामतन्द्रितानां
मदीयकविते! कुरुष्व गानम्॥१॥

कदापि वागर्थनाम येषां
प्रयुक्तमस्त्रं वृथा न हि स्यात्।
अलोकसामान्यसत्कवीनां
मदीयकविते! कुरुष्व गानम्॥२॥

स्वरश्रुतिग्रामरागबन्धै-
रपूर्वसृष्टेः सुसर्जकाणाम्।
शुभाय सङ्गीतसाधकानां
मदीयकविते! कुरुष्व गानम्॥३॥

मृदाश्मना काष्ठखण्डकैर्वा
सृजन्ति ये नूतनां स्वजगतीम्।
यशस्विनां शिल्पिनां हि तेषां
मदीयकविते! कुरुष्व गानम्॥४॥

सुखं धनं स्नेहबन्धनानि
स्वदेशसौख्याय ये त्यजन्ति।
हुतात्मनां नित्यमेव तेषां
मदीयकविते! कुरुष्व गानम्॥५॥

परोपकारव्रतं पवित्रं
सदैव ये पालयन्ति हृष्टाः।
सुपूजितानां नृणां हि तेषां
मदीयकविते! कुरुष्व गानम्॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निजोपदेशैर्मनोऽन्धकारं
विधूय ये शिष्यसन्ततीनाम्।
जयन्ति, तेषां मुदा गुरूणां
मदीयकविते! कुरुष्व गानम्।।७।।

स्वतन्त्रतायज्ञदीक्षितानां
चिराय कारासु पीडितानाम्।
मृतिंवराणां नरोत्तमानां
मदीयकविते! कुरुष्व गानम्।।८।।

रिपोः करान्मोचयाम्बभूवुः
स्वमातरं भारतावनिं ये।
विशिष्य तेषां नृणां समेषां
मदीयकविते! कुरुष्व गानम्।।९।।

मनुष्यतां रक्षितुं स्वयत्नै-
रनुक्षणं शोधतत्पराणाम्।
प्रबुद्धवैज्ञानिकव्रजाणां
मदीयकविते! कुरुष्व गानम्।।१०।।

सहर्षस्त्रशीर्षं सहस्त्रहस्तं
सहस्त्रपादं जनं भजन्तः।
समुद्यमा ये लसन्ति तेषां
मदीयकविते! कुरुष्व गानम्।।११।।

विषह्य शीतोष्णवर्षकष्ट-
प्रकोपमप्यन्नदायकानाम्।
तपस्विनां क्षेत्रकर्षकाणां
मदीयकविते! कुरुष्व गानम्।।१२।।

उदन्वदाकाशपर्वतेषु
स्वदेशरक्षाव्रतस्थितानाम्।
रणोद्भटानां मुदा भटानां
मदीयकविते! कुरुष्व गानम्।।१३।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विभिन्नखेलासु कीर्तिमानैः
स्वदेशसम्मानवर्धकाणाम्।
जितेन्द्रियाणां प्रशस्ययूनां
मदीयकविते! कुरुष्व गानम्॥१४॥

प्रसन्नवक्त्राः सदासते ये
दरिद्रतायामपि प्रकामम्।
विशिष्य तेषां श्रमव्रतानां
मदीयकविते! कुरुष्व गानम्॥१५॥

स्वकीयचरितैर्मनस्सु पित्रोः
प्रकामसन्तोषदायका ये।
सुता जगद्भूषणानि, तेषां
मदीयकविते! कुरुष्व गानम्॥१६॥

असज्जनानां कुनायकानां
कृतघ्न - दुर्वृत्त - वञ्चकानाम्।
विहाय चर्चां, मनस्विनां त्वं
मदीयकविते! कुरुष्व गानम्॥१७॥

सदा प्रजातन्त्ररक्षकाणां
स्वकार्यनिर्वाहतत्पराणाम्।
प्रदर्शकाणां सृतेरभीते-
मदीयकविते! कुरुष्व गानम्॥१८॥

स्वपाणिपल्लवमुदारकल्पं
न कुत्रचिद् ये प्रसारयन्ति।
नृणां सदायाचितव्रताणां
मदीयकविते! कुरुष्व गानम्॥१९॥

कुरीतयो वा कुनीतयो वा
जगत्यनिष्टं प्रपूरयन्त्यः।
विलोपिता यैः, सभक्ति तेषां
मदीयकविते! कुरुष्व गानम्॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वकीयवर्णं स्वरं भविष्णुं
विधातुकामासि? तर्हि नूनम्।
तपोधनानां जगद्गुरूणां
मदीयकविते! कुरुष्व गानम्॥२१॥

'सदैव सर्वे भवन्तु सुखिनः
सदैव सर्वे निरामयाः स्युः।'
मनोरथस्यास्य पोषकाणां
मदीयकविते! कुरुष्व गानम्॥२२॥

कुटुम्बमेकं जगद्विधातुं
जनाः सदा ये प्रयत्नशीलाः।
प्रहृष्य तेषां महात्मनां त्वं
मदीयकविते! कुरुष्व गानम्॥२३॥

यदीच्छसि त्वं जनिं स्वकीयां
सदर्थितां कर्तुमार्यशीले!
तदा महिम्नां स्वमातृभूमे-
र्मदीयकविते! कुरुष्व गानम्॥२४॥

अमन्दमानन्दमाप्तुकामा
परेशलीलाब्धिमौक्तिकानाम्।
कदाचिदेकान्तवासमाप्ता
मदीयकविते! कुरुष्व गानम्॥२५॥

(रचनातिथिः २६-१२-१९९३)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वन्द्यतां काऽपि सा शासनासन्दिका

(१)

जन्मजन्मान्तरीयं स्वकीयं परं
वैरभावं परित्यज्य यस्या वशात्।
एकतां यान्ति नेतार एकक्षणे
वन्द्यतां काऽपि सा शासनासन्दिका॥

(२)

'वर्तमानार्थनीतिः परित्यज्यताम्'
नैकशो यैरिदं वाक्यमुद्घोषितम्।
तेऽपि यल्लीलया तां भणन्त्युत्तमां
वन्द्यतां काऽपि सा शासनासन्दिका॥

(३)

यां विधातुं करस्थां न किं किं कृतं
चातुरीभ्राजितैर्नेतृवर्यब्रुवैः।
यां समासाद्य विस्मर्यते तैर्जनो
वन्द्यतां काऽपि सा शासनासन्दिका॥

(४)

लक्षकोट्यर्बुदानामहो वञ्चनं
शान्तभावेन यां प्राप्य कर्तुं क्षमम्।
यां श्रितैश्छन्ददात्री प्रजा पीड्यते
वन्द्यतां काऽपि सा शासनासन्दिका॥

(५)

दूषणोद्घोषणं सद्गुणानां चये
सद्गुणोद्घोषणं दुर्गुणानां चये।
यत्प्रभावाद्विधातुं सुशक्यं भवेद्
वन्द्यतां काऽपि सा शासनासन्दिका॥

(६)

वञ्चनं मित्रघातस्तथा दस्युता
निस्त्रपत्वं कृतघ्नत्वमित्यादयः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दुर्गुणाः वन्द्यतां यान्ति सद्यो यया
वन्द्यतां काऽपि सा शासनासन्दिका॥

(७)

धर्मकामार्थमोक्षोपदेशाकराः
सर्वविद्याचणाः सत्कलाचुञ्चवः।
अक्षरज्ञानशून्या अपि स्युर्यया
वन्द्यतां काऽपि सा शासनासन्दिका॥

(८)

देशसेवां विधातुं य आयान्त्यहो
तेऽन्यथाभावमाप्ता न किं कुर्वते।
यामधिष्ठातुकामा अधिष्ठाय वा
वन्द्यतां काऽपि सा शासनासन्दिका॥

(९)

यं स्वतन्त्रं विधातुं हुतं जीवनं
देशभक्तैरसंख्यैर्विलम्बं विना।
तस्य देशस्य चिन्ताऽपि हेया यया
वन्द्यतां काऽपि सा शासनासन्दिका॥

(१०)

पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः
सर्वकैरेव याद्यत्व आराध्यते।
सर्वसौख्यप्रदात्री समेषां नृणां
वन्द्यतां काऽपि सा शासनासन्दिका॥

(११)

केनचिद् दृश्यतामस्मदीया दशा
स्थापिता मूर्ध्नि येऽस्माभिरुत्साहिभिः।
हन्त! तैरेव वञ्च्यामहे यद्वशात्
वन्द्यतां काऽपि सा शासनासन्दिका॥

रचनातिथिः २६-६-१९९५)

●

Panma Shri Rama Kant Shukla Collection. Adeva by eGangotri Paushpadhuttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लोकतन्त्रेऽस्मिन्

अकल्प्यं किं न घटते
भावगम्ये लोकतन्त्रेऽस्मिन्।
भवति किं, किं भविष्यति वा
न जाने लोकतन्त्रेऽस्मिन्॥१॥

महामात्यत्रयं दृष्टम्
मुहुर्निर्वाचनं घुष्टम्।
अहो स्वातन्त्र्यहेमाब्दे
किमेतल्लोकतन्त्रेऽस्मिन्॥२॥

मयूरव्यालशालूराः
स्वकीयं काङ्क्षितं लब्धुम्।
स्थिता एकत्र गतवैरा
महिष्ठे लोकतन्त्रेऽस्मिन्॥३॥

विडाला मूषकैस्साकं
वृका हरिणैस्समं मैत्रीम्।
प्रकुर्वाणा विलोक्यन्ते
पदार्थं लोकतन्त्रेऽस्मिन्॥४॥

समीहितसिद्धये श्लिष्टाः
सुताः कुन्त्याश्च गान्धार्याः।
महाभारतकथेयं
काप्यपूर्वा लोकतन्त्रेऽस्मिन्॥५॥

अहो हैयङ्गवीनं सख्य-
मिच्छत्यग्निना साकम्।
कदल्या मित्रता दृष्टा
बदर्या लोकतन्त्रेऽस्मिन्॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इमे काका उलूकैः सार्ध-
मिच्छन्ति स्वसम्बन्धम्।
तितउना वारिमैत्रीं पश्य
बन्धो! लोकतन्त्रेऽस्मिन्॥७॥

तमस्तेजश्च मित्रे स्तः
हयानां सैरिभैः सख्यम्।
अजव्याघ्रौ सखायौ स्तः
प्रकृष्टे लोकतन्त्रेऽस्मिन्॥८॥

विधुन्तुदचन्द्रयोः प्रीतिः
पयोजम्बीरयोः प्रीतिः।
अजानां कौटिकैः प्रीति-
र्विलोक्या लोकतन्त्रेऽस्मिन्॥९॥

तमस्तेजो दिनं रात्रिः
सुधा विषमन्धता दृष्टिः।
अहो पर्यायतां प्राप्ता
विरुद्धा लोकतन्त्रेऽस्मिन्॥१०॥

शृणुध्वं रे सुबद्धं
भक्ष्यभक्षकसख्यमिह लोके।
विपत्तेः कारणं नास्ते
सुपूज्ये लोकतन्त्रेऽस्मिन्॥११॥

अयं योऽस्त्यस्मदाशानां
प्रतीकः प्रतिनिधिः सदने।
स आशामस्मदीयां
पूरयति नो लोकतन्त्रेऽस्मिन्॥१२॥

किमपि कर्तुं तथाऽकर्तुं
तथा चैवान्यथा कर्तुम्।
विदूषकसन्निभो नेता
प्रभुर्वै लोकतन्त्रेऽस्मिन्॥१३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मतं यल्लोकतन्त्रं
शासनं नृणां नृभिर्नृभ्यः।
विलीनं तत्क्व सञ्जातं
प्रचण्डे लोकतन्त्रेऽस्मिन्॥१४॥

क्वचिच्चास्त्रीभवति सदने
ध्वनेर्विस्तारकं यन्त्रम्।
सदस्याः कान्दिशीका हन्त!
दृष्टा लोकतन्त्रेऽस्मिन्॥१५॥

अहो! युद्धाजिरं जातं
सभाभवनं तु नेतृणाम्।
विधायक एव पण्याश्वी-
भवति हा! लोकतन्त्रेऽस्मिन्॥१६॥

कदाचिद्धावनं दलतः
कदाचिन्नूलदलघटनम्।
कदाप्यपवञ्चनाकाण्डं
विलोकय लोकतन्त्रेऽस्मिन्॥१७॥

करौ बद्ध्वा मुखे दत्वा
तृणं नत्वा शिरः स्वीयम्।
वृकाः काङ्क्षन्ति मेषाणां
मतं बत लोकतन्त्रेऽस्मिन्॥१८॥

क्षणे रोषः क्षणे तोषः
क्षणे त्यागः क्षणे ग्रहणम्।
क्षणे निन्दा क्षणे स्तुतयो
मतार्थं लोकतन्त्रेऽस्मिन्॥१९॥

न कश्चित्कस्यचिन्मित्रं
न कश्चित्कस्यचिच्छत्रुः।
मतार्थं शात्रवं मैत्री
भवति भो! लोकतन्त्रेऽस्मिन्॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्वचिद्दानी क्वचिद्भिक्षुः
क्वचिच्छिष्टः क्वचिद्धृष्टः।
क्वचिद् ह्रीणोऽथ निर्लज्जो
मतार्थी लोकतन्त्रेऽस्मिन्॥२१॥

जनैर्दत्तं मतं यस्मै
प्रतार्यास्तेन ते जाताः।
स्वतन्त्रं भारतं किं किं
न पश्यति लोकतन्त्रेऽस्मिन्॥२२॥

अहो जनताजनार्दन-
पूजनं यस्यास्ति कर्तव्यम्।
स नेता वञ्चनं कुरुते
जनानां लोकतन्त्रेऽस्मिन्॥२३॥

अये म्याऊंकरोत्येषा
कथं मामेव मार्जारी।
मदीया पालिता यास्ते
कृतघ्ना लोकतन्त्रेऽस्मिन्॥२४॥

कलासाहित्यसङ्गीत-
प्रहीणो ना तृणं खादति।
पशूनां भागधेयं यद्
हरे! शृणु लोकतन्त्रेऽस्मिन्॥२५॥

वहन्तः स्वं ध्वजं चिह्नं
करौ बद्ध्वा मतं लब्धुम्।
वनीयक-कर्मनिष्णाता
भ्रमन्ते लोकतन्त्रेऽस्मिन्॥२६॥

कथं बन्धो मतं दास्यसि
भयं त्यक्त्वा स्वके क्षेत्रे।
वृतः पाटच्चरैर्मतदान-
केन्द्रे लोकतन्त्रेऽस्मिन्॥२७॥

Padma Shri Rama Kant Shukla Collection at Deva Kant Baruah Centre, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विकासोऽप्यद्भुतो जातो
विनाशोऽप्यद्भुतो जातः।
प्रकाण्डा काण्डसन्तति-
रीक्ष्यते बत लोकतन्त्रेऽस्मिन्॥२८॥

अयोग्याः प्रोन्नतिं प्राप्ताः
सुयोग्या अवनतिं नीताः।
सतामपवञ्चनं प्रायो
विलोक्यं लोकतन्त्रेऽस्मिन्॥२९॥

कथं भो मन्यसे देशं
धनं पित्र्यं विभज्याद्यम्।
त्वया नेतः! कृता का वास्य
सेवा लोकतन्त्रेऽस्मिन्॥३०॥

मनस्यन्यद् वचस्यन्यत्
तथान्यत्कर्मणि स्वीये।
दधानः प्रायशो लोकस्य
नेता लोकतन्त्रेऽस्मिन्॥३१॥

कुतो निजसंस्कृतेश्चिन्ता
कुतो देशस्य वा चिन्ता।
पदस्थाश्चिन्तयन्ति स्वां
समृद्धिं लोकतन्त्रेऽस्मिन्॥३२॥

विदूषककर्म कुर्वाणा
जनान् ये वञ्चयन्त्यनिशम्।
त एवाद्यासते मान्या-
स्तथाप्ता लोकतन्त्रेऽस्मिन्॥३३॥

'जयो मे दक्षिणे हस्ते
जयो मे वामहस्ते च।'
दलं हित्वा भणति चतुरः
प्रवीरो लोकतन्त्रेऽस्मिन्॥३४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सरस्वत्या मरालो
लुञ्च्यते लक्ष्म्या उलूकेन।
पिका मौनं भजन्ते
काकभीता लोकतन्त्रेऽस्मिन्॥३५॥

बलात्कारा नृहत्या
बम्बविस्फोटास्तथा दाहाः।
अहो दैनन्दिनी वार्ताऽ
स्मदीये लोकतन्त्रेऽस्मिन्॥३६॥

इयं देवी प्रतारण-चातुरी
भ्रष्टावने दक्षा।
मता नृपनीतिसञ्ज्ञा
वन्दनीया लोकतन्त्रेऽस्मिन्॥३७॥

पुनस्ते मे मतं काङ्क्षन्ति
यैरेवास्मि परिमुषितः।
अहो! निर्लज्जतेयं कीदृशी
ननु लोकतन्त्रेऽस्मिन्॥३८॥

मतं मे काङ्क्षमाणा ये
पुनर्मे द्वारि सम्प्राप्ताः।
कथं तेषां प्रियं कुर्याम्
न जाने लोकतन्त्रेऽस्मिन्॥३९॥

शकाराणां विकारा
जृम्भमाणा नित्यमीक्ष्यन्ते।
विपन्नाश्चारुदत्ताः
किञ्च धूता लोकतन्त्रेऽस्मिन्॥४०॥

महर्घत्वं निधायाङ्के
सरत्यग्रे नवं वर्षम्।
शुभेच्छा मामकीनाः स्यु-
र्भवद्भ्यो लोकतन्त्रेऽस्मिन्॥४१॥

Padma Shri Rama Kant Shukla Collection at Devayan Sadan Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कटूक्तीः प्रत्यहं कुर्वे
समीक्षाः प्रत्यहं कुर्वे।
न रिङ्गति कस्यचित्कर्णे
ऽपि यूका लोकतन्त्रेऽस्मिन्॥४२॥

महाकाव्यान्यपेक्ष्यन्ते
यदीयं सद्यशो गातुम्।
मदीयैः सीमितैः शब्दै-
र्भवति किं लोकतन्त्रेऽस्मिन्॥४३॥

प्रसिद्धिं लम्भिताः खल-
नायकाः खलु नायकत्वेन।
विपर्यर्यमीदृशं त्वं
पश्य बन्धो! लोकतन्त्रेऽस्मिन्॥४४॥

इदं दाहात्मकं तेजः
सुगूढं यन्नृणामन्तः।
मदान्धाः! किं न पश्यत रे?
वदत भो लोकतन्त्रेऽस्मिन्॥४५॥

(रचनातिथिः २०.१.१९९८)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतस्य विजयोऽयम्

(१)

"क्रुद्धं हिंसाबलं जितं किल सत्याहिंसाबलतः।
आङ्ग्लशासनं खलूच्चाटितं भारतस्य विजयोऽयम्॥

(२)

पञ्चषष्टितम (१९६५) वर्षेऽस्माकं पश्चिमोत्तरे वीराः।
पदचर्यया गता लाहौरं, भारतस्य विजयोऽयम्॥

(३)

एकसप्ततौ दिसम्बरे किलं नवतिसहस्त्रं पाकाः।
बद्धा निरागसां हन्तारो, भारतस्य विजयोऽयम्॥

(४)

वारद्वयं पोखरणगर्भे ह्यणुविस्फोटपरीक्षा।
स्वीयसाधनैः सफला जाता, भारतस्य विजयोऽयम्॥

(५)

अग्निनागप्रभृतीन्यस्त्राणि प्रोद्भासन्तेऽस्माकम्।
तर्जयन्ति वैरिणः प्रतिपलं, भारतस्य विजयोऽयम्॥

(६)

अवतारिता युद्धपोताः सागरवक्षसि सोत्साहम्।
आत्मरक्षणं विदधति वीराः, भारतस्य विजयोऽयम्॥

(७)

मा चिन्तां कुरु रमाकान्त! सागरे वियति भूपृष्ठे।
निस्तन्द्रा जाग्रति वीरास्ते, भारतस्य विजयोऽयम्'॥

(८)

'द्रासबटालिककककसरमश्कोभागा अस्मद्वीरैः।
यथा रक्षिता शत्रोर्हस्तात्, भारतस्य विजयोऽयम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(९)

भातृभूमिरक्षार्थं वीराः वीरगतिं लब्ध्वा यत्।
रविमण्डलभेदनं चक्रिरे भारतस्य विजयोऽयम्॥

(१०)

वायुसैनिका धरासैनिका सन्नायका भटानाम्।
स्थास्यन्तीमे सदा प्रणम्या भारतस्य विजयोऽयम्॥"

(११)

"भ्रातश्चिन्तां नो कुर्वेऽहं किन्तु कामयेऽप्यन्यत्।
पश्य कीदृशो मया काम्यते भारतस्य विजयोऽयम्॥

(१२)

भ्रष्टाचारो महार्घता आतङ्कवाद उत्कोचः।
निर्धनता यदि पराजिताः स्युर्भारतस्य विजयोऽयम्॥

(१३)

वृत्तिहीनता विघटनवृत्तिर्जनतामूढीकारः।
जिताः पूर्णतो यदि, पूर्णः स्याद्भारतस्य विजयोऽयम्॥

(१४)

यदि च विदूषकनिभा नायका जनतां नो लुण्ठेयुः।
धर्मजातिभाषाविभेदतो भारतस्य विजयोऽयम्॥

(१५)

बाह्यमान्तरं प्रदूषणं नो नागरिकान् बाधेत।
अभयं यदि तेषां हृदि विलसेद्भारतस्य विजयोऽयम्॥

(१६)

शिक्षा स्वास्थ्यं क्रीडाभ्यासो देशभक्तिरविचलिता।
सम्पूर्णेषु जनेषु भवेद्यदि भारतस्य विजयोऽयम्॥

(१७)

क्षेत्रेषु स्यात्सस्यबहुलता कारक्षेषूत्पादः।
प्रतिहस्तं स्याद्वृत्तियुक्तता, भारतस्य विजयोऽयम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१८)

पठतु जनो यां कामपि भाषां किन्तु राष्ट्रभाषां प्रति।
नैवोपेक्षां यदा धारयेत्, भारतस्य विजयोऽयम्॥

(१९)

विज्ञानं साहित्यं वाणिज्यं कृषिशिल्पोद्योगाः।
आध्यात्म्यं कलाश्च जृम्भन्ताम्, भारतस्य विजयोऽयम्॥

(२०)

वेषभूषयोपासनपद्धत्याशनेन संस्कारैः।
भिन्ना अप्येकतां भजेयुर्भारतस्य विजयोऽयम्॥

(२१)

स्वतन्त्रतां यः कामयते सम्पूर्णजगद्देशानाम्।
सदा वर्धताम् सदा राजताम् भारतस्य विजयोऽयम्॥

(इयं रचना दिल्ली-संस्कृत-हिन्दी-सिन्धी-पञ्जाब्युर्द्वकादमीभिः दिल्लीस्थे 'शाह-आडिटोरियमे'-त्यभिधे सभाभवने १६-१२-१९९८ तारिकायां समायोजिते 'विजय-दिवसे' पठितासीत्)

(रचनातिथिः १६-१२-१९९८, ८-१० पद्यानि ४.७.१९९९)

●

Padma Shri Rama Kant Shukla Collection at Devayanee Foundation Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रणम्याः कारगिलवीराः

जयन्त्येतेऽस्मदीया गौरवाङ्काः कारगिलवीराः[१]।
समर्च्या आसतेऽस्माकं प्रणम्याः कारगिलवीराः॥१॥

मई-षड्विंशदिवसादैषमो मासद्वयं यावत्।
अघोषित-पाक-रण-जयिनो[2]ऽभिनन्द्याः कारगिलवीराः॥२॥

अकस्मात्प्राविशन्नस्मद्गृहे गूढप्रवेशा ये।
स्वदेशात्तान् बहिष्कर्तुं प्रचेलुः कारगिलवीराः॥३॥

परित्राणाय साधूनां विनाशार्थं च दुष्टानाम्।
समारम्भं द्रुतं चक्रुः प्रणम्याः कारगिलवीराः॥४॥

बटालिग्-द्रास-मश्को-ककसरक्षेत्रेषु लीनानाम्।
रिपूणां दुर्दशां चक्रुः समिद्धाः कारगिलवीराः॥५॥

जुबर-थारू-कुकुरथाङ्-तुर्तुकाख्येभ्योऽद्रिशिखरेभ्यः।
तुलालिङ्गात्तथा शत्रूनतौत्सुः कारगिलवीराः॥६॥

दिशन्तो दुर्विपाकं पाककितवानां प्रयाणैः स्वैः।
जगर्जुर्दुर्गमक्षेत्रे कृतान्ताः कारगिलवीराः॥७॥

अवाक्षुस्ते शतघ्नीः स्वीयहस्तैरेव सोत्साहम्।
ववर्षुर्भीषणान् बम्बान् रिपूपरि कारगिलवीराः॥८॥

ममन्थुस्ते रिपून् सर्वान् निलीनान् गूढभागेषु।
स्वदेशस्य प्रतिष्ठां ते ररक्षुः कारगिलवीराः॥९॥

भुशुण्डीनां शतघ्नीनां भयङ्करगोलकापातैः।
रिपूनुच्चाटयामासुः प्रवीराः कारगिलवीराः॥१०॥

अरीन् विद्रावयामासुः शठान् शिक्षापयामासुः।
खलान् प्रध्वंसयामासुः प्रणम्याः कारगिलवीराः॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ध्वजः शार्दूलशिखरे[3] स्वस्त्रिवर्णः स्थापितो यैर्यैः।
समे ते सन्ति सर्वेषां प्रणम्याः कारगिलवीराः॥१२॥

हनीफुद्दीनसौरवकालियाहूजास्तथा चान्ये।
महोत्साहा रवेर्मण्डलमभिन्दन्[4] कारगिलवीराः॥१३॥

रणे क्षतविक्षताङ्गा अप्यदम्योत्साहपरिपूर्णाः।
जिगीषापूरितात्मानः प्रचण्डाः कारगिलवीराः॥१४॥

अहो ये मातृभूमे रक्षणार्थं स्वीयसर्वस्वम्।
बलिं चक्रुः कथं ते विस्मृताः स्युः कारगिलवीराः॥१५॥

जनन्यै जन्मभूम्यै त्यक्तसर्वस्वा रणक्षेत्रे।
हुतात्मानो न वन्द्याः कस्य शतशः कारगिलवीराः॥१६॥

समस्तं भारतं ह्येकत्वसूत्रे बाधयाञ्चक्रुः।
बलिं कृत्वा स्वदेशार्थं स्वदेहान् कारगिलवीराः॥१७॥

प्रधानामात्य[5] आस्तामस्तु वा साधारणो लोकः।
कृतज्ञः सन् नमति युष्मान् प्रणम्याः कारगिलवीराः!॥१८॥

'द्रुतं विजयाभियानं सिद्ध' मित्यत्रास्ति को हेतुः?
इहोत्तरमास्त उपयुक्तं 'प्रवीराः कारगिलवीराः'॥१९॥

शृणुध्वं पाकनेतारः शृणुध्वं पाकबलपतयः।
यदीच्छथ शं तदा नो कोपनीयाः कारगिलवीराः॥२०॥

इमे नकुला मयूरा वैनतेयाः पाकनागानाम्।
इमे पञ्चानना द्विषतां द्विपानां कारगिलवीराः॥२१॥

शृणुध्वं निस्त्रपा आतङ्कवादप्रेरिताः मूढाः।
इमे जाग्रति दिवानक्तं सशस्त्राः कारगिलवीराः॥२२॥

उदन्वद्भूधराकाशेषु नित्यं देशरक्षार्थम्।
इमे तिष्ठन्ति सन्नद्धा विनिद्राः कारगिलवीराः॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'अविश्वस्ते न विश्वासो विधेयो जातुचिद्विदुषा'।
दिशन्तीदं भरतभूनायकाः! किल कारगिलवीराः॥२४॥

'शठे शाठ्यं विधेयं' 'दुर्जनः शाम्येन्न चोपकृतैः'।
'वधार्हश्चाततायी'-वेदयन्ते कारगिलवीराः॥२५॥

रमाकान्त! त्वया चान्यैः कवीन्द्रैरीडिताः काव्यैः।
सदा स्थास्यन्ति पूजार्हा अमर्त्या कारगिलवीराः॥२६॥

षड्विंशदिवसारब्धे शान्ते षड्विंशके दिने।
विजयाख्याभियाने ये दर्शितस्वपराक्रमाः॥1॥

चतुःशताधिका वीरा हुतात्मानो यशस्विनः।
जेतारश्च रिपूणां ये, क्षताङ्गा ये भटोद्भटाः॥2॥

शत्रून् कारगिलक्षेत्राधित्यकोपत्यकासु ये।
गतासून् कान्दिशीकाँश्च चक्रिरे रणभैरवाः॥3॥

तेषां कीर्तिं ककुब्व्याप्तां षड्विंशत्या पदां गिरन्।
विधत्ते लेखनीं धन्यां रमाकान्तो 'रमालये'॥4॥

(रचनापूर्तितिथिः २६-७-१९९९)

टिप्पण्यः -

१. 'विजयाभियाने (आपरेशन विजय)' भागं ग्रहीतारो भारतीयाः सैनिका।

२. २६.५.१९९९ तः २६.७.१९९९ पर्यन्तं कारगिल-क्षेत्रे प्रचलितं पाकिस्तान-प्रेषित-गूढाक्रमणकारिणामुच्चाटनाय यद् युद्धमिवाभवत्तत्र विजयिनः। कारगिलक्षेत्रे ये भारतीयाः वायु-सैनिकाः स्थल-सैनिकाश्च पराक्रमं प्रदर्शितवन्तस्तेऽत्र रचनायां 'कारगिलवीराः' इति सञ्ज्ञया व्यपदिष्टाः।

३. 'टाइगर हिल' इत्यत्र।

४. युद्धे वीरगतिका आदित्य-मण्डलं भित्वा ब्रह्मभावं गच्छन्तीति विश्वासः।

५. प्रधानमन्त्री।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

योऽयं कृतः शपथस्त्वया

योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?
यदिदं प्रतिज्ञातं त्वया तस्याशयं जानासि किम्?

(१)

कर्तुं यथा सरलस्तथा शपथो न निर्वोढुं सखे!
शपथस्य निर्वाहो भवति कण्टकपथानुसृतिः सखे!
त्यक्त्वा सुमान्यालिङ्गसे कटुकण्टकान्, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(२)

व्यालीवदनचुम्बनमिदं करवालधारालेहनम्
क्षुरधारया पदमित्रता मधुराशया गरलाशनम्
त्यक्त्वा सुखदतल्पं सखे! भूमौ स्वपिषि, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(३)

शपथं विधाय सखे! त्वया हस्तौ निगडबद्धौ कृतौ
शपथं विधाय सखे! त्वया पादौ निगडबद्धौ कृतौ
बद्धोऽसि वचसा कर्मणा मनसा त्वमिति, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(४)

नो लप्स्यसे निद्रां निशायां नापि दिवसे निर्वृतिम्
चिन्ताप्रतान्तविलोचनां त्वं द्रक्ष्यसि स्वामाकृतिम्
आमन्त्रितास्ते या विपत्तस्याः फलं जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

Padma Shri Rama Kant Shukla Collection at Devanvani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

शपथस्य पूर्त्यर्थं त्वया पेयं भवेद्गरलं मुदा
शपथस्य पूर्त्यर्थं त्वयाध्यवसाय आराध्यः सदा
शपथस्य पूर्त्यर्थं त्वयार्प्यं जीवनं, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(६)

ज्यायान् कनीयान् वा भवेच्छपथो गृहीतो मानवैः
तद्रक्षणार्थं लौहचणकाश्चर्वणीया मानवैः
शपथान्मनाक् प्रचलन्ति नो सत्यव्रताः, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(७)

यैः पूरितः शपथो निजस्ते लोकवन्द्याः सम्मताः
यैः पूरितः शपथो नरा इतिहासपुरुषास्ते मताः
शपथस्य भेत्ता कथ्यते जीवन्मृतो, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(८)

शपथो न कर्गलखण्डलिखितायास्तु पङ्क्तेर्वाचनम्
शपथोऽस्ति पीडासन्ततेरानन्दसहितं पाचनम्
शपथोऽस्ति मनसः कर्गले स्वात्माङ्कनं, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(९)

शपथो न केवलमस्ति वाण्या वर्णमात्रोच्चारणम्
शपथस्तु बन्धो! कथ्यते पञ्चाग्नितपसो धारणम्
होतव्य आत्मा मानवैस्तत्पूर्तये, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(१०)

मनसाथ वचसा कर्मणा भिन्ना भवन्ति न ये जनाः
सम्मानभाजनतां जगति ते यान्ति सर्वेषां जनाः
क्षतवाग्जनो निन्द्यो भवति लोके, सखे! जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(११)

शपथेन बद्धा नो जना निजलाभचिन्तां कुर्वते
न हि ते स्वशपथापेक्षया निजजीवनं बहु मन्वते
स्नेहं दयां सौख्यं न ते गणयन्ति, भण जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(१२)

लोभेन भयतः कामतो वा यो निजं शपथं त्यजेत्
शपथेन साकं स हि पुमान् निजजीवनं न हि किं त्यजेत्!
शपथस्य रक्षा ह्यात्मजयतो जायते, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(१३)

विस्मृत्य शपथं ये जनाश्चातुर्यखेलां तन्वते
चिन्वन्ति ते कामं धनं, न हि ते यशः किल चिन्वते
सम्भावितस्याकीर्तिरतिमृत्युर्भवति, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(१४)

ये वञ्चयन्त्यनिशं जनान् शपथं गृहीत्वा मानवाः
आत्मानमथ सर्वेश्वरं जानन्ति नो ते मानवाः
मिथ्याव्रतानां लुप्यते तेजो मुखाज्जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(१५)

अधुना यदा शपथः कृतस्त्वयका तदायं रक्ष्यताम्
प्रत्यक्षरं शपथस्य बन्धो! रक्षणीयं, रक्ष्यताम्
उच्चैः स्वरेणास्मत्पुरो यदवादि तज्जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(१६)

सम्प्रति शपथरक्षार्थमात्मा पीडनीयो रे! त्वया
विस्मृत्य निजसौख्यं सखे! लोकः समाराध्यस्त्वया
ईशः शपथकाले त्वया साक्षीकृतो जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

Padma Shri Rama Kant Shukla Collection at Deva Vani Prakashan Ram Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१७)

रक्ष प्रतिज्ञामात्मनो वर्धय तपः स्वं प्रत्यहम्
शपथं हि पूरय शुद्धमनसा, ते हितं कथयाम्यहम्
सम्पूर्य शपथं लप्स्यसे सुयशः स्थिरं, जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(१८)

रक्ष्येत शपथस्तावकोऽक्षरशो मयेदं काम्यते
सोढ्वापि कष्टं सफलतां विन्देति बन्धो! काम्यते
नैवोत्सहे त्वां भग्नशपथं द्रष्टुमिति जानासि किम्?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम्?

(रचनातिथिः १३-१०-१९९९ रात्रौ ८-०० वादनतः १२-०० वादनं यावत् निशीथे दिल्ली-शिमला मार्गे)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भाव-सन्धिः

विमानं नीतवन्तस्ते विना काठिन्यमस्माकम्
'अमृतसर'-वायुयानस्थानके तैलं गृहीतं तैः।
पुनर्व्यापादितो रूपेनकतियालो नृशंसैस्तै-
र्वयं विवशाः स्थिता गेहे, विलोक्यैतद्भृशं दूये॥१॥

अथो दुबईं गतैस्तैर्मोचिताः किल यात्रिणः केचित्
तदनु कन्धारभूमौ व्यूहरचना तैः कृता सम्यक्।
दिनान्यष्टौ स्थितैस्तैस्तत्र, यद्यत्काङ्क्षितं तत्तत्
गृहीतं शासनात्सर्वं, विलोक्यैतद् भृशं दूये॥२॥

विमाने ये स्थितास्ते यात्रिणो निजगेहमायाताः
प्रसन्नोऽहं, मुखान्मृत्योर्विमुक्तास्तेऽहमिति मन्ये।
परं विज्ञाय मुक्तिं क्रूरकर्मातङ्किनां त्वरितां
शिरोऽवनतं मदीयं ग्लानितोऽहं मानसे दूये॥३॥

न दूयेऽहं रुजो वित्तस्य नाशाद् बन्धुनाशाद्वा
न दूयेऽहं सभायां मेऽपमानान्मित्रघाताद्वा।
न दूये पुत्रशाठ्याद्वाप्युपेक्षायाः स्वजायायाः
परं राष्ट्रस्य वैवश्यं विलोक्याहं भृशं दूये॥४॥

स धन्यो राष्ट्रपतिपूर्वः कृती शंकर दयालो यो
जहौ प्राणान् विवशताग्लानिनाट्यप्रेक्षणात्पूर्वम्।
ह हा रचना वराकी नष्टपतिका कां गतिं यास्यति
दशां श्रुत्वा तदीयां हे प्रभो! चित्ते भृशं दूये॥५॥

सहस्राब्द्याः शताब्द्या वान्तिमं वर्ष शुभं भूयात्
जगत्यातङ्कवादोन्मूलनस्यारम्भ उद्भूयात्।
न देशस्यास्य महिमा स्वाभिमानो वा तिरोभूयात्
तथा भूयात् प्रयत्नो येन नैवाहं पुनर्दूये॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ज्वलतु चलितेन्धनोऽग्निः पन्नगः स्वीयां फणां कुरुतात्
स्वमहिमानं विजानीयाद्विवशतादष्टदेशोऽयम्।
'स्वराष्ट्रे जागृयामे' तीदमस्माभिस्सदा स्मार्यं
न चेन्नो वञ्चयेत्कश्चित्तदा नेत्थं पुनर्दूये॥७॥

(रचनातिथिः १.१.२००० ई.)

●

योऽयमातंकवादः

योऽयमातङ्कवादः खलानां खलः
पूजितो मुह्यमानो जगद् बाधते।
आयतौ नैव कीर्तिं जयं चाप्नुया-
न्नूतने वत्सरे वो भवेन्मङ्गलम्॥

(रचनातिथिः १५.१.२०००)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महाकुम्भे

अपूर्वं दृश्यते दृश्यं प्रयागीये महाकुम्भे।
नृणामास्था जलधिरूपा प्रविष्टास्ते महाकुम्भे॥१॥

इमे ये कल्पवासकराः जनास्ते स्नान्ति गंगायाम्।
त्रिवारं प्रत्यहं श्रद्धान्विता भूत्वा महाकुम्भे॥२॥

सहस्राब्द्याः शताब्द्या नूत्नवर्षस्याथवारम्भे।
जगत्स्नाति त्रिवेण्याः पावने सलिले महाकुम्भे॥३॥

इमे नागा इमे वैरागिणः सङ्गमजले स्नातुम्।
महोत्साहास्तथान्ये साधवः प्राप्ता महाकुम्भे॥४॥

न केवलमागता भरतावनेर्विविधप्रदेशेभ्यः।
अपितु सम्पूर्णजगतो मानवाः प्राप्ता महाकुम्भे॥५॥

किमास्ते तद्रहस्यं यज्जनान् योजयति भिन्नहृदः।
परीक्षन्ते समीक्षन्ते जगद्विज्ञा महाकुम्भे॥६॥

किमयमास्तेऽन्धविश्वासोऽथवास्था बद्धमूला यत्।
जनाः शिशिरे जले शीतेऽवगाहन्ते महाकुम्भे॥७॥

स्थितः सूर्यस्तथा चन्द्रो मकरराशौ गुरुर्मेषे।
वृषे वा, द्वादशाब्दानन्तरं स्नामो महाकुम्भे॥८॥

हरिद्वारे तथोज्जयिनीनगर्यां नासिकक्षेत्रे।
प्रयागे तीर्थराजे दृश्यते मेला महाकुम्भे॥९॥

विना विज्ञापनं नृणां महासम्मर्द आगच्छन्।
मनोमोक्षं महानन्दं च लभतेऽयं महाकुम्भे॥१०॥

अगच्छन्तः प्रयागं किञ्च न स्नात्वापि गङ्गायाम्।
पितुर्मातुर्गुरोः सेवापराः पूताः महाकुम्भे॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Yatra Sansthan Vikram Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अथो ये दूरतो गङ्गां स्मरन्तोऽहर्निशं लोकाः।
परोपकृतिव्रतस्थास्तेऽपि धन्या वै महाकुम्भे॥१२॥

अहो मे राष्ट्रगरिमा येन जीवामो वयं सर्वे।
विभिन्ना एकतां याता मिलामो वै महाकुम्भे॥१३॥

किशोरा बालका वृद्धा युवानः स्नान्त्यथो प्रौढाः।
किशोर्यो बालिका वृद्धा युवत्यो वै महाकुम्भे॥१४॥

भवेद्राष्टं समृद्धं वञ्चकैः शून्यं प्रगतिपरकम्।
समस्तं विश्वमास्तामेकनीडं वै महाकुम्भे॥१५॥

प्रभुं परमेश्वरं विनतेन शिरसा प्रार्थयामो यत्।
समे सद्बुद्धिसत्कर्मान्विताः स्युर्वै महाकुम्भे॥१६॥

पुरातननूतनाभ्यामिह मिलित्वा साध्यते योगः।
भवन् मुग्धोऽवलोकय नूतनामाभां महाकुम्भे॥१७॥

रमाकान्तस्तु न प्राप्तस्त्रिवेण्याः सङ्गमक्षेत्रे।
परं लभतेऽनया गीत्याभिषेकायं[1] महाकुम्भे॥१८॥

(रचनातिथिः १४-१-२००१)

इलाहाबाद-रेलस्थानके मौनीकुहू-लीनाः।
मृता मोक्षं लभेरन् त्वां प्रभो याचे महाकुम्भे॥१९॥

(रचनातिथिः १४-१-२०१३)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतस्य जनता समीक्षते

को नु देशगरिमाणमीहते
को नु भारत-सुखानि काङ्क्षति।
को रिरक्षिषति राष्ट्रियैकताम्
भारतस्य जनता समीक्षते॥१॥

के ब्रुवन्ति किमु किं च कुर्वते
प्राप्य शक्तिमथ को न माद्यति।
वञ्चयन्ति मतदायकान्न के
भारतस्य जनता समीक्षते॥२॥

कोऽस्ति राष्ट्रहितसाधने रतः
कश्च राष्ट्रपरिवञ्चने रतः।
केन कस्य किल कर्म किं कृतम्
भारतस्य जनता समीक्षते॥३॥

कश्च केन किमिति प्रसाद्यते
कश्च केन किमिति प्रतार्यते।
कोऽस्ति कस्य प्रणिधिः क्व कीदृशो
भारतस्य जनता समीक्षते॥४॥

आत्मतन्त्रमिदमाप्तमस्ति यत्
त्यक्तसर्वविधसौख्यसाधनैः।
तस्य रक्षणकृते नु के क्षमाः
भारतस्य जनता समीक्षते॥५॥

कैः कृतं च किल देशखण्डनं
कैः क्रियेत पुनरस्य मण्डनम्।
कः करोति खलु दण्ड्यदण्डनं
भारतस्य जनता समीक्षते॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad Ahmam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोऽपवञ्चनपरोऽस्ति नायकः
कश्च मुग्धजनताप्रतारकः।
कश्च सर्वजन-ताप-हारकः
भारतस्य जनता समीक्षते॥७॥

को विरागमुपयाति शासनात्
कोऽतिरागमुपयाति चासने।
धूर्त उच्चपदवीं कथं गतो
भारतस्य जनता समीक्षते॥८॥

कः कियान् पवनयात्रितां गतः
कः कियान् विषधरैर्वृतः स्थितः।
को जहाति शठतां न कर्हिचिद्
भारतस्य जनता समीक्षते॥९॥

नन्नमीति कतमं जनं च कः
कश्चिखादिषति जानतं धनम्।
को जिघृक्षति कथं मतं नृणां
भारतस्य जनता निरीक्षते॥१०॥

किं किमस्ति किल काकचेष्टितं
किं किमस्ति किल गृध्रचेष्टितम्।
किं किमस्ति परवञ्चनावचो
भारतस्य जनता समीक्षते॥११॥

कृष्णवित्तविपुलार्जने रताः
के च सन्ति मलिनाशया जनाः।
के हरन्ति जनता - धनं खलाः
भारतस्य जनता समीक्षते॥१२॥

देशलुण्ठनमहाव्रतस्थितान्
लक्षकोटिधनवञ्चनाचणान्।
धर्मकञ्चुकधराँश्च राक्षसान्
भारतस्य जनता निरीक्षते॥१३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कः करोति शठपादचुम्बनं
सूचनां ददति के च शत्रवे।
मन्वते च किल के भुवं प्रसूं
भारतस्य जनता निरीक्षते॥१४॥

गूढशत्रुप्रतिवेशिनः कथं
नित्यमेव प्रविशन्ति भारतम्।
स्वास्थ्यनाशकरणार्थमस्य वै
भारतस्य जनता समीक्षते॥१५॥

भ्रष्टकृत्यमथ ये निरन्तरं
निर्भयेन मनसा प्रकुर्वते।
तानपि प्रखरदुःखदारिता
भारतस्य जनता समीक्षते॥१६॥

पित्र्यरिक्थमिव राष्ट्रियं धनं
वीतचिन्त उदरे करोति कः।
श्रव्यदृश्यविविधप्रमाणकैः
भारतस्य जनता समीक्षते॥१७॥

जातिजन्यरिपुताप्रसारणे
कस्य वै रुचिरिहास्ति जाग्रती।
कश्च वञ्चनपरः सभागृहे
भारतस्य जनता समीक्षते॥१८॥

को नु साम्प्रतमिहास्ति भारते
देशसौख्यहितसाधने रतः।
आगते तु चयने[1] विवेकिनी
भारतस्य जनता परीक्षते॥१९॥

को जितेन्द्रिय इहास्ति नायकः
केन भारतहितं च साध्यते।
केन राष्ट्रगरिमा विवर्ध्यते
भारतस्य जनता प्रतीक्षते॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आततायिपवनाशनाशनो[२]
वैनतेय इह कोऽस्ति नायकः।
राष्ट्रशत्रुपरिपातनोत्सुको
भारतस्य जनता प्रतीक्षते॥२१॥

स्युः कदात्र किल पूजिता गुणाः
नैव लिङ्गमथ नो वयो नृणाम्।
राष्ट्ररक्षणपरैकमानसा
भारतस्य जनता प्रतीक्षते॥२२॥

कोऽधुना भरतभूसुसेवया
धन्यमात्मजननं विधास्यति।
पूरयिष्यति च को ममेहितं
भारतस्य जनता प्रतीक्षते॥२३॥

नार्तपीडनमिहास्तु कुत्रचित्
नाप्युपद्रवपरम्परा स्फुरेत्।
नैव वञ्चकजयः प्रतिष्ठताम्
भारतस्य जनता समीहते॥२४॥

नास्तु कश्चिदिह रोगपीडितः
नास्तु कश्चिदिह चाप्यशिक्षितः।
नात्र वृत्तिरहितोऽस्तु कश्चन
भारतस्य जनता समीहते॥२५॥

यस्य जन्म भरतावनौ भवेत्
तस्य तस्य भरणं भवेद् ध्रुवम्।
वृत्तिकष्टमिह कोऽपि नाप्नुयाद्
भारतस्य जनता समीहते॥२६॥

आततायिकृतदुष्कृतिर्जनं
बाधयेन्नहि कदापि भारते।
कर्मठत्वमभिवर्धतां नृणां
भारतस्य जनता समीहते॥२७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नापराधिजनसुप्रतिष्ठता
नापि तस्करजनानुमोदनम्।
नैव देशहितखण्डनं भवेद्
भारतस्य जनता समीहते॥२८॥

सत्यमेव जयतान्न चानृतम्
आर्जवं जयतु नैव दुष्टता।
वीरता जयतु राष्ट्ररक्षिणी
भारतस्य जनता समीहते॥२९॥

राष्ट्रमस्तु सुखशान्तिपूरितं
राष्ट्रमस्तु सुदृढं सुरक्षितम्।
राष्ट्रमस्तु सुयशःसमृद्धिमत्
भारतस्य जनता समीहते॥३०॥

(रचनातिथिः २४-१२-२००१)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किं कुर्यात् (१)

कृते यत्नेऽपि नो सिद्धिर्भवति चेत्कोऽत्र किं कुर्यात्।
विरुद्धे भागधेये कर्म कुर्वाणोऽपि किं कुर्यात्?॥१॥

'विलिण्टाइन' दिने छात्राः कुसुमहस्ता गताः पार्के।
वराकोऽध्यापको गत्वापि कक्षे ब्रूहि किं कुर्यात्॥२॥

गृहादचलं भवन्तं द्रष्टुकामोऽहं यथाकालम्।
परं मार्गेऽमिलज्जामो विलम्बे कोऽत्र किं कुर्यात्॥३॥

गृहाच्चलितः समयतोऽहं परं मध्येपथं रुद्धः।
'विलम्बादागतोऽस्मी'ति क्षमायाच्चापि किं कुर्यात्॥४॥

उपस्थितिपञ्जिकास्ते द्वारि चारक्षी लगुडहस्तः।
तथापि त्वं त्वदीयैस्ताड्यसे चेत्कोऽत्र किं कुर्यात्॥५॥

भवति साक्षात्कृतिर्विद्यागृहे त्वं चोत्तमश्रेणिः।
न पूर्वेद्युस्त्वया दृष्टो विशेषज्ञोऽपि किं कुर्यात्॥६॥

श्रुतो धर्मः, कृता सन्ध्या, श्रिते चाभ्यासवैराग्ये।
जहाति च नैव चाञ्चल्यं मनः किल कोऽत्र किं कुर्यात्॥७॥

अहं यां चिन्तयाम्यनिशं विना यां नो लभे निद्राम्।
न सा दूरध्वनौ सुलभा, जनोऽयं मित्र! किं कुर्यात्॥८॥

प्रिया भार्या त्वमसि, वदसि प्रियं प्रियमण्डने, पत्यै।
न चेत्समयेऽशनं दत्से पतिस्ते ब्रूहि किं कुर्यात्॥९॥

त्वया विषभक्षणं कृत्वा कृतायामात्महत्यायाम्।
प्रियस्त्वां नैति चेद् द्रष्टुं तवेदं कर्म किं कुर्यात्॥१०॥

वधूः श्वसुरालयादपमानिता गच्छति पितुर्गेहे।
पितुर्गेहेऽपि नो सौख्यं भजति चेत्सात्र किं कुर्यात्?॥११॥

महामात्योऽटलोऽध्यक्षो मुशर्रफ् चागरानगरे।
शिखरवार्तावसाने निष्फलौ! कः कोऽत्र किं कुर्यात्?॥१२॥

'मृतो वा जीवितो वापेक्ष्यते न्यायाय लादेनः।'
प्रतिज्ञायापि नो लभते बुशस्तं चेत्स किं कुर्यात्!॥१३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कृते विविधे प्रपञ्चेऽपि प्रकामं बहुमतं नाप्तम्।
इदानीं वञ्चनाचुञ्चुर्दलाध्यक्षोऽपि किं कुर्यात्!॥१४॥

इमे प्रतिपक्षिणो भूत्वा समायाता वृकाः सदने।
परं तत्रैकतां प्राप्ता ऋजुर्मेषोऽत्र किं कुर्यात्!॥१५॥

इमे बहुनायका रथिनो रथं विमता यदारूढाः।
निनीषुस्तं प्रमुखसारथिरयं विवशो नु किं कुर्यात्?॥१६॥

मतं दत्तं त्वया किल यत्तु तद्युक्तं परं भ्रातः।
ददासि न चेत्त्वमुत्कोचं तदा नेतापि किं कुर्यात्?॥१७॥

अरण्ये रोदनं कुरुषे बधिरकर्णे जपसि बन्धो!
पठितवानसि बहून् ग्रन्थान्, त्वदर्थं कोऽपि किं कुर्यात्!॥१८॥

गृहीत्वा पाटलं पुष्पं वसन्तो द्वारि सम्प्राप्तः।
मनसि किल पत्रशातनमस्ति, मधुमासोऽत्र किं कुर्यात्!॥१९॥

कवी रात्रौ लिखति कवितामरकोशं मुहुः पश्यन्।
न च श्रोतास्य शृणुते पद्यबन्धं सोऽत्र किं कुर्यात्!॥२०॥

कृते यत्नेऽपि मुद्रणदोषतो मुक्तिर्न यदि लभ्या।
तदाक्षरयोजकः सम्पादको वा मित्र! किं कुर्यात्!॥२१॥

अहं शस्त्रास्त्रसम्पन्नो भटः सीमासु तिष्ठामि।
न चादेशं लभे युद्धस्य, शौर्यं मेऽत्र किं कुर्यात्?॥२२॥

मदीयौ द्वौ सखायौ हस्तमेलनमद्य नो कुरुतः।
तयोर्मैत्रीं दिदृक्षुश्चेज्जनोऽयं ब्रूहि किं कुर्यात्?॥२३॥

ययोरशनं कुलं शीलं तथा कर्माणि भिद्यन्ते।
तयोर्मैत्रीं विवाहं चेच्छसि त्वं? कोऽत्र किं कुर्यात्॥२४॥

स्वराष्ट्रस्य प्रगतिमिच्छन्ति कवयोऽध्यापका वीराः।
भटा उद्योगिनः श्रमिणः, कुनेता किन्तु किं कुर्यात्!॥२५॥

यदास्माभिश्चिताः प्रभवो मलीमसकर्म कुर्वाणाः।
मुहुर्गायन् 'स्वभारतभां' रमाकान्तोऽपि किं कुर्यात्॥२६॥

(रचनातिथिः १६.२.२००२)

●

Padma Shri Rama Kant Shukla Collection at Devasanskriti Kutam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किं कुर्यात्! (२)

न विद्युन्नो हसन्ती भामिनी नापि प्रिया पार्श्वे।
तुषारेऽयं जनः शून्ये च तापे मित्र! किं कुर्यात्॥१॥

'मयेयं चालिता मेट्रो-सुगन्त्री जनमनोहर्त्री।
हसति नेतुर्वचः श्रुत्वा जनो, नेताऽत्र किं कुर्यात्॥२॥

न युद्धं नापि शान्तिर्नैव मैत्री नापि शत्रुत्वम्।
न संवादो न मौनं चावयोः कः कोऽत्र किं कुर्यात्॥३॥

अहो ग्रीष्मे न पेयं शीतलं त्वयका सुलभ्येत।
न चोष्णं भोजनं शिशिरे धनं ते ब्रूहि किं कुर्यात्॥४॥

त्वया नेतृब्रुवाः संसेविताः स्वीयाध्ययनकाले।
तृतीयश्रेणिमापन्नस्य ते वद कोऽत्र किं कुर्यात्॥५॥

न शौचं नापि चाचारो न सत्यं येषु विद्येत।
सखे! तेषां सपर्या मे व्रतम्, मे कोऽपि किं कुर्यात्॥६॥

इदं निर्वाचनं प्राप्तं पुनष्टिकटेच्छवोऽद्यत्वे।
दलाद्दलमाविशन्त्येते, अमीषां कोऽत्र किं कुर्यात्॥७॥

'धनाद्धर्मं ततः सुख' मित्ययं सिद्धान्त उच्छिन्नः।
'धनाट्टिकटं ततः सत्ता' धुना मे कोऽपि किं कुर्यात्॥८॥

अयं सद्दाम आस्ते पञ्जरे बद्धो यथा सिंहः।
प्रवर्धन्तेऽस्य रिपवो तांश्च पश्यन्नेष किं कुर्यात्॥९॥

सदा यो वर्धयन्नातंकवादं शासनं ह्यकरोत्।
शरव्यः सोऽद्य जातस्तस्य रोदिति, कोऽस्य किं कुर्यात्॥१०॥
(रचनातिथिः १७.१.२००३, १४.१.२००४)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यानावरोधो दुस्त्यजः, शकटावरोधो दुरत्यजः

लाजवन्तीगार्डनं स्यात्स्यादथो धौलाकुआँ।
स्याच्च वा मायापुरी यानावरोधो दुस्त्यजः॥१॥
शकटावरोधो दुस्त्यजः॥

आइ॰टी॰ओ॰ स्यादथो शाहेदरा वाथो भवेत्।
शक्तिनगरं वा भवेन् यानावरोधो दुस्त्यजः॥२॥

काररूढो वा भवेत् स्कूटरसुरूढो वा भवेत्।
स्याच्च वा वाहनपटुः, यानावरोधो दुस्त्यजः॥३॥

जनपथो वा स्यादथो राज्ञां पथो वा स्यादयम्।
अस्तु सी॰पी॰ चक्रकं यानावरोधो दुस्त्यजः॥४॥

भानुजासेतुर्भवेद्वा नौइडामार्गोऽथवा।
मालचामार्गोऽथवा यानावरोधो दुस्त्यजः॥५॥

रा॰म॰लो॰ चक्रं भवतु वा स्यादथोऽप्याश्रमधरा।
स्याच्च दिल्लीस्टेशनं यानावरोधो दुस्त्यजः॥६॥

रक्तचापचिकित्सया को लाभ आस्ते मित्र ते।
लभ्यते स्वप्नेऽपि यदि यानावरोधो दुस्त्यजः॥७॥

मेटरोमार्गेषु भवताद्वा न वा जामस्थितिः।
किन्तु पर्वतगंजके यानावरोधो दुस्त्यजः॥

ब्रूहि गत्वा प्रेयसीं त्वं क्रोधरक्तेक्षणमुखीम्।
'मां क्षमस्व विलम्बिनं यानावरोधो दुस्त्यजः॥8॥

भोः प्रियामिलनोत्सुका नीत्वा करे चलभाषकम्।
सत्वरं पद्भ्यां ब्रजत, यानावराधो दुस्त्यजः॥9॥

साम्प्रतं निश्चीयते मयका विना भ्रान्तिं सखे।
यामि पदभ्यामेव यदि यानावरोधो दुस्त्यजः॥10॥

(रचनातिथिः १५.१.२००४)

●

Rama Shri Rama Kant Shukla Collection at Deep Vihar Sunlight Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निर्वाचने प्राप्ते (१)

अपूर्वं पश्य दृश्यं हे सखे निर्वाचने प्राप्ते।
सहजशत्रुः परं मित्रं भवति निर्वाचने प्राप्ते॥१॥

विरुद्धानां सुमैत्री जायते निर्वाचने प्राप्ते।
समीकरणं नवं नूत्नं भवति निर्वाचने प्राप्ते॥२॥

नमुचिशक्रौ तथा सुन्दोपसुन्दौ वज्रभूमिधरौ।
अजाकण्ठीरवौ सुहृदौ सखे! निर्वाचने प्राप्ते॥३॥

मयूरव्यालशालूरा गले लग्नाः प्रसीदन्ति।
समेषां लाभ आयत्यां ध्रुवो निर्वाचने प्राप्ते॥४॥

'न वैरं शाम्यते वैरेण' 'मैत्री सन्नृणां पुण्या'।
भवति सत्त्वावतरणं मानसे निर्वाचने प्राप्ते॥५॥

इयं जनतास्ति पाञ्चाली विवस्त्रैषा भवेन्नूनम्।
अतो दुःशासना ऐक्यं गता निर्वाचने प्राप्ते॥६॥

अहं गोमायुरस्मि त्वं च गृध्रो दूरदृष्टिरसि।
अयं भक्ष्योऽस्ति बालो नः सखे निर्वाचने प्राप्ते॥७॥

सदा वातानुकूलितसौधभवनैः परिचिताः सर्वे।
वयं मार्गे भ्रमामो हे प्रभो! निर्वाचने प्राप्ते॥८॥

अये कवयः! कुरुध्वं काव्यमिह किन्तु क्षमध्वं नः।
वयं वै व्यापृता मतयाचने निर्वाचने प्राप्ते॥९॥

इमे दर्शकसमूहाः लोभनीया नूनमस्माभिः।
वयं पारंगता नाट्ये सखे। निर्वाचने प्राप्ते॥१०॥

पशुभ्यो दीयतां किञ्चित्तृणं पूर्वं विना शंकाम्।
इम बलिकर्मयोग्या वै मखे निर्वाचने प्राप्ते॥११॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निर्वाचने प्राप्ते (२)

चलच्चित्राभिनेतारोऽभिनेत्र्यो बहुमतं लब्धुं
दलाध्यक्षैः सबहुमानं सदस्यत्वेन गृह्यन्ते।
शिखण्डी भीष्मजयहेतो दलैरन्विष्यते यत्नात्
अघट्यं घटयितुं शक्यं सखे निर्वाचने प्राप्ते॥१॥

इमे श्याला असौ भ्राता पितृव्या मातुला एते
निशीथे कुर्वते सम्मिल्य सग्धिं ये सपीतिं वा।
त एवाह्नि प्रतारयितुं जनान् निजभाषणैर्धूर्ता
इमे परिपन्थिनो जाता सखे निर्वाचने प्राप्ते॥२॥

कदाचिद् ये सहजरिपवो ह्यभूवन् तेऽद्य सानन्दं
गले लग्नाः सहजमित्रत्वमाप्ता गद्गदायन्ते।
कथंकारं भवेदस्मज्जयो ध्रुवमित्यमुं स्वार्थं
प्रपूरयितुं भवति यत्नः परो निर्वाचने प्राप्ते॥३॥

इयं नेत्री पदारूढा जनान् पृच्छति सुखं दुःखम्
अयं नेता रथारूढः प्रयातो दिग्विजयकामः।
तयोल्का पातितानेनापि वज्रः पातितो वाग्भिः
अहो वाचां विलासो दृश्यते निर्वाचने प्राप्ते॥४॥

न जाने को जितः स्यात्कोऽथवा विजितो भवेन्नेता
न जाने कः स्थितः स्याच्छासनासन्द्यां सुपुण्यात्मा।
इयं चिन्ता विधेया नैव सम्प्रति हे सखे! त्वयका
तवाधिकृतिस्तु कर्मणि नो फले निर्वाचने प्राप्ते॥५॥

(रचनातिथिः १३.३.२००४)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अभिनवहितोपदेशः

श्रव्येषु दृश्येषु च माध्यमेषु
स्वचित्र-वार्तानवलोकखिन्नः।
स्वाध्यायनिष्ठः श्रमसत्यसेवी
कश्चित्सुतः स्वं पितरं जगाद॥१॥

पुत्र उवाच

"पितः कदाचिन्मम नाम-चित्रयोः
प्रकाशनं वृत्तदलेषु नाभवत्।
न चापि चर्चा मम दूरदर्शने
न कारणं तत्र मयावगम्यते॥२॥

यथा त्वयाहं विनयान्वितः कृत-
स्तथैव नित्यं सममाचरम्याहम्।
'श्रमेण सत्येन च सिद्धिराप्यते'
दृढा ममास्था वचसीह वर्तते॥३॥

अपापठं शास्त्रचयं दिवानिशम्
अजेजयं विज्ञसभानु नैकदा।
अजोहवं यज्ञमहं यथाविधि
यशस्यमास्ते न तथापि मे कृतम्॥४॥

ग्रन्थाः प्रणीताः कतिचिन्मया पितः
पन्था सतां वै मयकानुशीलितः।
कन्था गृहीता निज कार्यसिद्धये
मन्थान एवास्मि सुशास्त्रसिन्धवे॥५॥

अवाप्नुवम् वै विविधाः प्रतिष्ठिताः
पुरस्कृतीश्छात्रसभासु नैकदा।
तथापि मे नाम विलोक्यते क्वचित्
न वृत्तपत्रे न च दूरदर्शने॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अनक्षरा ये सहचारिणो मम
प्रकाशितास्ते विविधे हि माध्यमे।
अयं सुतस्ते विनयोज्ज्वलोऽपि सन्
नितान्तमेकान्ततमःसु सीदति॥७॥

दिगम्बरप्रायविलासिनीनां
चित्राणि नित्यं प्रविलोक्य पत्रे।
विद्यापराणां खलु मादृशानां
सन्तापवृद्धिर्भवतीह नूनम्॥८॥

वने मयूरस्य हि न नर्तनेन
न लाभ आस्ते जगतीह कोऽपि।
यशो न लब्धं न च कीर्तिराप्ता
धिगस्तु मे जीवनमप्रतिष्ठम्॥९॥

कमप्युपायं दिश तात येन मे
यशो दिगन्तावधिगामि जायताम्।
वदन्त्यखण्डाभिरुचिं यशस्यथो
स्वभावसिद्धं महतां सुलक्षणम्॥१०॥

इतीरयित्वा सुत आत्ततातपाद्
उदश्रु तस्थौ कतिचित् क्षणानि वै।
उपस्थिते संशयकल्मषे ध्रुवं
पितैव पुत्रस्य पथप्रदर्शकः॥११॥

निशम्य पुत्रस्य निवेदनं पिता
चलोऽचलोऽभूत्पविताडितो यथा।
पुनश्च तं बोधयितुं कुलाङ्कुरं
स लोककालज्ञ उवाच मर्मवित्॥१२॥

पितोवाच

"सुवर्णपुष्पां पृथिवीं जयन्ति ये
न तेष्विदानीं कृतविद्य इष्यते।
यशोऽधिगन्तुं सुखलिप्सया वा
न सौम्य ते सन्ति गुणाः क्षमा मनाक्॥१३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अधीतिबोधाचरणप्रचारणै-
स्त्वया स्वविद्यापरिपोषणं कृतम्।
अनेन न स्यात्किमपि प्रकाशनं
उदन्तपत्रेऽथ च दूरदर्शने॥१४॥

न ते सकाशे धनमस्ति तादृशं
क्षमं हि यत् पत्रकृतां सुमेलने।
न चैव विज्ञापनदातृयोग्यता
कथं यशः स्यात्तव पुत्र माध्यमे॥१५॥

तथापि ते चेतसि वृत्तपत्रके
स्वचित्रवीक्षासुमनोरथो दृढः।
विहाय विद्याजनितं स्वगौरवम्
उपायमङ्गीकुरु मन्मुखोद्गतम्॥१६॥

अशिष्टतां तानय शिष्टमण्डले
प्रदर्शने तोलय हस्तमात्मनः।
स्वदस्व कामं मदिरां सकोकिनां
तदास्तु चर्चा तव वृत्तपत्रके॥१७॥

बलात्कृतिं त्वं चर दानवोचिताम्
पुनश्च हत्यां कुरुतादनागसाम्।
तथा च कृत्वापहृतीर्धनी भव
तदास्तु चर्चा तव वृत्तपत्रके॥१८॥

सुतानुजाभ्यां सह दुष्कृतिं कुरु
न लज्जितस्त्वं भव कैमरान्तिके।
स्वदेशनिन्दां कुरु वा सडिण्डिमं
तदास्तु चर्चा तव पुत्र माध्यमे॥१९॥

गृहीतशस्त्रो व्रज दस्युतामथो
शताधिकब्राह्मणमारणोद्यतः।
भव त्वमातङ्ककृतां वशंवदः
तदास्तु चर्चा तव पुत्र माध्यमे॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विमान-रेलादिषु वाहनेषु
विस्फोट्य बम्बं तरलं कठोरम्।
गृहाण तस्योत्तरदायितां त्वम्
उदन्तपत्रेऽस्तु तव प्रकाशः॥२१॥

भव त्वमेकः प्रथितोऽथ तस्करो
भवाथ नेता जनताप्रवञ्चकः।
द्विष त्वमाहो चरितं महात्मनाम्
तदास्तु चर्चा तव पुत्र माध्यमे॥२२॥

घोटालकेतिप्रथिताभिधानकैः
त्वं चेत्प्रसिद्धोऽसि धनापवञ्चनैः।
पुत्र! प्रसिद्धिर्ध्रुवमेव ते भवेत्
वृत्तान्तपत्रेषु च दूरदर्शने॥२३॥

अथो लिख त्वं सुत! पुस्तकं नवं
प्रमाणपुष्टं न भवेत्त्वयापि यत्।
मुखेऽन्यदास्तामपरं च लेखने
तदास्तु चर्चा तव पुत्र माध्यमे॥२४॥

वन्ध्यासुतोद्वाह-नभःप्रसून-
ध्वाङ्क्षद्विजाली-शशशृङ्गरम्यैः।
वृत्तैः सुपूर्णं लिख पुस्तकं त्वम्
उदन्तपत्रेऽस्तु तव प्रकाशः॥२५॥

आरोपमारोपय लेखनैः स्वैः
अत्युच्चकार्यालय-धुर्यवर्गे।
चितेऽन्यदास्तां वदने च तेऽन्यद्
ध्रुवास्तु चर्चा तव वृत्तपत्रे॥२६॥

निलम्बितः स्याः स्वदलात्कदाचन
तदा विपक्षस्थितनेतृभिः सह।
विभीषणत्वं प्रतिपालयेर्यदि
तदास्तु चर्चा तव पुत्र माध्यमे॥२७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad-Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

समस्तवंशस्य विनाशकारको
नृशंसजीवो भव वित्तलोलुपः।
वधूप्रदाही भव यौतुकेच्छया
तदास्तु चर्चा तव पुत्र माध्यमे॥२८॥

विनानुमत्या प्रविशाथवा स्वकैः
सुहृद्भिरित्वा सह कारयात्रिभिः।
प्रधानमन्त्र्यादिनिवासनस्थलीम्
तदास्तु चर्चा तव पुत्र माध्यमे॥२९॥

यदि त्वमारुह्य नभःस्पृशं गृहं
स्वकर्णमूले निदधेर्भुशुण्डिकाम्।
ततश्च कोलाहलमातनोषि चेत्
तदास्तु चर्चा तव पुत्र माध्यमे॥३०॥

पदातियात्रा-धरना-प्रदर्शनैः
ससूचनं पुत्तलिकाप्रदाहनैः।
अभोजनोद्घोषणया च निश्चितं
तवास्तु चर्चा किल दूरदर्शने॥३१॥

अथात्मदाहं कुरु चत्वरे त्वं
मृत्तैलपात्रस्य विरचनेन।
निर्वाचने वा टिकटं गृहाण
तदास्तु चर्चा तव वृत्तपत्रे॥३२॥

विलोक्य यन्त्रैर्बुलडोजराख्यै-
र्निपात्यमानानि गृहाणि दिष्ट्या।
लुठंस्तदग्रे किलं सावधानं
प्रकाशितः स्यास्त्वमु माध्यमेषु॥३३॥

उत्कोचलीला-तिमिरार्थसञ्चय-
स्वदेशसम्बन्धिरहस्यविक्रयैः।
तवास्तु कीर्तिश्च यशश्च सत्वरम्
उदन्तपत्रेऽथ च दूरदर्शने॥३४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

धर्माद्धनं लब्धुमथोपदेशको
धर्मध्वजी त्वं भव नाट्यकोविदः।
विशालचन्द्रातपमध्यसंस्थितः
प्रसारणं त्वं पटलेषु लप्स्यसे॥३५॥

स्वदेश-देशान्तर-विश्वविद्या-
प्रमाणपत्राङ्कदलानि मिथ्या।
विक्रीय यद्यर्जयसीह वित्तं
ध्रुवास्तु चर्चा तव माध्यमेषु॥३६॥

अजानता वा किल जानताथवा-
पराधसाहस्त्रमहर्निशं त्वया।
यदि क्रियेतात्मज! तर्हि निश्चितं
तवास्तु चर्चा किल दूरदर्शने॥३७॥

श्रीदेहलीनगरपश्चिमदिग्विभागे
डिस्ट्रिक्ट सेण्टरमिति प्रथितं यदास्ते।
तत्तुङ्गशृङ्गमधिरुह्य पतेरधश्चेच्
चर्चा तदा तव भवेत्सुत माध्यमेषु॥३८॥

अवाच्यवाच्यं यदि चान्यदास्तां
तव स्मृतौ कष्टकरं जनानाम्।
उदन्तपत्रे 'कवरेज' माप्तुम्
अये सुत! द्रागनुतिष्ठ तत्तत्॥३९॥

उक्तेष्वनेकेषु कमप्युपायं
गृहाण सद्यो मम सौम्य पुत्रक।
सन्देहशङ्काम्बुधितारणाय
पोतीभवेदेष सुनिश्चितं मे॥४०॥

उदन्तपत्रेषु सुकर्मकारिणां
यदा कदा चित्रमपि प्रकाश्यते।
परन्त्वयं योग उपस्थितस्तदा
यदा जलप्लावनजादिसङ्कटम्॥४१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यद्यप्यनेकविदुषामपि नामचर्चा
सञ्चारमाध्यमगताक्षिपथं प्रयाति।
सा द्वित्रिपा भिरथो मरणे च तेषां
तस्मात्त्यज त्वमयि पुत्रक! वैदुषीं स्वाम्।।४२।।

यद् दुर्लभं हि कथितं नरजन्म लोके
पुस्त्वं ततश्च वसुधामरता सविद्या।
तद्धयद्य नास्ति विदुषे हितकारि वाक्यं
तस्माद् भजस्व सुत लौकिकतां यशस्याम्।।४३।।

अनुक्तमप्यहूति पण्डितो जनः
कृतानि पुत्रैरकृतानि पूर्वजैः।
अतः स्वबुद्ध्यापि मयोदितेतरं
यशस्यमर्थ्यं च सदा समाचार।।४४।।

उपेक्षया ते सुखमान्तरं भवेद्
उदन्तपत्रस्य, तथापि ते स्पृहा।
स्वचित्रचर्चाद्यवलोकनाय चेद्
गुरूपदिष्टं द्रुतमेव सेव्यताम्।।४५।।

करोति कश्चिद्यदि पत्रकारितां
सखा त्वदीयस्तदुपास्यतामयम्।
क्षुतं गतं किञ्च विलोकितं तव
स वृत्तपत्रेषु प्रकाशयिष्यति।।४६।।

(रचनातिथिः १४.९.२००७)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुनर्नो भारते भूयात्

निठारी-निष्ठुरोदन्तः पुनर्नो भारते भूयात्।
मनुजता लज्जिता नैवं पुनर्मे भारते भूयात्॥१॥

यथावाच्यं यथाश्राव्यं यथाकल्प्यं कृतं दुष्टैः।
महल्लज्जास्पदं तन्नो पुनर्मे भारते भूयात्॥२॥

न कंसेनासमञ्जेनाथ न द्रोणात्मजेनापि।
तथाचरितं यथाभ्यां, तत्पुनर्नो भारते भूयात्॥३॥

'इयं लघ्वीव घटनास्ते, धनं स्वीकृत्य तूष्णीं भव।'
इतीदृशमुक्तिशाठ्यं नो पुनर्मे भारते भूयात्॥४॥

न भूखण्डैरनुग्रहराशिभिर्वा शाम्यते नो यः।
स आत्मजशोकदाहो नो पुनर्मे भारते भूयात्॥५॥

शिशूनां विंशतेरधिकं पिशाचानां शरव्यमभूत्।
कुकृत्यं हीदृशं भूयोऽपि नो मे भारते भूयात्॥६॥

पुरा दुष्कर्म तदनु व्याहतिस्तदनु द्विधाकरणम्।
ततो नालाप्रवाहो नो पुनर्मे भारते भूयात्॥७॥

गृहे वस्त्रे तथान्ने सति यदीमे दुष्कृतिं कुर्युः।
तदैषां नारकीयाणां जनिर्नो भारते भूयात्॥८॥

इमे यदि धनबलेनादण्डिता दुष्टाश्चरिष्यन्ति।
सुशासनमेव नो दृश्यं तदा मे भारते भूयात्॥९॥

परेशांशो मनुष्यो हन्त विहितो राक्षसो येन।
असौ हिंसारसोद्रेकः पुनर्नो भारते भूयात्॥१०॥

न शालायां गता न क्रीडिता नाप्ता विकासं ये।
शिशूनां हन्त तेषां वैशसं नो भारते भूयात्॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad Dham Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'परित्राणाय साधूनां' विभागः स्थापितो येषाम्।
अकर्मण्यत्वमेतेषां पुनर्नो भारते भूयात्॥१२॥

निठारी-मुक्तसर-हत्यासु लिप्तानां पिशाचानाम्।
अवश्यं दण्डनं स्यान्नो क्षमैषां भारते भूयात्॥१३॥

न कोऽप्यस्मिन्प्रकरणे राजनीतिं क्रीडतान्नेता।
न कोऽप्यपराधिनां पक्षी समस्ते भारते भूयात्॥१४॥

यथा परुदैषमश्च श्रूयते ध्वनिरस्य काण्डस्य।
तथा कस्यापि काण्डस्य ध्वनिर्नो भारते भूयात्॥१५॥

इमे शिशवो हि लुधियाना-गुरुद्वारेषु याचन्ते।
"निठारी-मुक्तसर-काण्डं पुनर्नो भारते भूयात्॥१६॥"
(रचनातिथिः १८.१.२००७)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दीपमाला

कार्तिके कृष्णपक्षे कुहूशर्वरी
दीपमालेति कृत्वा समामन्यते।
तत्र लक्ष्मीः समाराध्यते मानवैः
राजतां दीपमालेयमालोकिनी॥१॥

मान्यतां दीपमालेयमालोकिनी।
श्रीः समाराधिता स्यान्मनुष्यैः समै-
र्नाशिता स्यादलक्ष्मीः समेषां गृहे।
जीवनं कर्मठं स्यात्समेषां सदा
मान्यतां दीपमालेयमालोकिनी॥२॥ राजतां.....

दुःखदारिद्र्यरोगप्रवृद्धं तमो
नैव कुत्रापि दृश्येत भूमौ प्रभो!
सन्तु सर्वत्र सर्वे सदानन्दिताः
राजतां दीपमालेयमालोकिनी॥३॥ मान्यतां.....

भ्रातृभावेन सत्यश्रमाभ्यां तथा
लोकसेवाव्रतं पाल्यतां मानवैः।
अन्धकारं निराशाप्रसूतं दृढं
ध्वंसयेद्दीपमालेयमालोकिनी॥४॥ मान्यतां.....

मानसे मानसे नित्यमाशामयै-
र्दीपकैः सुप्रकाशः सदा कीर्यताम्।
द्वेषमुत्सार्य प्रेमव्रतं पाल्यतां
मान्यतां दीपमालेयमालोकिनी॥५॥ राजतां.....

क्षुद्रभावान् भृशं तर्जयन्ती नृणाम्
सौमनस्यं तथौदार्यमातन्वती।
अन्धकारात्प्रकाशं नयन्ती जगत्
राजतां दीपमालेयमालोकिनी॥६॥ मान्यतां.....

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वर्ण-दुर्वर्ण-रत्नैस्तथा धातुभिः
सर्वनृणां समृद्धिः सदा जायताम्।
अन्नवासोगृहै कार्यवृत्त्या जनान्
मोदयेद्दीपमालेयमालोकिनी॥७॥ मान्यतां.....

सन्ततं यत्तमोऽज्ञानरूपं क्षितौ
ध्वंसयेद्दीपमाला तदालोकिनी।
दुःखदारिद्र्यमस्त्यन्धकारः परो
नाशयेद्दीपमाला तमालोकिनी॥८॥ राजतां.....

कर्षकैरात्मघाताः क्रियन्ते हहा
तत्सुताः पीडिताः क्रन्दनं कुर्वते।
तान् समृद्ध्या श्रिया किञ्च पुष्ट्या भृशं
सान्त्वयेद्दीपमालेयमालोकिनी॥९॥ मान्यतां.....

ये बुभुक्षा-पिपासार्दिता मानवाः,
भैक्ष्यवृत्तिं श्रिता दीनदीनाः स्थिताः।
अन्नपानादिना कार्यवृत्त्या च तान्
पालयेद्दीपमालेयमालोकिनी॥१०॥ राजतां.....

यद्बलात्कार-हिंसा-वधूदाहजं
यच्च नव्यापराधप्रसूतं तमः।
क्रोधलोभोद्भवं कामजं यत्तमो
लोपयेद्दीपमाला तदालोकिनी॥११॥ मान्यतां.....

लोकसंमूढतायास्तमश्चातुरी-
पूरितैर्नेतृभिस्तन्यते या क्षितौ।
तत्तमो दारयेन्नैजदीप्रप्रभा-
लोकनैर्दीपमालेयमालोकिनी॥१२॥ मान्यतां.....

आत्मघाताक्रमैर्बम्बविस्फोटनैः
क्रूरकृत्यैश्च यैर्यैर्जगत्त्रास्यते।
भद्रमार्गं च तांस्तान् सकारात्मकं
दर्शयेद्दीपमालेयमालोकिनी॥१३॥ राजतां.....

Padma Shri Rama Kant Shukla Collection at Deva Rani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized By eGangotri and Sarayu Trust Foundation Delhi.

मार्गयन्यङ्गलं सर्वनृणां कृते
सर्वहृद्भ्यो निराशाश्च निःसारयेत्।
अर्थयेद्वै समृद्धिं समेषां नृणां
राजतां दीपमालेयमालोकिनी॥१४॥ मान्यतां.....

घ्रापयेद्वै सुगन्धं जनान् सर्वदा
श्रावयेद् भद्रभद्रांश्च शब्दान् जनान्।
दर्शयेद् भद्रभद्राणि दृश्यानि नृन्
उल्लसेद्दीपमालेयमालोकिनी॥१५॥ राजतां.....

गापयेद् भद्रगीतानि लक्ष्म्या जनैः
दापयेत् मङ्गलाशाः समेभ्यः समैः।
हापयेदन्धकारं दुराशाकृतं
दीपकैर्दीपमालेयमालोकिनी॥१६॥ मान्यतां....

नोऽपघाता जनान् बाधयेयुः क्षितौ
आसुरी शक्तिरास्तां न चोत्कर्षिणी।
दम्भदर्पाभिमानोन्नतिर्नो भवेद्
उल्लसेद्दीपमालेयमालोकिनी॥१७॥ राजतां.....

अस्तु लक्ष्म्याः प्रसादः समेषां कृते
कोऽपि रोगी दरिद्रो न दीनो भवेत्।
कायिकीं वाचिकीं मानसीं स्वस्थतां
वर्धयेद्दीपमालेयमालोकिनी॥१८॥ राजतां.....

अस्तु कारुण्यलक्ष्मीः प्रसन्ना शुभा
आत्मतन्त्रस्य लक्ष्मीः प्रसन्ना भवेत्।
साहसश्रीः प्रसन्ना जनान् प्रीणयेत्
मान्यतां दीपमालेयमालोकिनी॥१९॥ राजतां.....

कोऽपि न स्याज्जगत्यां बुभुक्षापरः
कोऽपि न स्याज्जगत्यां च वृत्तिं विना।
कोऽपि न स्याच्च दीनोऽथ भीतः क्षितौ
मान्यतां दीपमालेय मालोकिनी॥२०॥ राजतां.....

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

Published Digitized by Ganga and Sarayu Trust Foundation Delhi.

सन्तु सर्वे समेवां सहायाः सदा
वैरभावं परित्यज्य मैत्रीं श्रिताः।
स्युर्नरोऽन्योऽन्यमाङ्गल्यरक्षापरा
मान्यतां दीपमालेयमालोकिनी॥२१॥ राजतां.....

स्युः प्रजातन्त्ररक्षापरा मानवा
मानवा रक्षिताः स्युर्जगत्यां सदा।
प्राणिमात्रे दयावान्नरो जायताम्
मान्यतां दीपमालेयमालोकिनी॥२२॥ राजतां.....

यत्र यत्रान्धकारस्य सत्ता भवेत्
तत्र तत्र प्रकाशो जयेत् कान्तिदः।
स्यान्निराशा जिता नित्यमेवाशया
मान्यतां दीपमालेयमालोकिनी॥२३॥ राजतां.....

मानसे मानसे भावना पावनी
स्यान्न चित्तेऽस्तु कस्यापि दुर्भावना।
सौमनस्यं तथा भ्रातृभावं नृणाम्
वर्धयेद्दीपमालेयमालोकिनी॥२४॥ मान्यतां.....
(रचनातिथिः ८.११.२००७)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राजतां कालिदासः

पश्यन् पृथ्वीं गगनपथतो रामसीतामिषेण
शृण्वन् केकाममितसुखदां षड्जसंवादिनीं च।
वैचित्र्यं भूगतमति मुदा वर्णयन् मेघदूते
कालातीतः कविकुलगुरू राजतां कालिदासः॥१॥

काले काले भवतु सुखदा वृष्टिरस्मद्धरायाम्
सर्वो दुर्गं तरतु सकलो भद्रमाप्नोतु लोकः।
इत्थं काङ्क्षन् सकलजनतामङ्गलं स्वीयकाव्ये
चित्ते चित्ते कविकुलगुरू राजतां कालिदासः॥२॥

एकत्रास्ते भरतजननी विप्रलब्धा स्वभर्त्रा
तेजोमूर्तिर्लवकुशसुताऽन्यत्र सीता विभाति।
सिञ्चन्त्यास्तेऽपरत इह सा पादपान् शैलकन्या
रम्यैः काव्यैः कविकुलगुरू राजतां कालिदासः॥३॥

साक्षाद् दृश्यं प्रणतसुखदं वन्दमानोऽष्टमूर्तिम्
ग्रथ्नन् काव्ये शुभहिमनगं कीर्तयन् रामसेतुम्।
गृह्णन् पक्षं सकलजनताशाठ्यहीनप्रवृत्तेः
अस्मत्पूज्यः कविकुलगुरू राजतां कालिदासः॥४॥

(रचनातिथिः १७.१.२००८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आशा-महिमा

आशे! ते महिमानं
कः शक्तः पूर्णतो गातुम्।
ब्रह्मा हरिर्हरो वा
शेषो वा शारदा वापि॥१॥

जने जने त्वं व्याप्ता
कणे कणे त्वं निलीनासि।
सत्यं शिवं विधत्से
सुन्दरमथ यं जनं वृणुषे॥२॥

नास्तेऽलङ्कारो मे
वाचामास्ते तथा न गुणः।
आशां तथापि कुर्वे
तव गुणगानस्य मन्दमतिः॥३॥

नास्ते परीक्ष्यवादी
यस्त्वां दुःखं परं मनुते।
आशे! सुखं परं वै
त्वमेव जगतोऽवलम्बनमसि॥४॥

आशावाद्यहमासे
तत्प्रेरणया सुचारु जीवामि।
नैवापयातु सा मे
हृदयात् सञ्जीवनी शक्तिः॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लक्ष्यसुकल्पनमाशा
तामनुसृत्यैव जायते यत्नः।
प्रथमं तु योजना स्यात्
क्रियान्वयो भवति तत्पश्चात्॥६॥

आशा मरणासन्नं
पुरुषं स्पृष्ट्वा जिजीविषुं कुरुते।
किंकर्तव्यविमूढं
लक्ष्याप्त्यै प्रेरयत्याशा॥७॥

अन्धं तमो निराशा,
दिनमणिराशा जगद्धर्त्री।
यत्रालोकं विकिरति
तत्रोल्लासो नरीनृत्यति॥८॥

आशा धन्वनि मधुरं
जलं पिपासाहरं भवति।
आशा महासमुद्रे
पतितस्य कृते भवति पोतः॥९॥

'आशा परमं दुःखं'
भणितं येनास्ति नो स सुविवेकी।
नीरसजीवनभारं
निराशलोका वहन्ति पृष्ठेन॥१०॥

गिरिलङ्घनमतिकठिनं
यदा विजानाति पर्वतारोही।
आशा तदा तदीयां
द्रढयत्युत्साहभावनां त्वरितम्॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'आगच्छत्यागच्छ-
न्नास्ते प्रेयान् ममायास्यति।'
इत्याशया विरहिणी
नीरसरजनीं नयत्यखिलाम्॥१२॥

'सर्वोऽपि जनो यस्मिन्
कार्यरतः स्वावलम्बी स्यात्।
कालः स नूनमाया-
स्यत्या' शेयं सदा जयति॥१३॥

'अहमेव प्राथम्यं
स्पर्धायां धावनस्य लप्स्ये वै।'
क्रीडाङ्गणे प्रधाव-
त्याशाकान्ताप्रचोदितो युवकः॥१४॥

'द्रष्टुं मामागच्छति
सुरूपयुवकोऽद्य स्वीकरोतु स माम्'।
इत्याशयाद्य सज्जा
वरार्थिनी स्वेष्टदेवतां स्तौति॥१५॥

'भण भो गणक! कदा मे
प्रेयान् गृह्णाति मे पाणिम्?'
'अग्रिमवर्षे' श्रुत्वो-
त्तरमाशापूरिता बाला॥१६॥

'जन्मदिनं मम सम्मा-
नयितुं दूरादुपैति मे कान्तः।'
इत्याशयाद्य तरुणी
मुदिता मुदिता भ्रमति गेहे॥१७॥

Padma Shri Rama Kant Shukla Collection, Dr. Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'जाने, पराजितोऽहं
पूर्वं निर्वाचने स्वचरितेन।
आयत्यां विजयी स्याम्'
नेतारं प्रेरयत्याशा॥१८॥

'अनधिकृता नो वसति-
र्निर्वाचन आगते नूनम्।
स्यादधिकृते' ति चित्ते
लोका आशां सुपुष्णन्ति॥१९॥

'देशो मे स्वातन्त्र्यं
प्राप्स्यति नूनं बलिप्रदानेन।'
इत्याशया हुतात्मा
मृत्योः पाशं गले धृतवान्॥२०॥

'मम मृत्युदण्ड आजीवन-
कारावासदण्डतामेष्यति।'
इत्याशयापराधी कारा-
कष्टं मुदा सहते॥२१॥

'क्रोडे क्रीडिष्यति मे
स्तनन्धयः पूरिते काले।'
इत्याशया प्रसूः स्वं
गर्भं पालयति नव मासान्॥२२॥

'विद्यालये पठित्वा
योग्यः सन् लप्स्यते वृत्तिम्।'
इत्याशया पिता स्वं
पुत्रं विद्यालयं नयति॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'दास्यत्ययं मुखाग्निं
मेऽन्त्येष्ट्यां दुर्विनीतोऽपि।'
इत्याशयास्य सहते
सुतस्य जनकः कुचरितानि॥२४॥

'काश्यां मरणान्मुक्ति-
र्मे भविते' त्याशया रोगी।
मरणोत्सवं स्वकीयं
द्रष्टुं गङ्गातटे वसति॥२५॥

'अशरणशरणो भगवान्
मयि करुणां स्वां विधास्यती'त्याशा।
त्यक्ताशेषपरिग्रह-
मिमं जनं योजयति भक्त्याम्॥२६॥

'श्रीवेङ्कटेशदर्शनमाप्त्वा
सौख्यं प्रपद्येऽहम्।'
इत्याशयैव भक्तो दीर्घा-
ध्वानं विलङ्घयति॥२७॥

'लप्स्यामहेऽतिपुण्यं
माघे गङ्गाजले स्नात्वा।'
इत्याशयातिशैत्ये
व्रजन्ति कुम्भे जनाः स्नातुम्॥२८॥

दिगम्बराः श्रमणा अपि
तपन्ति घोरं तपोऽविरतम्।
कैवल्याशापूरित-
चित्ता गिरितुङ्गशृङ्गेषु॥२९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'कुसुमलता निष्पत्रा
कण्टकिनी नीरसा हन्त!
कदापि सरसा भविते-'
त्याशाश्वासयति रोलम्बम्॥३०॥

आत्मघातमिह कर्तुं
सज्जीभूतं जनं निवारयितुम्।
धृत्वा किमपि सुरूपं
द्रागेवाविर्भवत्याशा॥३१॥

'आशा बलवत्यास्ते'
व्यासोक्तमिदं वचोऽवधार्यं वै।
नैराश्यं कूहास्ते
तद्भञ्जकरविरिहास्त्याशा॥३२॥

'वर्ष्मणि वार्धक्यं ते!'
'का हानिस्तेन मे भवति?
अहमुपदेष्टा नृणां
जातोऽहं न त्यजाम्याशाम्'॥३३॥

'आशा नाम नदी'ति
प्रोक्ता हरिणा, भवति सत्यम्।
किन्तु न तस्याः पारं
कोऽपि जनो जगति यातोऽस्ति॥३४॥

अथ यद्याशासरितः
पारं कोऽपीह गच्छति महायोगी।
अलौकिकः सोऽस्ति जनो
लोकेनास्ते न तस्य सम्बन्धः॥३५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आशापाशशतैर्ये
बद्धा नैवासते लोकाः।
लक्ष्यभ्रष्टा इव ते
कर्तुं नो किमपि वाञ्छन्ति॥३६॥

यो जायते हताशो
जिजीविषा तस्य जायते क्षीणा।
यो जायते निराशस्त-
स्योत्साहोऽपि तं त्यजति॥३७॥

दृष्ट्वा ज्वालामुखिनः
स्फोटं भूकम्पताण्डवं दृष्ट्वा।
वह्नि-सुनामी-झञ्झो-
त्पातं दृष्ट्वापि नो बिभेत्याशा॥३८॥

सृष्टिस्थितिलयचक्रं
सदातनं भ्रामयत्याशा।
सैवास्ते प्रभुमाया
सैवास्ते जीवनालम्बः॥३९॥

'वर्षचतुर्दशकालं
नीत्वा विपिने ससीतसौमित्रिः।
आयास्यति मे तनयो
रामोऽयोध्यां यथाकालम्'॥४०॥

इत्याशयैव जीवति
कौसल्या पतिविहीनापि।
साकं सुमित्रयाथो
कैकेय्या तत्सुताभ्याञ्च॥४१॥ (युग्मकम्)

Padma Shri Rama Kant Shukla Collection, Bhoj Veda Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'दुःशासनस्य रुधिरं
पास्यति भीमो यथाप्रतिज्ञातम्।'
इत्याशयापमानं
पीत्वा कालं नयति कृष्णा॥४२॥

'नूनमयं जीविष्यति
दिव्या वाग्भणितवत्येवम्।'
पुण्डरीक-जीवातोराशां
कुरुते महाश्वेता॥४३॥

कृच्छ्रं तपो विधेयं
प्रेत्यानन्तं सुखं भवेद्येन।
क्षुद्रान् कामांस्त्यक्त्वा तपति
तपो ब्राह्मणः कृच्छ्रम्॥४४॥

'परलोको मे भवतात्
सुखपूर्णः क्लेशलेशरहितश्च।'
इत्याशया तपस्वी त्यजति
समान् लौकिकान् कामान्॥४५॥

'अजरामरवद्विद्यो-
पासननिष्ठो लसिष्यामि।'
इत्याशया स्वगेहे
ग्रन्थान् विविधांश्चिनोत्ययं प्राज्ञः॥४६॥

'स्थितिरियमास्ते ब्राह्मी
स्थित्वास्यामन्तकालेऽपि।
ब्रह्मपदं प्राप्स्यामी'
त्याशेरयति स्थितप्रज्ञम्॥४७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सन्ध्याकर्मणि सूर्यो-
पस्थानमनुः किमाशा नो।
'जीवेम वयं शरदः
शतं च पश्येम शृणुयाम'॥४८॥

आशा तृष्णा वा स्यात्
भवेत् पिपासा स्पृहा वापि।
अनया विना तु जीवन-
मास्ते निर्लक्ष्यमथ रुद्धम्॥४९॥

'इह जन्मनि यन्नाप्तं
भाविनि जन्मनि भवेत् प्राप्यम्।'
इत्याशयैवजीवो
नानायोनिषु परिभ्रमति॥५०॥

जह्यां धनागमाशा-
मथ जह्यां जीवनस्याशाम्।
किन्तु प्रभोरकारण-
करुणाशां वद कथं जह्याम्॥५१॥

'दधिभाण्डं भेत्स्यामो
नूनं जन्माष्टमीदिवसे।'
गोविन्दा इत्याशा-
भरिताः स्तूपं विनिर्मान्ति॥५२॥

'दधिघटभञ्जनखेला-
स्पर्धायां नो जयो भविता।'
गोप्यो मुम्बापुर्या-
माशासाना विलोक्यन्ते॥५३॥

Padma Shri Rama Kant Shukla Collection at Sarvodaya Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'अस्माकं सन्ततयो
दास्यन्ति जलाञ्जलिं श्राद्धे।
अस्मभ्यं' पितर इमा-
माशां न परित्यजन्ति पितृलोके॥५४॥

'परमेशो मयि करुणां
विधास्यती'त्याशया पूर्णः।
निष्कामः सन् भक्तः
सर्वान् कामान् परित्यजति॥५५॥

यद्याशया विहीनं
जगदिदमास्तां तदा भ्रातः!
संसारचक्रमेव
स्थगितं स्यान्नीरसं च स्यात्॥५६॥

'आशाधृतमिदमास्ते
जगदि' त्याभाणकोऽन्वर्थः।
आशाविहीनजनता
प्रविशत्यन्धं तमो दीना॥५७॥

आशैवास्त्यवलम्बन-
मिह लोके कालयापनस्य परम्।
आशां विना तु लोको
निष्क्रिय इव जायते नूनम्॥५८॥

'मम पुत्रोऽयं मूर्खः
स्यादेव कदाचन प्राज्ञः।'
इत्याशयास्य पित्रा
क्रियते कस्को न वा यत्नः?॥५९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'बसयानं गृह्णामी'
त्याशापूरितमना दिल्ल्याम्।
धावत्यनुबसयानं
तरुण इवायं नरो वृद्धः॥६०॥

शुक्ला वा स्यात् कृष्णा
वा स्यादभिसारिका युवतिः।
प्रियमिलनाशापूरित-
चित्ता गणयति न सृतिकष्टम्॥६१॥

अङ्गं गलितं पलितं
मुण्डं च मुखं दशनहीनम्।
भैक्ष्याशयैष नूनं
वनीयको यापयति कालम्॥६२॥

'मम कविता वा लेखो
नूनं पत्रे प्रकाशितो भविता।'
इत्याशया कविस्तं
सम्पादकपार्श्वमापयति॥६३॥

'अन्त्येष्टिं मे कुर्यात्-
स्वयमागत्येह शङ्करो नूनम्।'
इत्याशयास्य माता
संन्यासायानुमनुते तम्॥६४॥

विकचं कुसुमं दूरे
मकरन्दपरागसंवलितम्।
तन्मधुपानस्याशा
रोलम्बं धावयति तूर्णम्॥६५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'वेतनवृद्धिर्नः स्यादि'
त्याशापूर्णमानसाः श्रमिकाः।
कार्यावरोधघोषं
कृत्वा वेष्टनसृतिं समुपयान्ति॥६६॥

तृष्णा स्पृहा पिपासा
कोशे चाशासमार्थकाः प्रोक्ताः।
किन्त्वाशाव्युत्पत्ति-
र्व्याप्त्यर्थकधातुतो जाता॥६७॥

स्वादिगणीयो धातुः
पाणिनिना सम्मतो ह्यशू व्याप्तौ।
तस्मादाशा सिद्धा,
सा विश्वं व्याप्य जयति सदा॥६८॥

यथा व्यापको विष्णु-
र्लोकत्रितये तथैवाशा।
व्याप्येदं ब्रह्माण्डं
दुरत्यया जयति दुस्त्याज्या॥६९॥

'जीवनपर्यायः किम्?
अग्रेसरणस्य कास्ति परिभाषा?'
प्रश्नस्योत्तर'माशा'
द्विशब्दसिद्धं जयति लोके॥७०॥

'मूढ जहीहि धनागम-
तृष्णा'मिति वाक् प्रभाषितुं सरला।
किन्तु व्यवहर्तुमियं
कठिनास्तेऽसम्भवा चास्ते॥७१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

को नाशासंस्पृष्टः
संन्यासी वा गृही योगी?।
निःस्वो वा सधनो वा
बालो युवकोऽथवा वृद्धः॥७२॥

आशा कस्यापीयं
ज्ञानावाप्तेर्भवति लोके।
भक्त्यावाप्तेः कर्मा-
वाप्तेर्वा कस्यचिद् भवति॥७३॥

कस्यापि यशोऽवाप्ते-
राशा भवतीह संसारे।
जीवनमुक्तेरथवा
निर्वाणस्यास्ति कस्यचिच्चाशा॥७४॥

क्षुद्राणां कामानां
पूर्तेराशा न कर्तव्या।
किन्तूदात्तोद्देश्य-
प्राप्तेराशा तु करणीया॥७५॥

शकुन्तलाशासाना
पतियोगं काश्यपाश्रमभुवि।
परिधूसरे वसाना
वसने विरहव्रतं धत्ते॥७६॥

पतिराशा पत्न्याशा
माताशा जनक आशास्ते।
सन्तानमथो मित्रं
ह्याशारूपं जगत्सर्वम्॥७७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनसि सदा सुसमाधिनि
उदेत्युषेव स्मितास्याशा।
आशाभङ्गे सकलं
जीर्णारण्यं जगद्भवति॥७८॥

तुलसीदासस्याशा
रामोऽस्तीत्येव तेन कथितं वै।
मीराया आशास्ते
गिरिधरगोपालनागरः कृष्णः॥७९॥

बुभुक्षितस्याशास्ते
भोजनमुदरप्रपूर्तये यत्स्यात्।
नग्नस्य वस्त्रमास्ते
वासविहीनस्य गृहमाशा॥८०॥

तीर्थयात्रिणामाशा
पूर्णा स्यात्तीर्थयात्रायाम्।
ध्यानस्थस्याशेयं
'लयो भवतु मेऽप्रमेयेशे॥८१॥

'धर्मयात्रया मे स्यात्
कल्याणं किञ्च सन्तुष्टिः।'
इत्याशया सहन्ते
लोका मार्गस्य कष्टानि॥८२॥

'युगलं मे स्यात् सिद्धम्'
इत्याशापूरितानि सत्त्वानि।
वनाब्धिगिरिमरुभूमिषु
'डिस्कवरीचैनले' पश्य॥८३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'ग्रीष्मे भीष्मे पास्यति
जनो घटस्थं जलं शीतम्।'
इत्याशया कुलाल-
स्तापयति घटाननलगर्ते॥८४॥

'आयास्यत्यपराधी
कश्चित्प्रतिभूति-कार्यार्थम्।'
धर्मकञ्चुकं श्यामं
धृत्वायं प्राड्विवाक आशास्ते॥८५॥

गृहनिर्माणश्रमिका
आशायां वृत्तिलाभस्य।
तिष्ठन्ति राजमार्गे
वर्तनदातुः प्रतीक्षायाम्॥८६॥

'उत्पत्स्यतेऽत्र कश्चित्-
समानधर्मा ममायत्याम्।'
इत्याशया प्रणीते
भवभूतिः स्वाभिमतकाव्यम्॥८७॥

'अस्मद्देशो लभतां
क्रीडास्पर्धासु नैकासु।
महारजत-पदकानी'
त्याशास्ते देशजनतायाः॥८८॥

परिवारप्रमुखस्या-
शास्ते यन्मे कुटुम्बस्य।
सर्वे सम्मिल्य जनाः
कुर्युः प्रगतिं प्रतिष्ठां च॥८९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ग्रीष्मे भीष्मे गवया
यूथं निर्माय दूरमभियान्ति।
आशासाना 'लभ्यं
क्वचित्तडागे पयोऽस्माभिः'॥९०॥

सिंहा मृगाः करीन्द्राः
भल्लूकाः शूकरा महिषाः।
पानीयं जलमाप्तुं
विपिने भ्राम्यन्ति बद्धाशाः॥९१॥

आषाढस्य प्रथमे
दिवसे गर्जत्ययं मेघः।
कर्षण-बीजावापा-
वाशास्ते समयतः कृषकः॥९२॥

'अन्तर्वर्त्नी धेनुः
प्रसूय वत्सं यथाकालम्।
मम पुत्रार्थं दास्यति
पयो'जयति मातुराशेयम्॥९३॥

पारावतदम्पत्यो-
राशेयं स्याच्चिरञ्जयिनी।
अस्मत्पोतो गगने
समयेनोत्पततु वर्धितो भूत्वा॥९४॥

विडालिकाया आशा
'मूषिकलब्धिर्भवेन्मह्यम्'।
श्येनस्याशास्तीयं
'पक्षी लभ्यो मया भुक्त्यै'॥९५॥

Padmal Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुरोहितानामाशा
'यजमानानां समृद्धिः स्यात्।
बहु देयमस्तु तेषां
योगक्षेमं चलतु येन'॥९६॥

ग्रन्थिभेदकानामिय-
माशास्ते 'यात्रिणः सर्वे।
पुष्कलधनं गृहीत्वा
गृहाच्चलेयुः स्वयात्रार्थम्'॥९७॥

भिक्षूणामियमाशा
'भैक्ष्यं लभ्येत नः प्रचुरम्।'
आशेयमातुराणां
'स्वास्थ्यं संलभ्यमस्माभिः'॥९८॥

आशास्यते सुगुरुभिः
'परिणामः स्यात्परीक्षायाः।
एवम्भूतो यत्र
श्रेष्ठोऽस्मच्छिष्य एव स्यात्'॥९९॥

'सम्पूर्णा दिल्लीयं
ममैव बसयानमारोहतु।'
संवाहक आशास्ते
'ब्लू' बसयानस्य यात्रिरिपुः॥१००॥

अध्यापकस्य चाशा
सच्छिष्योऽस्तीति मन्येऽहम्।
शिष्याणामाशास्ते
सद्गुरुरित्यत्र नास्ति सन्देहः॥१०१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भूकम्पजन्यमृत्यो-
स्ताण्डवमपि तर्जयत्याशा।
साहाय्यकर्मकृद्भिः
स्थाप्यन्तेऽनाश्रिता लोकाः॥१०२॥

नियतिकृते संसारे
परमं दुःखं भवत्वाशा।
कविरचिते संसारे
परमसुखं नित्यमियमाशा॥१०३॥

मार्गे प्रसूय पुत्रीं
माता तु मृता, परं पुत्री।
जीवत्यनाथनिलये
स्वस्था, जय जीवनाशे त्वम्॥१०४॥

'मम नास्ते काप्याशा
त्यक्ष्याम्यधुना सुखेन मे प्राणान्।'
अत्राप्याशा दुःखाद्
ऋते स्थिता प्राणमोक्षस्य॥१०५॥

'न कामयेऽहं राज्यं
न स्वर्गं नापुनर्भवं किन्तु।
आर्तजनानामार्ति-
र्नश्यत्वे'षा जयत्वाशा॥१०६॥

'नहि किञ्चिदहं याचे
किन्तु दिदृक्षे पदं शैवम्।'
अप्पयदीक्षितकथने
नास्त्याशा किं समुल्लसिता?१०७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

धृतषोडशशृङ्गारा
मुकुराग्रे या स्थिता तन्वी।
तस्या आशास्ते किल
दयितो धावन् गृहं प्राप्तः॥१०८॥

'पुत्राच्छिष्याद्वा स्यात्
पराजयो मे सभामध्ये।'
पितुर्गुरोर्वा जयता-
दियमाशोदारचित्तस्य॥१०९॥

आशेयं जयिनी स्यात्
'हिसां जेष्यत्यहिंसैव।
जेष्यत्यभावसङ्घं
नित्यसमृद्धिः सकलविश्वे॥'११०॥

आशेयं जयिनी स्या-
न्निरागसां स्यान्न संहारः।
आशेयं जयिनी स्या-
न्न वृत्तिहीनो भवेत्कोऽपि॥१११॥

सम्पूर्णजीवनेऽथो
सत्यश्रमपरहितादिभिः सततम्।
परलोकनिर्मितेर-
प्याशा कथमिव परित्याज्या॥११२॥

यदि च कुसङ्गं त्यजसि न,
पूज्यानां त्वमपमानमथ कुरुषे।
बन्धो त्वया कदाचन
कुशलस्याशा न कर्तव्या॥११३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'आमृत्योः श्रियमिच्छेत्
नैनां मन्येत दुर्लभां मनुजः।'
इयमुक्तिः किं कथयति?
'आशास्ते मूलमुन्नत्याः'॥११४॥

दुर्व्यसनेषु पतित्वा
स्वास्थ्यं यदि नाशयिष्यसि रे!
प्रभुरेव रक्षकस्ते
कः कुर्यात्तव शिवस्याशाम्॥११५॥

'सर्पे वा हारे वा
सुहृदि रिपौ वा मणौ लोष्टे।
समदृष्टेर्मम दिवसा
यान्त्वि'त्यत्रास्ति किं नाशा?॥११६॥

'अमरसरित्स्यात्तटिनी
देवोऽपि स्यान्महादेवः।
वटविटपो दयिता स्या-
द'त्रापि न किं लसत्याशा॥११७॥

मोघाशा नो कार्या-
ऽमोघा कार्या सदैवाशा।
पौरुषमपरिज्ञाय
त्वया न कार्या कदाप्याशा॥११८॥

आशाभावेऽधीति-
र्भरणं पुष्टिस्तथा स्वास्थ्यम्।
उन्नतिरुल्लासो वा
सर्वं व्यर्थं प्रतीयते नूनम्॥११९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आशासद्भावे सति
दारिद्र्यं रुग्णता तथाभावः।
दैन्यमुपेक्षा जडता
सर्वं रमणीयतां याति॥१२०॥

आशे! त्वां खलु वच्मि
त्याज्योऽहं नो त्वयास्मि ते प्रणयी।
त्यक्तस्त्वया यदि स्यां
निर्जीवोऽहं भविष्यामि॥१२१॥

जयतान्ममेयमाशा
'देशे सर्वः सुखी स्यान्ना।
सर्वो निरामयः स्यात्
सर्वः पश्येत्तथा भद्रम्'॥१२२॥

आशेयं किल जयतात्
'वसुधैव कुटुम्बकं समेषां स्यात्।
शोषणहीनमदीनं
सुखशान्तिमयं जगद् भवतात्॥१२३॥

अत इदमुचितं नास्ते
कथनं- 'दुःखस्य कारणं ह्याशा'।
कर्म ज्ञानं भक्तिः
सर्वेषां मूलमस्त्याशा॥१२४॥

आशा बन्धो वा स्या-
दाशा पाशोऽथवा भवतात्।
आस्तामाशा वायु
र्वाशास्ते जीवनालम्बः॥१२५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विफलीभूतैश्छात्रैः
कदापि हेयास्ति नैवाशा।
आगामिनी परीक्षा
तेभ्यो दास्यति समधिकाङ्कान्॥१२६॥

ईश्वरकरुणावाप्ते-
राशा त्याज्या न मनुजेन।
आशा नो हातव्या
स्वोत्कर्षस्याथ केनापि॥१२७॥

क्षुद्राणां कामानां
पूर्तेराशा न कर्तव्या।
किन्तूदात्तोद्देश्य
प्राप्तेराशा तु करणीया॥१२८॥

आशा स्पृशति जनं यं
स हि मनुजः सुन्दरो भवति।
आशा त्यजति जनं यं
तस्यास्ते जीवनं व्यर्थम्॥१२९॥

आशा न परमदुःखं
सुखार्जनस्यास्ति मूलमियम्।
छिन्ने मूले न स्यात्
पत्रं पुष्पं तथा च फलम्॥१३०॥

अहमस्म्याशावादी
सास्ते मे प्रेरणादात्री।
नैवापयातु सा मे
हृदयात्सञ्जीवनी शक्तिः॥१३१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आशाभङ्गो मास्तां
कस्यापि जनस्य परमेश्वर!
इति याचे त्वां विनतः
आशां मे त्वं प्रभो पूरय॥१३२॥

आशा दासी नुः स्यात्
आशाया वास्तु दासो ना।
सम्बन्धस्त्वाशायाः
नरेण साकं भवत्येव॥१३३॥

श्रीकालिदास-काव्ये
बाणकृतौ चान्यकविकृतिषु।
आशाया माहात्म्यं
प्रगीतमास्ते कनकवर्णैः॥१३४॥

एकस्मिन् दिवसे नो
सौराज्यं नूनमायास्यति।
यत्र नृहत्यापहरण-
बलात्कृतीनां विलोपः स्यात्॥१३५॥

घातक रसायनैर्नो
मोचाम्रफलानि पक्ष्यन्ते।
सूची प्रयोगपीवर-
शाका नोत्पादयिष्यन्ते॥१३६॥

मेदोऽस्थिरसैः शुद्धं
घृतं न निर्मास्यते धूर्तैः।
दुग्धं च मनुजपेयं
न यूरियाशैम्पुरङ्गाद्यैः॥१३७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वृत्तिविहीनो भवताद्
अस्मद्देशे न कोऽपि जनः।
नो रोगी नो पतितो
न वापमानित इहास्तु जनः॥१३८॥

इत्याशां कुर्वाणा
भारतदेशस्य नागरिकाः।
चिन्ताचुम्बितचित्ताः
ग्रामे नगरेऽद्य दृश्यन्ते॥१३९॥

'सुरसेव मूल्यवृद्धि-
र्व्यावृतवदना नियन्त्रिता भविता।
हन्त कदापी'त्याशा
लोकेभ्यः सम्बलं दत्ते॥१४०॥

मा कुरु याच्ञ्यां, मा भव
दीनः कस्यापि नुः पुरतः।
आशां परं त्यज त्वं
नो सत्कार्यस्य संसारे॥१४१॥

'कृषको न कोऽपि कुर्याद्
आत्महतिं हन्त! देशेऽस्मिन्'।
इत्याशा करणीया
तदुचितयत्नाश्च करणीयाः॥१४२॥

'पुनरायास्यति देशे
विदेशकोशस्थितं वित्तम्।
इत्याशा नो त्याज्या
तदुचितयत्नाश्च करणीयाः॥१४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दुर्बलघातो देशे
क्वचिदपि दृष्टौ भविष्यति नो।
इत्याशा करणीया
तदुचितयत्नाश्च करणीयाः॥१४४॥

त्यक्ष्यति देशे प्राणान्
नहि कोऽपि बुभुक्षया ग्रस्तः।
इत्याशा करणीया
तदुचितयत्नाश्च करणीयाः॥१४५॥

'हठसम्भोगोदन्ता
निर्दोषानृणां तथा घाताः।
नो द्रक्ष्यन्ते देशे'
करणीयेयं सदैवाशा॥१४६॥

'देशे सर्वकरेभ्यः
कार्यं सुलभं भविष्यती'तीयम्।
आशावश्यं कार्या
तां पूरयितुं च यत्न आचर्यः॥१४७॥

श्रमिणां कर्मकराणां
कृषकाणां शिल्पिनाञ्चैव।
जीवनयापनसुविधा
निश्चित्याशा तु कर्तव्या॥१४८॥

त्याज्याशा देशस्य
प्रगतिविकासोन्नतीनां किम्?
विश्वस्याथो शान्ते-
राशा किं नैव कर्तव्या?१४९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आशेयं पूर्णा स्यात्
'सर्वे सर्वत्र सुखिनः स्युः
सर्वे निरामयाः स्युः
सदा समेषां शुभं भूयात्॥'१५०॥

आशैवास्ते जीवन-
माशैवास्ते च सक्रियता।
आशैवास्ते स्फूर्ति-
नैराश्यं जीवनाभावः॥१५१॥

आशा जिजीविषास्ते
कर्मठता साहसं तथैवाशा।
आशा रसायनं किल
नैराश्यं त्वस्ति नीरसता॥१५२॥

आशाया वैफल्ये
नैव विषादं नरः कुर्यात्।
आशायाः साफल्ये
जनोऽतिहृष्टोऽथ नैव स्यात्॥१५३॥
(रचना पूर्ति तिथिः २४.१२.२००८)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मम जननी

मां धृत्वा गर्भे नवमासान्
गृहकर्मपरा नित्यं हृष्टा।
भगवन्तं ध्यायन्ती कुशलं
मे कांक्षन्त्यासीन्मम जननी॥१॥

मामजीजनद् वात्सल्यमयी
सोढ्वा प्रसवस्य परां पीडाम्।
मामपाययत् स्वीयं स्तन्यं
मम पुष्ट्यै तुष्ट्यै मम जननी॥२॥

वर्षाशीतोष्णोत्थं कष्टम्
शैशवेऽथ पौगण्डे वा या।
आसीत् दूरीकर्तुं नित्यं
यतमाना वन्द्या मम जननी॥३॥

मां पालयितुं मां लालयितुं
मां ताडयितुं मां सान्त्वयितुम्।
अगणितयत्नस्था प्रभुरासीद्
वन्दनीयचरणा मम जननी॥४॥

कैशोरे विद्यालयं यदा
गच्छामि स्माहं मित्रैः सह।
पाथेयं मह्यं नित्यमदात्
सा धन्या वन्द्या मम जननी॥५॥

यौवने दिदृक्षुः पुत्रवधूं
सुन्दरीं सुशीला कर्मण्याम्।
वस्त्राभरणं तत्कृतेऽनुरूपं
चिन्वानासीन्मम जननी॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दुहिता भगिनी जाया याता
सा पितृष्वसा सा पितामही।
अथ भूत्वा मातामही कुटुम्बं
सेवित्वाऽयान्मम जननी॥७॥

पौत्रान् दृष्ट्वा सेवित्वा गां
सम्भाष्य सन्ततीः स्वस्थेव।
दत्वाशीर्वादान् सर्वेभ्यः
स्वर्गता शतायुर्मम जननी॥८॥

या त्यागमयी वात्सल्यमयी
श्रमपरा तथेशध्यानपरा।
अस्मासु च करुणामयी सदा
सा जयति वदान्या मम जननी॥९॥

तस्यां जीवन्त्यामहमासम्
बालोऽपराधकर्माधिकृतः।
पुरुषं विधाय मां गंभीरं
स्वर्याता वन्द्या मम जननी॥१०॥

सा प्रियंवदा प्रियकर्मपरा
सा क्षमामयी सा दयामयी।
छत्रं परिवारशिरस्यासीत्
सुखदा शुभदा सा मम जननी॥११॥

(रचनातिथिः - 28.11.2009)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गुर्जरीयां धरां तां नमामो वयम्

श्लाघनीया त्रिलोक्यां मता रत्नसूः
वन्दनीयं च तत्रास्ति मे भारतम् ।
कीर्तनीया च तत्रापि या राजते
गुर्जरीयां धरां तां नमामो वयम् ॥१॥

आतिथेयाः जनाः, सात्त्विकं भोजनं,
स्वावलम्बोद्यमो भक्तिभावो हृदि ।
यत्र वाङ्माधुरी शास्ति दृप्तान् जनान्
गुर्जरीयां धरां तां नमामो वयम् ॥२॥

अक्षराद्ये शुभे धाम्नि कर्णावती-
पूःस्थिते यत्र रात्रौ जलीये पटे ।
नाचिकेतीयवृत्तं प्रतिक्षिप्यते
गुर्जरीयां धरां तां नमामो वयम् ॥३॥

यत्र कण्ठीरवाणां ध्वनिः श्रूयते
यत्र चाब्धेस्तरंगध्वनिः श्रूयते ।
गायकानां ध्वनिर्यत्र च श्रूयते
गुर्जरीयां धरां तां नमामो वयम् ॥४॥

श्यामलारण्यभूम्या तथोद्यानकैः
राजमार्गैस्तटाकैश्च विद्यालयैः ।
मन्दिरैर्मस्जिदैर्यास्ति संशोभिता
गुर्जरीयां धरां तां नमामो वयम् ॥५॥

भूमिकम्पं विषह्यापि भीता न या
चिन्तिता नापि या वीक्ष्य चोपद्रवान् ।
या चतुर्दिग्-विकासं समाकांक्षति
गुर्जरीयां धरां तां नमामो वयम् ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्र सिद्धेश्वरी यत्र चाम्बा परा
यत्र सोमेश्वरो भक्तकल्पद्रुमः ।
आस्तिकेभ्यो ददत्यात्मतुष्टिं च या
गुर्जरीयां धरां तां नमामो वयम् ॥७॥

यत्र च द्वारकाधीश आराध्यते
यत्र च श्रीभवो नाथ आराध्यते ।
दत्तपादाम्बुजानां च यत्रार्चना
गुर्जरीयां धरां तां नमामो वयम् ॥८॥

भारतस्य प्रतिष्ठां सुपुष्टिं तथा
वर्धयन्ती विकासं तथा नूतनम् ।
भक्तिभावं दधाना च या मानसे
गुर्जरीयां धरां तां नमामो वयम् ॥९॥

साभ्रमत्यास्तथा नर्मदाया जलैः
किञ्च तापी-मही-पुष्टिदैर्वारिभिः ।
सेचिता या प्रसन्ना सती राजते
गुर्जरीयां धरां तां नमामो वयम् ॥१०॥

यास्त्यहिंसा-तपस्यास्थली विश्रुता
धर्म-कामार्थ-मोक्षप्रदा पावनी ।
यत्र सत्यप्रयोगाः कृता गान्धिना
गुर्जरीयां धरां तां नमामो वयम् ॥११॥

यत्र रत्नाकरस्यातिरम्ये तटे
सोमनाथस्य लब्ध्वा प्रसादं शुभम् ।
जायते धन्यधन्यो जनो जीवने
गुर्जरीयां धरां तां नमामो वयम् ॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वामिनारायणः स्वोपदेशैः शुभैर्
लोकमुद्बोध्य जातोऽस्ति वन्द्यो नृणाम् ।
यत्र कृष्णप्रणामी च संमोदते
गुर्जरीयां धरां तां नमामो वयम् ॥१३॥

स्वामिनारायणाख्ये गुरूणां कुले
दर्शनाख्ये च गीर्वाणवाणीगृहे ।
भारतस्यायतिर्यत्र संरक्ष्यते
गुर्जरीयां धरां तां नमामो वयम् ॥१४॥

श्रीदयानन्द-गान्धी-पटेलोपमाः
यत्सुता विश्वसत्प्रेरणादायकाः ।
डाण्डियारास आस्ते च यस्याः श्रुतो
गुर्जरीयां धरां तां नमामो वयम् ॥१५॥

यत्र गर्बाभिधानं हि सन्नर्तनं
दर्शका वीक्ष्य मोदं परं लम्भिताः ।
सत्कला यत्र चित्तं चमत्कुर्वते
गुर्जरीया धरां तां नमामो वयम् ॥१६॥

गाँठिया-फाफड़ा-खाकरा-भाखरी-
ढोकला-खम्मणाद्यैर्बहुव्यञ्जनैः ।
षड्रसैस्तर्पयन्त्यस्ति यागन्तुकान्
गुर्जरीयां धरां तां नमामो वयम् ॥१७॥

वेदपाठस्य घोषेण सम्पूरिता
या च कम्प्यूटरीयप्रकर्षान्विता ।
सत्कलाधारिणी या विकासैषिणी
गुर्जरीयां धरां तां नमामो वयम् ॥१८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इन्धनान्वेषणं तैलसंशोधनं
कर्षणं सत्कथाश्रावणं कुर्वती ।
यास्त्यहिंसारसेन प्रपूर्णा प्रपा
गुर्जरीयां धरां तां नमामो वयम् ॥१९॥

लोकगीतेषु चित्तं यदीयं रतं
लोकनृत्येषु चित्तं यदीय रतम् ।
लोककृत्येषु चित्तं यदीय रतं
गुर्जरीयां धरां तां नमामो वयम् ॥२०॥

नर्तकैर्वादकैर्गायकैर्नेतृभिः
साधकैः सद्भिरुद्योगसञ्चालकैः ।
देशभक्तैर्बुधैश्चास्ति यालंकृता
गुर्जरीयां धरां तां नमामो वयम् ॥२१॥

सागरीयैस्तटैः कच्छभूधन्वना
जंगलैरद्रिभिश्चोर्वरैः क्षेत्रकैः ।
राजमार्गैश्च या यन्त्रगेहैर्युता
गुर्जरीयां धरां तां नमामो वयम् ॥२२॥

यत्र चोषानिरुद्धप्रसिद्धा कथा
श्राव्यते माणभट्टैः रसैरन्विता ।
वादयद्भिर्घटं रञ्जयद्भिर्जनान्
गुर्जरीयां धरां तां नमामो वयम् ॥२३॥

गीयते लोकगीतेषु शम्भोः कथा
गायकैर्भव्यवेशैस्तथा सुस्वरैः ।
पठ्यते यत्र दोहा च तारस्वरैर्
गुर्जरीयां धरां तां नमामो वयम् ॥२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विश्वकोषोपमो लब्धवाणीवरः
संस्कृत-प्राकृत-ग्रन्थकर्ता महान् ।
हेमचन्द्रः प्रसिद्धः प्रदत्तो यया
गुर्जरीयां धरां तां नमामो वयम् ॥२५॥

रामगाथाप्रणेता कविर्नर्मदः
कृष्णभक्तो नृसिंहस्तथा मेहता ।
यत्र भक्तिप्रवाहेण लोकश्रुतौ
गुर्जरीयां धरां तां नमामो वयम् ॥२६॥

डोंगरेजी-सदृक्षैस्तथा कृष्ण-
चन्द्रोपमैः शास्त्रिभिः सेविताजीवनम् ।
श्रीमुरारी रमेशश्च यत्पुत्रकौ
गुर्जरीयां धरां तां नमामो वयम् ॥२७॥

माधवो हर्षदेवोऽथ नानावटी
राजपूर्वो रसो वासुदेवाभिधः ।
यत्र चान्येऽपि सत्काव्यकाराः श्रुताः
गुर्जरीयां धरां तां नमामो वयम् ॥२८॥

'देवसायुज्य'-'बोरी'-प्रदीपा'दिभिः
पत्रकैः सावधीयैः सुसंसेविता ।
'वर्तमानेन पत्रेण'या कीर्तिता
गुर्जरीयां धरां तां नमामो वयम् ॥२९॥

या प्रबन्धस्य विद्यालयैर्भूषिता
यास्ति विज्ञानसंरक्षिका विश्रुता ।
यत्र वाणिज्य-विद्याविकासो नवो
गुर्जरीयां धरां तां नमामो वयम् ॥३०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतस्य प्रतिष्ठां सुपुष्टिं यशो
वर्धयन्ती विकासं तथा नूतनम् ।
भक्तिभावं दधाना च या मानसे
गुर्जरीयां धरां तां नमामो वयम् ॥३१॥

शोषितो यत्र कश्चिन्न संलक्ष्यते
व्याधिना पीडितो नो तथा दृश्यते ।
यत्र नो कोऽपि दीनोऽस्ति हीनोऽथवा
गुर्जरीयां धरां तां नमामो वयम् ॥३२॥

अद्य देशे समस्तेषु राज्येष्वहो
यत्र सौशासनं निस्तुलं राजते ।
वर्धते यत्र मोदो समेषां नृणां
गुर्जरीयां धरां तां नमामो वयम् ॥३३॥

(रचनातिथिः - 18.2.2012)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यदा वित्ते मनो लग्नं,
कवित्वं मे तिरोभूतम्।
यथार्थं पश्यतो जगतः,
कवित्वं मे तिरोभूतम्॥१॥

मनो मे वीक्ष्य चारित्र्यं
निजानां हन्त! तृ
उदासीनं यदा जातं,
कवित्वं मे तिरोभूतम्॥२॥

गता सुहृदो दिवं नैके
तथा सम्बन्धिनो रुष्टाः?
मनो निर्विण्णतां यातं,
कवित्वं मे तिरोभूतम्॥३॥

यदा पक्षे धनान्धानां
मया जयघोष उद्घुष्टः।
उपेक्षाया दरिद्राणां,
कवित्वं मे तिरोभूतम्॥४॥

विपर्यस्तेषु सम्बन्धेषु
वैदुष्ये घनीभूते।
तथा तर्कोदये चित्ते,
कवित्वं मे तिरोभूतम्॥५॥

यदा धनलोभतो गीता
मया गाथाऽविनीतानाम्।
तदा तेजो विलुप्तं मे,
कवित्वं मे तिरोभूतम्॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यदा मयका स्तुताः षिड्गा
दयारहिताः पिशाचाभाः।
मृतो वाचां विलासो मे,
कवित्वं मे तिरोभूतम्॥७॥

अदण्ड्या दण्डिता जाता-
स्तथा दण्ड्या त दण्डयन्ते।
विलोक्यैतत् विपर्यासं
कवित्वं मे तिरोभूतम्॥८॥

धनं देशस्य नेतारो
विदेशे स्थापयन्ति यदा।
मलीमसकर्म कुर्वाणाः
कवित्वं मे तिरोभूतम्॥९॥

यदाहं बुद्धिजीवीसंज्ञको
जीवोऽभवम् बन्धो!
कुतर्काभ्यासितां यातः,
कवित्वं मे तिरोभूतम्॥१०॥

यदा मुखतां गतोऽहं
वञ्चकानां धूर्तसंघानाम् ।
अमानुषकार्यकर्तृणां
कवित्वं मे तिरोभूतम्॥११॥

यदा शिक्षाव्रतांश्छात्रान्
समाप्यापि स्वमभ्यासम्।
अहं वृत्तिं विना वीक्षे
कवित्वं मे तिरोभूतम्॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रजातन्त्रे प्रजानामेव
दुरवस्थां यदा वीक्षे।
तदा कुण्ठाजले मज्जत्
कवित्वं मे तिरोभूतम्॥१३॥

यदा वै लेखकाः सम्पादकाः
देशस्य खण्डार्थम्।
ददति वक्तव्यमधिकृत्या
कवित्वं मे तिरोभूतम्॥१४॥

मया पाण्डित्यपटुता क्लिष्ट-
कल्पनमथ कृते साध्ये।
सचेतःक्षोभकरणार्थं,
कवित्वं मे तिरोभूतम्॥१५॥

यदाहं भारभूतः सन्
सचेतश्चित्तकष्टकरः।
सभामध्येऽभवं क्रूरः
कवित्वं मे तिरोभूतम्॥१६॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुस्तकम्

ज्ञानविस्तारकं प्रेरणाकारकं
भावनाधारकं मूढतादारकम्।
शोकसंहारकं स्फूर्तिसञ्चारकं
जाड्यसन्तारकं राजते पुस्तकम्॥१

पुस्तकस्थापि विद्या भवेद्रक्षिता
पुस्तकं मित्रवच्छास्ति तत्पाठकम्।
अन्धकारात्प्रकाशं नयेन्मानवं
सेवितं सादरं मोददं पुस्तकम्॥२

नैकलिप्यङ्कितं नैकवर्णैर्युतं
नैकरूपान्वितं नैकनामोज्ज्वलम्।
नैकसिद्धान्त-नानाकथाराजितं
वन्दनीयं च सेव्यं जनैः पुस्तकम्॥३

मानवो यत्क्षणे स्याद्विषण्णस्तदा
दर्शयेत्पुस्तकं तस्य मार्गं ध्रुवम्।
संशयच्छित् परोक्षार्थसन्दर्शकं
विश्वनृणां समायोजकं पुस्तकम्॥४

ताडपत्रेषु वा भूर्जपत्रेषु वा
क्रोडपत्रेषु वा ताम्रपत्रेषु वा।
स्वर्णपत्रेषु वा प्रस्तरेऽथापि वा
लेखितं टङ्कितं वन्द्यते पुस्तकम्॥५

स्वर्णवर्णैस्तथा कृष्णवर्णैर्युतं
ज्ञानबीजाक्षरैः पूरितं यद्भवत्।
देशिकोक्तं च यद्धन्ति चेतस्तम-
स्तत्सुवन्द्यं समेषां नृणां पुस्तकम्॥६

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मूषिका-पत्तिका-कीट-वर्षाजलै-
नाश्यते प्रायशोऽरक्षितं पुस्तकम्।
मित्र! तेभ्यः सदा रक्षणीयं त्वया
स्वीयकक्षस्थितं ज्ञानदं पुस्तकम्॥७

पुस्तकागारसंस्थापितं पाठकै-
नैव चेत्पठ्यते नाप्यथो बुध्यते।
नैव वा शोध्यते नैव वाभ्यस्यते
निष्फलं सत्तदा खिद्यते पुस्तकम्॥८

मूर्खहस्ते गतं धूलिभिर्दूषितं
तैलनीरादिभिस्त्रासितं ग्लायति।
किञ्च कण्ठे स्थितं व्याकृतं सद्गिरा
शोभते विज्ञसंसेवितं पुस्तकम्॥९

यद्धि मेलापके पण्यवद्भासते
यच्च गेहे स्थितं रत्नवद् द्योतते।
उद्धृतं विज्ञगोष्ठीषु यज्जृम्भते
तन्न कस्य प्रियं स्यात्सखे पुस्तकम्॥१०

ग्रन्थकृद्भिस्तथा वर्णसंयोजकैः
पाठसंशोधकैश्चाथ मुद्रापकैः।
चित्रकारैस्तथा सावधानैर्ध्रुवं
प्रस्तुतं सज्जितं भाति सत्पुस्तकम्॥११

ग्रन्थकर्तुस्तपस्यां तथा जीवनं
तस्य सत्प्रेरणां पाठकानां कृते।
नैजचित्ते दधत् शोभते सर्वदा
ज्ञानविज्ञानदं मित्र सत्पुस्तकम्॥१२

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शीतलहरी!

इयं प्राप्ता संक्रान्तिरथ मकरस्यामितगुणा
तिलोत्पादान् मिष्टान् ददति हि गुरुभ्योऽत्र महिलाः।
तदाशीर्वादैस्ता मनसि मुदिताः कान्तसहिताः
पतिं पत्नीं प्रेम्णा मदयति शुभा शीतलहरी॥१॥

इमे ये निर्मान्ति श्रमिकनिवहाः स्विन्नवदनाः
बहूच्छ्रायं गेहं सुविपणिमथो राजसरणिम्।
अथ क्षेत्रे रात्रौ ददति सलिलं ये च कृषकाः
तदुत्साहं छेत्तुं (भंक्तुं) प्रभवति न वै शीतलहरी॥२

यदा नन्तुं लब्धुं तरितुमथ पातुं गणयितुम्
जना गंगां पुण्यं भवजलधिमापः प्रभुगुणान्।
हरद्वारे कुम्भे विदधति महामेलनमहं
तदा माघे मासे भवति विवशा शीतलहरी॥३

कवोष्णा आपो वै स्नपनविधये सन्ति लषिताः
जनैर्भोक्तुं काम्यास्तिलगुडकृता गज्जकगणाः।
विभिन्नान् संयावान् लवणसहितान् पक्ववटकान्
सखे! माघे मासे रसयति जनान् शीतलहरी॥४

गृहे स्थित्वा लोकः स्वदति समुदं पक्ववटकान्
मनुष्याः सेवन्ते मृदुसुखकरं स्वापपटकम्।
घना कूहा व्योम्नि स्थगयति रविं चन्द्रसदृशं
सखे माघे मासे शिशिरयति नृन् शीतलहरी॥५

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

खगा भीता भीताः शिशिरमथिता वृक्षनिलयाः
रवेस्तापाकांक्षी श्व-गवय-गवां भ्राम्यति गणः।
अथो सत्त्वोद्याने कुहरशयितः श्वापदगणः
सखे! माघे मासे व्यथयति जनान् शीतलहरी॥७

हिमानी-कूहाभ्यां प्रखरहिमवायुप्रसरणै-
र्विमानप्रस्थानं स्थगितमथ गन्त्र्याः प्रचलनम्।
तथापीच्छन् पान्थः सरससुखयात्रा-व्रतमहो!
सखे! माघे मासे द्रढयति जनान् शीतलहरी॥८

●

Padma Shri Rama Kant Shukla Gold Medal Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निदाघ-दिवसा इमे!

निदाघदिवसा इमेऽतिभयदा जगत्प्राणिनां
भयंकरकरैर्युतो रविरयं ललाटन्तपः।
कृतान्तरसनोपमा वहति चोष्णवातावली
परंतु नहि दृश्यते गगनमण्डले तोयदः॥१॥

प्रचण्डकिरणैः रवेर्भुवनमण्डलं ताप्यते
मनुष्यपशुपक्षिभिः पदमनातपं मृग्यते।
समे मुदमवाप्नुवन्ति पथिकास्तरुच्छायया
जलं समभिकांक्ष्यते प्रतिपलं पिपासाकुलैः॥२॥

भयंकरकरे रवौ क्षिपति तूर्णमंगारकान्
भुवि प्रखरमारुतैरसुमुचो बहून् पादपान्।
सुतानिव दयापरो ह्यवति हन्त माली कृती
जलेन परिषेचितानविगणय्य नैजं क्लमम्॥३॥

तप्तैर्वाताघातै-
रवितुं लोकान् नभसि मेघाः।
आरक्षिविभागजना
इव समये नैव दृश्यन्ते॥४॥

शोषस्याशंकास्ते
हाहाकारो जलाय जागर्ति।
विद्युदभावो जातः,
किमतोऽपि परं प्रतीक्षसे मेघ॥५॥

आषाढस्य प्रथमे
दिवसे ते दर्शनं नाभूत्।
नापि प्रशमदिनेषु
त्वं दृष्टिपथं समायातः॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

कुंभकाराः प्रसीदन्ति ग्रीष्मे सीदन्ति कर्षकाः।
In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.
युगपद् दृश्यते लोके हर्षशोकपरम्परा॥७॥

वित्तेशा येऽट्टस्था-
स्ते तु जनित्रैः स्वकार्य-सिद्धिपराः।
अथ ये निःस्वास्ते किल
तितिक्षयाग्रे सरन्ति जनाः॥८॥

यया दुस्सहं ग्रीष्मं
सोढ्वापि जनः स्वकार्यनिरतोऽस्ति।
जिजीविषां तां वन्दे
संसारालम्बनीभूताम्॥९॥

मधुमेहपीडिता ये
ते शीतलपेयदर्शनं कृत्वा।
अपि तन्नैव लभन्ते
षण्ढास्तरुणीजनं हि यथा॥१०॥

अवशीतनयन्त्राणां
निष्क्रियता विद्युतोऽभावे।
घटेषु निहितं नीरं
पिबन्ति लोकास्तदा समुदम्॥११॥

वीथीसु नालिकोपरि
सोपानार्थं गृहद्वारे।
स्थापितमश्मानमध-
श्छायायां श्वा स्वपिति दिवसे॥१२।

श्रमिणो गृहनिर्माणं
कुर्वाणाः पश्य मध्याह्ने।
श्रमापहारार्थमधो
गृहपृष्ठं शेरते ध्वान्ते॥१३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

Digitized by Siddhanta eGangotri Gyaan Kosha
Prof. Satya Vrat Shastri Trust Foundation Delhi.

प्रक्षालितानि वस्त्राणि येन शुष्यन्ति सत्वरम्।
गृहिणी प्रसन्नतां याति गृहकार्येषु तत्परा॥१४॥

विद्युदभावे प्रक्षा-
लनयन्त्रस्यासफलतायाम्।
वस्त्राणां कूटं हा
पश्यति चिन्तातुरा गृहिणी॥१५॥

ग्रामे वा नगरे वा
विपिने वा ग्रैष्ममातंकम्।
सहमाना अपि लोकाः
कुर्वाणाः कर्म जीवन्ति॥१६॥

स्वीयजलं किल मेघ!
स्वयं न पातुं समर्थोऽसि।
अत उचितं वे वच्मि
द्रागेवागत्य वर्ष त्वम्॥१७॥ (26.6.2009)

विडालिका निजशावक-
सहिता विश्रम्भ्य सेवते चतुरा।
कूलरयुतकक्षागत-
शीतं वायुं प्रतप्ताङ्गी॥१८॥

मध्याह्नार्कमरीचि-
प्रतप्तदेहोऽपि कर्मनिष्ठः सन्।
वितरति पत्राणि यथा-
संकेतं पत्रवितरणकृत्॥१९॥

जलनलिकोपरि काक-
स्तुण्डेन नलाग्रमुद्घाट्य।
जलपानार्थं यतते
साशंकः सन्नितस्ततः पश्यन्॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दिल्ल्यां छत्रं नीत्वा
न शक्यते प्रायशो गन्तुम्।
भित्तिच्छायाश्रयिण-
स्तस्माद्गच्छन्ति पादाताः॥२१॥

महानसे चुल्ल्यग्रे
गृहिणी भोज्यं पचति धीरा।
भीष्मो ग्रीष्मो वा स्याद्
अथवा शीतः प्रकम्पकरः॥२२॥

एतस्मिन्नपि काले
त्रिचक्रनरयानचालकाः श्रमिणः।
परिवारपालनार्थं
धीरा यानानि कर्षन्ति॥२३॥

वह्निपरीता पृथ्वी
वह्निपरीतं जलं तथा व्योम।
वह्निपरीतो वायुः
सर्वत्राग्निः परिव्याप्तः॥२४॥

रात्रौ विद्युदभावे
स्वाक्रोशं व्यक्तुमायान्ति।
नागरिका विक्षुब्धा
विद्युद्वितरणविभागं प्रति॥२५॥

प्रस्विन्नगात्रलोका
वस्त्राण्यवतार्य विद्युतोऽभावे।
हस्तव्यजनेन निजं
क्लममपनेतुं प्रयत्नपराः॥२६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जलसञ्चयपात्रेषु
स्नान्ति समोदं गृहे शिशवः।
चिन्तां विवर्धयन्तो
मातुर्जलसंक्षयोद्भूताम्॥२७॥

दशहर्याम्रफलान्यपि
वर्षाभावे न रोचन्ते।
उद्वेगं जनयन्ति
प्रचण्डभूते निदाघेऽस्मिन्॥२८॥

सत्त्वोद्याने हस्ती
जलधिकरी[१] सिंह एणश्च।
तापाधिक्येऽथ जला-
भावे नितरां व्यथामाप्ताः॥२९॥

यापय कालमिमं त्वं
सखे कथंचित् श्रमेण धैर्येण।
सोढे ग्रीष्मे सर्वे
ऋतवः सह्या भवन्त्येव॥३०॥

रात्रावप्यत्युष्णा
वाताः प्रस्वेददायिनो वान्ति।
गृहपृष्ठगता अपि नो
सुखनिद्रां प्राप्नुवन्ति नराः॥३१॥

एसीयन्त्रैः सौख्यं
लभमाना अधिकृताः स्वकक्षेषु।
विद्युद्गमने जाताः
प्रस्विन्नाङ्गा मुमूर्षव इव॥३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्मिन्नङ्गे वस्त्रं
तद्गौरं यत्र तन्न तच्छ्यामम्।
निन्दति घर्मं तन्वी
मुकुरे स्वांगानि पश्यन्ती॥३३॥

कर्त्तव्यपालने त्वं
यदि प्रमादी भवसि मेघ!
उच्चैःपदस्थितः सन्
वद केषां नानुकार्योऽसि?॥३४॥

बहवोऽतिसारतापा-
घातादिभिरपगतप्राणाः।
इत्थमुदन्ताः प्रायो
वृत्तदलेषु प्रकाश्यन्ते॥३५॥

इन्वर्टरयन्त्राणां
सामर्थं क्षीयते रात्रौ।
दीर्घे विद्युदभावे,
सर्वे विकला भवन्ति तदा॥३६॥

रविदग्धेष्वंगेषु
स्त्रियो नरा बालका बालाः।
मुलतानीमृल्लेपं
कृत्वा शान्तिं मनाग्यान्ति॥३७॥

सन्स्क्रीनेति ख्याता-
मवलेपनिकां स्वहस्तलपनेषु।
रविदाहवारणार्थं
स्त्रीपुरुषा वै निलिम्पन्ति॥३८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अग्नेरापो जाता
दृष्यन्ते राजमार्गेषु।
मृगतृष्णाजलदृश्यं
दृश्यं मध्याह्नवेलायाम्॥३९॥

किन्त्वस्मिन्नपि काले
वरयात्राः सज्जिता यान्ति।
वरश्च वस्त्राविष्टो
वधूगृहं याति वडवास्थः॥४०॥

विकटनिदाघानन्तर-
मायाता बिन्दवो वृष्टेः।
उत्पातस्यानन्तर-
मायाति सुशासनं हि यथा॥४१॥

(टिप्पणी - 1. हिप्पो)

(रचनातिथिः 29.6.2009)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ब्रूते मुम्बानगरी

ब्रूते मुम्बानगरी-
' दृष्टा भवता ममावस्था।
मुष्टिमितैरातंकिभि-
रपमानो मे यथाकारि॥१

वसुशून्याभ्रनयनमित (२००८) -
वर्षे खैष्टे नवम्बरे मासे।
षड्विंशतारिकायां
यद्वृत्तं तत्कथं वाच्यम्॥२॥

दशातिरेकिजनानां
समुद्रमार्गेण मां प्रविष्टानाम्।
उत्पातैरसुहीना
कृता जना मे द्विशतसंख्याः॥३॥

चतुःशतप्रायो मयि
निवासिनिवहोऽभवद्व्रणितः।
व्यथिताः सर्वे भारत-
वासिन आसन्मम व्यथया॥४॥

किंकर्तव्यविमूढं
शासनमासीद् विवशविवशम्।
घण्टाषष्टिं यावन्
मे न्यक्कारो विदारणं चास्ताम्॥५॥

रक्षाकर्मि-कमाण्डो-
दलैः कृतं मे परित्राणम्।
तदनु च कश्चिन्मन्त्री
त्यागदलं दत्तवान् चतुरः॥६॥

Padma Shri Rama Kant Shukla Collection Kashi Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अद्यत्वेऽ हं पुनरपि
स्वभावमाप्तास्मि सोत्साहा।
तथापि भवता काचित्
चिन्ता कार्या प्रशासकवर॥७॥

प्रथमं त्वेतच्चिन्तय
कथं प्रविष्टा भरतभूमिम्।
अप्रतिहतगतयस्ते
कीदृक् तटरक्षणं भवति॥८॥

तदनु च चिन्तय पुनरपि
नो भूयादीदृशं काण्डम्।
सिद्धादेशो भूत्वा
भायय तान् क्रूरकर्मपरान्॥९॥

जले स्थले वाकाशे
गुप्तास्त्राणां प्रयोगेण।
नाश्या अस्मद्रिपव-
स्तदैव शान्तिर्भवेद्राष्ट्रे॥१०॥

जहि शान्तिशत्रुभूतान्
देशरिपून् त्वं विना शंकाम्।
आतंकिनमायान्तं
हन्यादेवाविचारयन् धीमान्॥११॥

गृहरक्षां प्रथमं कुरु
ततश्च नाशय निगूढानि।
केन्द्राण्यातंककृतां
प्रशिक्षणार्थं मनोयोगात्॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Deva Sahi Parisad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यदि तेषां पक्षधरः
कोऽप्युत्तिष्ठेत्तमपि नाशय।
राष्ट्रहितार्थं भवता
कठोरकर्मापि करणीयम्॥१३॥

श्रृणु मे रक्षक शासक!
बुद्धिमहं ते विजानामि।
बलहीना किल बुद्धिः
प्रभावहीना सदा भवति॥१४॥

आत्मबलेनैवाप्यो
जयः समस्यासु रिपुषु तथा।
यं यं पश्यसि तं तं
स्वरक्षकं नो विजानीयाः॥१५॥

चन्द्रे यानं प्रेषित-
मास्ते वैज्ञानिकैः सफलम्।
त्रिरङ्गवर्णो जयति
ध्वजोऽस्मदीयो विधोः पटले॥१६॥

अग्नित्रिशूलनागा-
र्जुनपृथ्वीनामकास्त्राणि।
ब्रह्मोसधनुःप्रभृती-
न्यथ कं कालं प्रतीक्षन्ते॥१७॥

अद्यत्वे त्वं विश्वं
स्वं पक्षधरं विधातुमिच्छसि चेत्।
तदा प्रदर्शय विक्रम-
मात्मबलं पूर्वमरिषु त्वम्॥१८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पार्श्ववर्तिनां चेष्टां
यदि निश्चयतोऽभिजानासि।
तर्हि प्रमाणदानैः
स्वसमयनाशं किमिति कुरुषे॥१९॥

शाम्येत्प्रत्यपकारै-
र्न सामनीत्या कुटिलचेष्टः।
जहि शत्रुं त्वं शीघ्रम्,
अवन्ध्यकोपो भवान् भवतात्॥२०॥

त्वं येषां प्रतिनिधिरसि
तेषां चित्तानि दह्यन्ते।
अव तेषां सम्मानम्
आतंकिजनाँस्त्वमुच्चाटय॥२१॥

दश दुष्टास्तव देशे
निर्द्वन्द्वं घ्नन्ति शतशो नॄन्।
त्वं शान्तो यदि शेषे,
धिक् ते शान्तिं क्षमामथ ते॥२२॥

सैन्यमनोबलहननम्
आतंकिमनोबलस्य वृद्धिर्वै।
जनताया अपमानः
शासकपदवीतिरस्कारः॥२३॥

जनताया जनतार्थं
शासनमाचरति जनतैव।
जनतन्त्रे, त्वं जनता-
चित्तं विज्ञाय कुरु कार्यम्॥२४॥

Padma Shri Rama Kant Shukla Collection at Devavani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देशसुरक्षार्थं त्वं
सन्नद्धो भव तथोत्तिष्ठ।
दुष्टस्य चिकित्सार्थं
प्रमाणदानं न पर्याप्तम्॥२५॥

कर्करोगमिव मत्वा-
तंकं ध्वंसय सपद्येव।
कालक्रमेण नो चे-
दसाध्यतामेष गन्तास्ति॥२६॥

कूटनीतिसन्धानं
नास्त्युचितं त्यक्तलज्जेषु।
शठेषु शाठ्यं कार्यं
लत्ताभूता न वार्तयाराध्याः॥२७॥

इति मद्वाक्यं श्रुत्वा
प्रतापशाली भव त्वं भो।
मनसि वचसि कार्ये त्वं
सोत्साहः सन् विजृम्भस्व॥२८॥
(रचनातिथिः - 29/11/2008)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वार्धक! नमो नमस्ते॥

सुस्वागतं भवतु ते
वार्धक! नमो नमस्ते।
अनुभवनिधान बन्धो
वार्धक! नमो नमस्ते॥१॥

इदमासनं सुसज्जं
देहे मम त्वदर्थम्।
आगच्छ, तिष्ठ बन्धो
वार्धक! नमो नमस्ते॥२॥

त्वं स्थायिभावरूपं
सञ्चारि पूर्ववृत्तम्।
अध्यक्षभूत वयसां
वार्धक! नमो नमस्ते॥३॥

दौर्बल्यमस्ति मेऽक्ष्णोः
पश्यामि नो कुवृत्तम्।
शमदमविधायकं त्वं!
वार्धक! नमो नमस्ते।४॥

शक्तिर्गतास्ति पदयोः
स्थितधीर्गृहे वसामि।
जितमानसोऽस्मि जातो
वार्धक! नमो नमस्ते॥५॥

कटुकं वचो ब्रुवाणो
निन्द्योऽस्मि नैव यूनाम्।
क्षम्योऽस्मि बालयुवभिर्
वार्धक! नमो नमस्ते॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Prakashan Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रोगैर्ममास्ति मैत्री
कायेऽस्मि वीतचिन्तः।
नास्ते मृतेर्भयं मे
वार्धक! नमो नमस्ते॥७॥

आगत्य नो प्रयासि
स्थिरता तव स्वभावे।
वन्द्यस्तव स्वभावो
वार्धक! नमो नमस्ते॥८॥

त्वय्यागते नमस्यो
जातोऽस्मि सर्वयूनाम्।
ज्ञानस्य दुग्धसिन्धो!
वार्धक! नमो नमस्ते॥९॥

परमेश्वरस्य भक्तिं
कर्तुं लभेऽवकाशम्।
निर्भीकतां गतोऽहं
वार्धक! नमो नमस्ते॥१०॥

वृद्धोपसेविनो मां
नत्वाशिषं लभन्ते।
बाला भणन्ति "बाबा"
वार्धक! नमो नमस्ते॥११॥

सह पौत्र-पौत्रिकाभिः
खेलामि संलापमि।
तेष्वीश्वरं च वीक्षे
वार्धक! नमो नमस्ते॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वेदान्ततत्त्वबोधः
कर्तुं सुशक्य आस्ते।
सुशकास्ति तत्त्वचिन्ता
वार्धक! नमो नमस्ते॥१३॥

जीवनमिदं हि यात्रा
त्वं चान्तिमो विरामः।
क्रमशो भवामि पूर्णो
वार्धक! नमो नमस्ते॥१४॥

शीर्षं वलक्षमास्ते
बाधिर्यबाधितोऽहम्।
निन्दां स्तुतिं न जाने
वार्धक! नमो नमस्ते॥१५॥

समदुःखसौख्य आसे
समशत्रुमित्र आसे।
भगवत्प्रियोऽस्मि जातो
वार्धक! नमो नमस्ते॥१६॥

ज्ञानी मतोऽस्मि लोके
युवभिर्भवत्प्रसादात्।
श्रेष्ठासनं लभेऽहं
वार्धक! नमो नमस्ते॥१७॥

नो शोभते सभा सा
यत्रास्ति नैव वृद्धः।
त्वमलंकृतिः सभाया
वार्धक! नमो नमस्ते॥१८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लोकैषणाभिरभितो
ग्रस्तोऽस्मि नो इदानीम्।
विरतिः प्रियाऽधुना मे
वार्धक! नमो नमस्ते॥१९॥

शैथिल्यमिन्द्रियाणां
स्थायित्वदातृ जातम्।
सुलभा निवृत्तिरास्ते
वार्धक! नमो नमस्ते॥२०॥

चित्राणि पूर्ववयसः
संवीक्ष्य हासमेमि।
आसं किमस्मि किं वा
वार्धक! नमो नमस्ते॥२१॥

त्वं निन्द्यसे किमिति नो
जानामि नैककविभिः।
करुणानिधानमसि मे
वार्धक! नमो नमस्ते॥२२॥

बालश्च वृद्ध आस्ते
समरूप एव लोके।
लाल्यो भवेत् समेषां
वार्धक! नमो नमस्ते॥२३॥

त्वय्यागते लभेऽहं
सुविधा विभिन्नरूपाः।
एषोऽस्ति तेऽनुभावो
वार्धक! नमो नमस्ते॥२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बस-रेल-वायुयाने-
ष्वर्धं प्रदाय मूल्यम्।
यात्रां करोमि हृष्टो
वार्धक! नमो नमस्ते॥२५॥

गोधूम-मुद्ग-गृञ्जन-
संयावलाभहेतोः।
व्याजोऽस्त्यदन्तता मे
वार्धक! नमो नमस्ते॥२६॥

मुनिवृत्तिधारणार्थं
त्वं योग्यभूमिरुक्तम्।
ना त्वां विनास्त्यपूर्णो
वार्धक! नमो नमस्ते॥२७॥

वृद्धप्रजल्पितं मे
कलहस्य नास्ति हेतुः।
लोकस्य हास्यहेतु-
वार्धक! नमो नमस्ते॥२८॥

जीवेच्छतं समानां
न त्वां विनां नरोऽत्र।
हे वेदवाक्यपोषक
वार्धक! नमो नमस्ते॥२९॥

मेट्रो-बसादियाने
स्थानं सुरक्षितं मे।
जातं त्वदीयकृपया
वार्धक! नमो नमस्ते॥३०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वार्धक्यवृत्तिरधुना
वृद्धिं भजिष्यते मे।
नूनं तव प्रभावात्
वार्धक! नमो नमस्ते॥३१॥

त्वय्यागते भवतु मे
कामं शरीरमबलम्।
सबलं तु मानसं मे
वार्धक! नमो नमस्ते॥३२॥

सौख्यासने निषण्णः
साकं स्वभार्ययाहम्।
कुर्ते विनोदवार्ता
वार्धक! नमो नमस्ते॥३३॥

पूर्वं मया कृतं यत्
सर्वं निवेद्य प्रभवे।
निश्चिन्ततां प्रपद्ये
वार्धक! नमो नमस्ते॥३४॥

अग्रेऽस्ति दीर्घनिद्रा
मोक्षप्रदायिका मे।
मम सा मता प्रतीक्ष्या
वार्धक! नमो नमस्ते॥३५॥

दन्ता गता इदानीम्
रसनास्ति मे प्रसन्ना।
आतंकतो विमुक्ता
वार्धक! नमो नमस्ते॥३६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अथ कल्पयामि यद्यत्
दृश्यं मवेन्न तद्यदि।
इच्छा प्रभोः प्रमाणं
वार्धक! नमो नमस्ते॥३७॥

शौद्धौदनिर्विलोक्य
त्वां बुद्धतां प्रपेदे।
त्वं देशिको गुरूणां
वार्धक! नमो नमस्ते॥३८॥

सौभाग्यवान् स प्राणी
यो जायते हि वृद्धः।
शोच्यो भवेदवृद्धो
वार्धक! नमो नमस्ते॥३९॥

मा भूदकालवृद्धो
लोके कदापि कोऽपि।
कालेऽखिलोऽस्तु वृद्धो
वार्धक! नमो नमस्ते॥४०॥

(रचनातिथिः 06.03.2013)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्राङ्गण-बिल्ववृक्षः

दिल्लीस्थिते विज्ञजनैरुपेते
वाणी-विहारे शुभदर्शनांके।
'रमालये' सर्वजनोपकारी
जयत्यसौ प्रांगणबिल्ववृक्षः॥१॥

मूर्ध्नातपं चण्डकरस्य सोढ्वा
छायां ददात्याश्रितमानवेभ्यः।
पतत्रिणामाश्रयतां गतो मे
गृहस्थितः प्रांगणबिल्ववृक्षः॥२॥

छायास्य वीथ्यामपि शोभमाना
तां सेवते पुंगव एक एत्य।
केचिज्जना मध्यदिनेऽत्र पत्र-
क्रीडारताः स्वं समयं नयन्ति॥३॥

ज्येष्ठे सुपुष्पैः सुरभीकरोति
सम्पूर्णगेहं मुदमादधानः।
वीथ्यां चरन्तः सकला जनाः स्वं
व्यञ्जन्ति मोदं कुसुमानि दृष्ट्वा॥४॥

प्रत्यूषकाले मधुमक्षिकाभिः
सगुञ्जनं सेव्यत एष शाखी।
रसप्रदायी सुरभिप्रदायी
द्विजालिसेव्यस्तरुरेष वन्द्यः॥५॥

शिवार्चनार्थं त्रिदलानि नेतुं
जनाः समीपादथ दूरदेशात्।
अमुं शरण्यं शरणं व्रजन्ति
पत्रप्रदः प्रांगणविल्ववृक्षः॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ज्येष्ठात्मजो मेऽस्य रहस्यविज्ञः
फलानि युक्त्यास्य चिनोति धीरः।
माता तदीया च कुटुम्बनृभ्यो
ददाति तेषां स्वरसं समेभ्यः॥७॥

भवत्ययं यर्हि दलैर्विहीनो
गृहांगणं तर्हि तपत्यजस्रम्।
पुनश्च काले त्रिदलैः समृद्ध-
श्छायाप्रदो हृष्यति विल्ववृक्षः॥८॥

अस्यात्मजः श्रीवरदेश्वरस्य
क्षेत्रे युवा सन् सफलो विभाति।
छायाप्रदः पत्रफलप्रदायी
श्रीशंभुसेवानिरतो भिवान्याम्॥९॥

'चिक्रोड'नामा तरुजन्तुरस्मिन्
स्वशावकैर्धावनमातनोति।
छिन्नाः पतङ्गाः गगनात्पतन्तः
समाश्रयन्तेऽस्य शरण्यशाखाः॥१०॥

छायामधः क्रीडति पौत्रवर्गो
द्विचक्रिकारूढ इतस्ततोऽस्य।
काकस्तु निर्माय कुलायमस्मिन्
स्वविष्ठयामुं समलीकरोति॥११॥

(रचनातिथिः 07/06/2012)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

समस्यापूर्तयः

1. कृष्णाय तुभ्यं नमः, 2. यत् प्राप्य नाप्यं परम्, 3. विन्दति सुखम्

वाराणसेय संस्कृतविश्वविद्यालये दीक्षान्तसमारोहावसरे
(1959-60)पठनाय प्रणीताः श्लोकाः-

बाल्ये गोपगणावृताय समुदं गोचारणप्रीतये,
प्रोन्मीलन्मुरलीरवं विदधते वृन्दावने पावने।
धर्मक्षेत्रविकम्पितार्जुनमनोमोहान्धकारच्छिदे,
नानारूपमयाय विश्वपतये कृष्णाय तुभ्यं नमः॥१॥

'तमालं प्रति कृष्णभक्तस्योक्तिः'
गोपीगोपगणाधिवेष्टितवपुर्यन्ता गवां वेणुना,
वृन्दारण्यभुवि प्रसन्न इह ते पार्श्वे मुकुन्दोऽवसत्।
त्वच्छायामवलम्ब्य केलिकरणे सक्तो हि कृष्णः स्वयम्,
भ्रातश्श्यामतमाल! कृष्णचरणात् कृष्णाय तुभ्यं नमः॥२॥

'कवेः प्रास्ताविकोक्तिः'
भास्वच्छुक्लयशःप्रकाशनकरं तृष्णं तमो वर्तते,
पुण्यानाञ्च कृतेऽपि कृष्णमथवा पापं परं युज्यते।
तद्वर्णो निकषोपलः फलमयं स्वर्णं भवेद्येन स-
न्नित्यं सज्जनमूल्यधारणकृते कृष्णाय तुभ्यं नमः॥३॥

'कमलिनीं विहायाम्रमञ्जरीं समागतं भ्रमरं प्रत्युक्तिः'
या त्वत्स्नेहजिता, त्वया सह निशा यस्या गता बन्धने,
तां स्निग्धां परिहीनकैतवकलां त्यक्त्वा शुभां पद्मिनीम्।
मञ्जर्या विदधासि केलिमनया सार्धं रसालस्य भो!
धिक् त्वां! वञ्चक रे द्विरेफ! मनसा कृष्णाय तुभ्यं नमः॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'वियोगिनश्चन्द्रगोपकं मेघं प्रत्युक्तिः'

नित्यं दुःखकरं मदीयरुदने हास्येन युक्तं, जडं,
रोहिण्या सहितं प्रचण्डमनलं प्रोद्दीपयन्तं करैः।
चन्द्रं त्वं परिगोप्य भीषणममुं साक्षादयोगोलकं
चित्तं सिञ्चसि मामकीनमभितः कृष्णाय तुभ्यं नमः॥५॥

'कवेः घनं प्रत्युक्तिः'

संयोगी च कृषीवलश्च, तरुणी, बाला, मयूरोऽपि वा
गृष्मे मोदमना हि विन्दति सुखं त्वां प्राप्य नाप्यं परम्।
चण्डादित्यकरप्रचण्डविशिखाविद्धान्तराणां कृते,
नित्यं जीवनदाय मेघ! शिरसा कृष्णाय तुभ्यं नमः॥६॥

'वाराणसी वर्णनम्'

सत्साहित्यकलानिकेतनयुतां देवालयैः पावितां,
कीर्तिश्रीयुतमालवीयचरितैश्चित्रां चमत्कारिणीम्।
विद्यारक्षणदक्षपण्डितगणैर्नित्यं समाराधितां,
कः स्याद्यो मनुजो न विन्दति सुखं दृष्ट्वाद्य वाराणसीम्॥७॥

गुणग्रामं रामं[१] सदयमभिरामं धृतधृतिं
तरङ्गैर्नृत्यन्तीञ्च बहुजलभङ्गैस्सुरनदीम्[२]॥
शरण्यं शम्भुञ्च[३] प्रतिदिनमहो वीक्ष्य वरदं,
जनो वाराणस्यां कथय नहि को विन्दति सुखम्॥८॥

शुभद्वारं, यन्त्रैः पयस उचितं भव्यभवनं,
नव-प्रत्नैर्विद्यारथिभिरुपनीतं सबलताम्।
जगद्विद्यागेहं[४]सपुलकमहो वीक्ष्य सुखदं,
जनो वाराणस्यां कथय नहि को विन्दति सुखम्॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कुबेरो देवानां द्रविण[4]मिह नित्यं वितरति,
द्ररिद्राणां दैन्यञ्च गतनिजचिन्तः शमयति।
सदा बद्रीनाथोऽत्र कलशुभहासं वितनुते,
शुभां काशीं दृष्ट्वा कथय नहि को विन्दति सुखम्॥१०॥

(श्रीकुबेरनाथशुक्लो विश्वविद्यालस्योपकुलपतिरासीद्। श्रीबद्रीनाथशुक्ल-महोदया उत्सवसंयोजका आसन्। ते हि विश्वविद्यालये न्यायवैशेषिक-विभागाध्यक्षाः सन्ति तेषां च स्वभावो नितरां हास्यप्रियः)

धर्मप्राणकुबेरनाथयशसा 'शुक्लं' मनोहारिणं,
'बद्रीनाथ'मयं प्रमोदकरणैरामैर्नरैश्चैर्युतम्।
श्रीनारायणशोभितं पुलकितं सद्विश्वविद्यालयं,
तन्नीचस्य मनो न विन्दति सुखं यत्प्राप्य नाप्यं परम्॥११॥

शुभं चन्द्रं दृष्ट्वा भवति हि चकोरी पुलकिता,
दिवानाथं दृष्ट्वा विकचवदना स्यात् कमलिनी।
तथा श्रुत्वा रागं प्रसभमभिकृष्टो मृगगणो,
रमाकान्तं प्राप्याद्य च गुणिसभा विन्दति सुखम्॥१२॥

(वाराणसी, न्यू होस्टल 25/12/1960)

1,2,3- वाराणस्यां हि श्रीरामचन्द्रस्य मन्दिरं श्रीविश्वनाथस्य च मन्दिरं प्रसिद्धिं गते गंगायास्तु प्रसिद्धिरेव।

4-जगद्विद्यागेहं=विश्वविद्यालयम्। संस्कृतविश्वविद्यालयमित्यर्थः। तत्र हि जलयन्त्रं राजते।

5-संस्कृतम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किमु प्राचीनशास्त्रीयैव भाषासि?

किमु प्राचीनशास्त्रीयैव भाषासि त्वमयि सुरवाक्?
न चाधुनिकी त्वमसि भाषा कथय मे त्वं मनाक् सुरवाक्॥

न किं कक्षासु पाठ्यन्तेऽनुदिनमपि शिक्षकैश्छात्राः?
अथो स्पर्धासु भाषन्ते न किं प्रतियोगिनश्छात्राः?
त्वयि प्रत्यग्ररचना आशुकविभिर्नो विरच्यन्ते?
न किं प्रश्नोत्तरं ददति स्वशब्दैर्बालकाः सुरवाक्?॥१॥

असौ रेवाप्रसादः श्रीनिवासो भास्कराचार्यः,
अयं राजेन्द्रमिश्रोऽयं मणिः प्रणवो नवाचार्यः॥
कुटुम्बो रामकरणः किञ्च राधावल्लभो विनयः
न कवयन्त्यद्य नूतनभावनाकाव्यं? कथय सुरवाक्॥२॥

न सुन्दरराजसदृशाः किं सुकवयोऽद्यापि दृश्यन्ते?
न पुष्पा दीक्षिता नलिनी जयश्रीर्वा च दृश्यन्ते?
रमोमाविष्णुकान्ताः कुर्वते किं नोऽभिनवकाव्यम्?
न युवतिस्त्वं पुराणी ? किं कथय मामद्य हे सुरवाक्॥३॥

असौ सत्यव्रतः शास्त्री रहसपूर्वो बिहारी वा?
असौ हरिराम आचार्यः कलानाथः प्रशस्यो वा?
अवाची वाप्युदीची वा नराः नार्यः किशोरा वा
युवानोऽथो युवत्यस्त्वां न भाषन्ते? कथय सुरवाक्॥४॥

कलिङ्गाः वाथ बङ्गा वा बिहारा झारखण्डा वा
नराः कश्मीरकेरलतामिलीयास्तीर्थपण्डा वा।
नवानां नूतनानां रूपकाणाञ्च प्रयोक्तारः
किमु त्वां नैव भाषन्ते? मनाक् त्वं मे कथय सुरवाक्॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

न वर्ण्यन्ते त्वया किं वा विविधखेलाः क्रिकेटाद्याः?
समीक्ष्यन्तेऽथ कक्षासु त्वया किं नो विविधविद्याः?
गुणाः दोषा अलंकाराः समाजस्याथ कवितायाः
त्वया किं नो विवेच्यन्ते सभामञ्चे? कथय सुरवाक्॥६॥

न वा ग्लानिर्नवा करुणा न वा हासो न वा रोषः
न चोत्साहो न वा सन्तोष उत नृणां च सन्तोषः।
न पीडाऽथो भयं प्रेमा तथा राष्ट्राभिलाषा वा
त्वयाद्य व्यज्यते सुतरां दिनानुदिनं? कथय सुरवाक्॥७॥

वसन्तः सेमवालो माधवो दाशस्तथा चोर्वी
मिताली कृष्णलालश्च प्रफुल्लष्ठाकुरश्चान्ये।
इयं वै पत्रकाराणाम्परम्परिका महागुर्वी
नवाद्यत्वेऽप्यविघ्नं संस्कृतं ब्रुवते कथय सुरवाक्॥८॥

दवेश्रीराम-शिवदत्तौविजयसारथिरथो कण्णन्
द्विवेदीप्रेमनारायण उपेन्द्रः कौशलो विद्वान्।
किशोरा वा युवानो वा किशोर्यो वा युवत्यो वा
प्रवृद्धाश्चाद्य नो कुर्वन्ति रचनाः ब्रूहि हे सुरवाक्॥९॥

इमेऽभिनवा अनेके पद्यकारा गद्यकारा वा
इमेऽभिनवा अनेके श्रव्यकारा दृश्यकारा वा।
इमे सम्भाषिणः सम्पादका वा चिन्तका नैके
न ते व्यवहारभाषात्वे प्रमाणं किं? कथय सुरवाक्॥१०॥

यथा प्राचीनता शास्त्रीयता ते वर्तते भूषा
तथार्वाचीनताप्यास्ते तवासाधारणी भूषा।
न वाहरहो नभोवाणी नवा वार्ता त्वया ब्रूते?
न किं त्वां दूरदर्शनमपि वदत्यनुदिनमये सुरवाक्॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुनामी भूमिकम्पाद्या न घटनाः किं त्वया वर्ण्याः?
बलात्कारा नृहत्या बम्बविस्फोटा न वा वर्ण्याः?
न वा जननायकानां नवनवा लीलास्त्वया वर्ण्याः?
न वाधुनिकं जगत्त्वं वीक्ष्य मुखरा दृश्यसे सुरवाक्?॥१२॥

नवीनः शब्दराशिर्नोऽद्य दृश्यस्तेऽथ किं सुरवाक्?
नवीना भंगिरास्ते किं न ते वद मे शुभे सुरवाक्?
युगानुभवेन साकं किं न ते वृद्धिर्भवति सुरवाक्?
न किं व्यवहारभाषापि त्वमसि भुवने कथय सुरवाक्॥१३॥

रमाकान्तस्त्वदीयोऽयं सुतः किल निर्भयं ब्रूते
समे शृण्वन्तु शासनचालका यदयं वचो ब्रूते।
यथा पूर्वं तथा साम्प्रतमपीयं भाष्यते सुरवाक्
पुराणीयं नवीनेयं चिरन्तनयौवना सुरवाक्॥१४॥
(रचनातिथिः - 11/11/2005)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनुजो न किं किं जायते?

कर्मानुरोधाद् विधिवशान्मनुजो न किं किं जायते!
ननु पश्य कालकशाहतो मनुजो न किं किं जायते।

श्येनायते चटकायते काकायतेऽथ पिकायते
समुपागते याच्ञाक्षणे कण्ठीरवो मेषायते।
आढ्योऽभिजनवानपि नृपो नम्रो भवन् रङ्कायते
मनुजो जगति विधिपरवशो बन्धो न किं किं जायते॥१॥

हारायते भारायते कारायते दारायते
मारायते जारायते सुरभीयते ग्रीष्मायते।
वर्षायते शीतायते शिशिरायतेऽथ हिमायते
प्राप्ते क्षणे विधिपरवशो मनुजो न किं किं जायते॥२॥

शलभायते विहगायते मीनायते कूर्मायते
असुरायते देवायते शुक्रायतेऽथ गुरूयते।
सलिलायतेऽथ मरूयते कुलिशायते कुसुमायते
ननु पश्य कालकशाहतो मनुजो न किं किं जायते॥३॥

आखूयतेऽथौतूयते व्यालायते नकुलायते
हंसायतेऽथ बकायते काकायते बकायते।
अमृतायते गरलायते मदिरायते ह्यगदायते
नाट्यं चरन् मनुजो जगति बन्धो! न किं किं जायते॥४॥

दुःखायतेऽथ सुखायते तृप्तायते गहनायते
करुणायतेऽलीकायते वैरायते कलहायते।
गर्वायते हर्षायते कंसायते कृष्णायते
मनुजो जगति विधिपरवशः पुरुषायते क्लीबायते॥५॥

Padma Shri Rama Kant Shukla Collection Pandeva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निम्बायते द्राक्षायते कदलीयते बदरीयते
अश्वायतेऽथ खरायते हरिणायतेऽथ वृकायते।
मित्रायते शत्रूयते देवायते दनुजायते
मनुजो जगति विधिपरवशो बन्धो! न किं किं जायते॥६॥

भीष्मायते भीमायते गोपोऽपि सन् कृष्णायते
शिष्योऽपि संश्च गुरूयते सन् पौण्ड्रकोऽपि हरीयते।
शीघ्रायते मन्दायते चन्द्रायते सूर्यायते
मनुजो जगति विधिपरवशः किं किं न बन्धो! जायते॥७॥

जंगम्यते लोलुप्यते चञ्चूर्यते वावद्यते
नंनम्यते तेष्ठीयते चेक्रीड्यते चक्रन्द्यते।
जागर्ज्यते सासद्यते तेतीर्यते जेह्लीयते
विधिपरवशश्चोकूर्द्यते मोमुद्यते रोरुद्यते॥८॥

सोषुप्यते शाशय्यते जोहूयते देदीव्यते
बम्भ्रम्यते तात्रस्यते सेषिध्यते नानश्यते।
जञ्जन्यते योयुध्यते मेमिल्यते देदिश्यते
प्राणी जगति विधिपरवशो बोभूयते मेम्रीयते॥९॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मतदाताहम्

मतदाताहं मतदाताहम्
भवदभिलषितो मतदाताहम्।।।

हे नेतारो भवतामभीष्ट-
फलदाताहं, मतदाताहम्
मम शक्तिं प्रत्यभिजानीध्वं
परिपक्वमतिर्मतदाताहम्।।१।।

यूयं प्रतिशाखं यदि दृश्याः
तर्ह्यहमपि दृश्ये प्रतिपर्णम्
भवदीयाश्वासनपरमार्थ-
ज्ञाताहं वो मतदाताहम्।।२।।

मतदातृमनोवञ्चनचुञ्चुं
नेतारं जाने सम्यगहम्।
तं स्थापयामि त्रैशंकुपदे
सम्बोधत भोः! मतदाताहम्।।३।।

विविधाः सुविधा दास्यामि तथा
भ्रष्टाचारं दूरीकुर्याम्।
इत्यादिपुष्पितानां वाचां
जानाम्यर्थं मतदाताहम्।।४।।

Padma Shri Rama Kant Shukla Collection at Deevyani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शपथं कुर्वन्ति भवन्तो यं
विदधति प्रतिज्ञामथवा याम्
तत्सारं सम्यग् जानेऽहं
भवदीय एव मतदाताहम्॥५॥

दास्याम्यवसरमधुनापि भवद्भ्यः
किन्तु न वञ्चकता कार्या।
पञ्चानां वर्षाणामवधौ
पुनरपि दृश्यो मतदाताहम्॥६॥

नोलूकं मां सम्पादयितुं
शक्ष्यन्ति भवन्तो नेतारः।
समयो मनाग् हि परिवर्तितोऽस्ति
समयज्ञाता मतदाताहम्॥७॥

दिवसा गता हि ते वो येषु
प्राप्तं सौख्यं नेत्रे निमील्य।
देशोन्नतये जागरितव्यं
वः स्मारयामि मतदाताहम्॥८॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुदिन-कुदिन-पञ्चदशी

सुदिनान्यायास्यन्ती-
त्याशा न नरेण हातव्या।
कुदिनानि गमिष्यन्ती-
त्याशापि न तेन कर्तव्या॥१॥

कुदिन-सुदिनयोर्मध्ये
मैत्री सुदृढा वरीवर्ति।
अत्यन्ताभावो नो
कस्यापि कदापि दृश्योऽस्ति॥२॥

न्यूनाधिकता दृश्या
कुदिनानामथ च सुदिनानाम्
एकेन विना न परं
स्थातुं शक्नोति लोकेऽस्मिन्॥३॥

तमसोऽनन्तरमस्मिन्
लोके दृश्यः प्रकाशोऽपि।
दृश्यं तमः प्रकाशा-
नन्तरमथ रात्रिवेलायाम्॥४॥

कस्यात्यन्तं सुखमथ
दुःखं चैकान्ततः कस्य?
सुदिनान्यथ कस्य सदा
कुदिनानि च कस्य तिष्ठन्ति॥५॥

सुदिनानि सुशोभन्ते
कुदिनान्यनुभूय दीर्घकालेन।
सुदिनमेकमपि रम्यं
प्रतीयते कुदिनपीडान्ते॥६॥

Padma Shri Rama Kant Shukla Gurukul and Sarayu Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुदिनानामाधिक्ये
पुनरप्याविर्भवन्ति कुदिनानि।
भवति हि विजयस्तेषां
यान्येव भवन्ति बलवन्ति॥७॥

तस्मान्मनुजेन सदा
सुदिनार्थं यत्न आचर्यः।
सुदिनान्यायास्यन्ती-
त्यस्यार्थो लक्षणाग्राह्यः॥८॥

रजनीमनु दिनमाया-
त्यथ दिनमनु रात्रिरायाति।
दिनमपि सुखप्रदं स्यात्
शर्वर्यपि जायते सुखदा॥९॥

सुदिनं कुदिनं दुःखं
सुखं च नित्यं हि यो मनुजः।
समभावतया सहते
तस्य कदापि न भवति पीडा॥१०॥

अतो मदीया सुहृदः!
सुखं च दुःखं च सर्वतो लोके।
सुदिनानि च कुदिनानि
स्वदत समे समतया स्वस्थाः॥११॥

यत्सुदिनं किल मह्यं
कुदिनं तज्जायते तुभ्यम्।
अत एकस्मिन् काले
कुदिनं सुदिनं च दृश्येते॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कृष्णापणिकेभ्यो यद्
दुर्दिनमास्ते विभीतिकरम्।
उपभोक्तृभ्यः सुदिनं
तदेव सञ्जायते लोके॥१३॥

यत्सुदिनं कृषकाणां
तत्कुदिनं कुम्भकाराणाम्।
यत्कुदिनं कृषकाणां
तत्सुदिनं कुम्भकाराणाम्॥१४॥

कुदिनान्यपि न समेषां
सुदिनान्यपि नैव सर्वेषाम्।
कुदिनसुदिनपरिभाषा
सापेक्षा भवति सर्वेषाम्॥१५॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अवधान-राजधानी

अवधानराजधानी-
त्येतन्नाम्नी सभा दिल्ल्याम्
ब्रह्मश्रीनागफणि-
श्रीशर्मालङ्कृता जयति॥१॥

अवधानराजधानीं
समेत्य विबुधाः प्रमोदन्ते
विविधावधानरूपै-
श्चकिताः दृष्टाश्च जायन्ते॥२॥

अवधानराजधान्या
वातावरणं कवित्वमयमास्ते
अत्रागत्य जनानां
चाञ्चल्यं जहति चित्तानि॥३॥

अवधानराजधान्यै
नमांसि भूयांसि देहल्याः।
दत्तपदी-चित्रपदी-
स्वरपद्यो दर्शिता हि यया॥४॥

अवधानराजधान्याः
नास्ते किमपीह परतरं तत्त्वम्।
यल्लोकान् विविधमतीन्
ऐक्यगुणे बन्धुमीशं स्यात्॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अवधानराजधान्याः
वाच्याः स्युः केन सकलगुणाः।
या दर्शयति हि सभ्यान्
शक्तिं व्युत्पत्तिमभ्यासम्॥६॥

अवधानराजधान्याम्
उपस्थिता धन्यतां याताः।
नोपस्थिताश्च ये स्युः
किं ते सद्भाग्यवन्तः स्युः?॥७॥

अवधानराजधानि !
त्वया कृतो यश्चमत्कारः।
तं वर्णयितुं नालम्
सहस्रफणिरपि निजैर्वचनैः॥८॥

ब्रह्मश्रीनागफणिः
सारस्वततपसि लीनः सन्।
राष्ट्रैक्यं विश्वैक्यं
पुष्णन् जयतात् चिरं स्वस्थः॥९॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आक्रमणं कुरु

उत्तिष्ठ वीर भारत सत्वर -
मातंकवादराक्षसवधाय ।
हन्तरि निर्दोषजनानां त्वम्
आक्रमणं कुरु, आक्रमणं कुरु॥१॥

येनोर्याक्रमणव्याजेना -
मन्त्रितमास्ते निजदौर्भाग्यम्।
अविलम्बं निर्लज्जे तस्मिन्
आक्रमणं कुरु, आक्रमणं कुरु॥२॥

इदमुर्याक्रमणस्यामन्त्रण -
मास्ते तव रणप्रयाणार्थम्।
दण्डनं दण्डनीयस्यास्ताम्
आक्रमणं कुरु, आक्रमणं कुरु॥३॥

आक्रमणं न कुरु त्वं पूर्वम्
किन्त्वाक्रमणं त्वं नो सहस्व।
त्वरयाऽक्रमणं जातं सम्प्रति
आक्रमणं कुरु, आक्रमणं कुरु॥४॥

ऋजुतां यो मनुते मूर्खत्वम्
मैत्रीप्रस्तावं दुर्बलताम्।
पातकिनि कृतघ्ने धृष्टेऽस्मिन्
आक्रमणं कुरु, आक्रमणं कुरु॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यः सारमेय इव सिंहे त्वयि
धृष्टतां प्रदर्श्य मनोमुग्धः।
तस्याहङ्कारनिरासार्थम् ,
आक्रमणं कुरु, आक्रमणं कुरु॥६॥

वार्ताः सञ्जाताः बहुवारं
हस्तमेलनं बहुधा जातम्।
दुर्जनकृत्यं दृष्ट्वा तस्मिन्
आक्रमणं कुरु, आक्रमणं कुरु॥७॥

अलमलं हस्तमेलनैरलं
वार्ताभिरलं भाषणैरलम्।
अवशिष्टो नास्तेऽपर उपाय
आक्रमणं कुरु, आक्रमणं कुरु॥८॥

दुर्जन उपकारान्नो शाम्यति
प्रत्यपकारात्तस्य चिकित्सा।
प्रतिवेशिविषस्य विनाशार्थं
आक्रमणं कुरु, आक्रमणं कुरु॥९॥

आस्ते य आततायी स रिपु-
स्तत्संरक्षकोऽपि भवति रिपुः।
जृम्भस्व वीर रिपुनाशार्थम्
आक्रमणं कुरु, आक्रमणं कुरु॥१०॥

शिशुपालो गालीं दत्तवान्
शतमीं ते कृष्ण सभामध्ये।
अरिणारिमस्तकं पातय भुवि
आक्रमणं कुरु, आक्रमणं कुरु॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सेनाया मनोबलं रक्ष्यं
तस्याः सम्मानोऽथो रक्ष्यः।
आचर शठेषु शाठ्यं धीमन्
आक्रमणं कुरु, आक्रमणं कुरु॥१२॥

शस्त्रेण रक्षिते राष्ट्र एव
जीवन्ति शास्त्रसाहित्यकलाः।
बलहीनाद्रिपवो नो बिभ्यति
आक्रमणं कुरु, आक्रमणं कुरु॥१३॥

साहाय्यकारिणः शत्रूणाम्
आक्रामकशक्तिं सम्परीक्ष्य।
अवलम्बन्तेऽन्ते ताटस्थ्यम्
आक्रमणं कुरु, आक्रमणं कुरु॥१४॥

शोभते क्षमाऽथो कूटनीति-
रिह बलशालिने न निर्बलाय।
ख्यापय निजबलं प्रचण्डं त्वम्
आक्रमणं कुरु, आक्रमणं कुरु॥१५॥

सोढापमानततिरनेकधा ,
दर्शितमातिथ्यं बहुवारम्।
मैत्रीप्रस्तावो वृथा कृतः
आक्रमणं कुरु, आक्रमणं कुरु॥१६॥

अपहृतं विमानं भटशिरांसि
छिन्नानि येन तस्मिन् दुष्टे।
प्रस्थानकोट-मुम्बइ-दोषिणि ,
आक्रमणं कुरु, आक्रमणं कुरु॥१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्वं शान्तस्तिष्ठसि सम्प्रति यदि
कोटिशो जनानामपमानम्।
जागृहि जागृहि रे सुप्त सिंह
आक्रमणं कुरु, आक्रमणं कुरु॥१८॥

पूरितो घटः पापानां वै
नैव प्रमाणमधुनाऽपेक्ष्यम्।
अवलोक्य पुरो विजयादशमीम्
आक्रमणं कुरु, आक्रमणं कुरु॥१९॥

दुर्दृष्ट्या पश्येद्यदि राष्ट्रं
कुत्रापि कश्चिदप्यस्माकम्।
तत्कृते भव त्वं वज्रपात
आक्रमणं कुरु, आक्रमणं कुरु॥२०॥

ऋणशेषं रिपुशेषं पावक-
शेषञ्च न कुर्यादिति श्रुतिः।
मा त्वय्याक्रमणं रिपुः क्रियात्
त्वं पूर्वं तत्राक्रमणं कुरु॥२१॥

सत्याहिंसाकरुणामैत्री -
रक्षार्थमुपाया अवलम्ब्याः ।
अनिवार्या चेद्धिंसालम्ब्या
आक्रमणं कुरु, आक्रमणं कुरु॥२२॥

देशवासिनो मुदिताः सर्वे
स्युर्दर्शं दर्शं पराक्रमम्।
नाशय नाशय देशकण्टकान्
आक्रमणं कुरु, आक्रमणं कुरु॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अग्नित्रिशूलनागादीनां -
द्रष्टुं शक्तिं क्षण उपस्थितः ।
शान्तिं स्थापय हत्वा शत्रून्
आक्रमणं कुरु, आक्रमणं कुरु॥२४॥

अस्त्र-प्रहार-तेजस्-सुखोइ -
ब्रह्मोसादीनां परिचयाय।
अवसर आस्ते समुपस्थितोऽयम्
आक्रमणं कुरु, आक्रमणं कुरु॥२५॥

अक्रमणं त्वया कृतं न पूर्व-
माक्रमणं त्वयि जातं सुधीर!
क्षमयालमस्तु दर्शय शौर्यम्
आक्रमणं कुरु, आक्रमणं कुरु॥२६॥

भारतस्य सर्वे नागरिकाः
नेतारः कृषकाः वीरभटाः।
सम्भूय कुरुध्वं सिंहनाद-
माक्रमणं कुरु, आक्रमणं कुरु॥२७॥

छात्राः शिक्षकास्तथा श्रमिकाः,
वाणिज्योद्योगकृतोऽधिकृताः ।
सर्वे सम्भूय कुरुत हुंकृति -
माक्रमणं कुरु, आक्रमणं कुरु॥२८॥

बालकाः किशोराः अथ युवकाः
बालिकाः किशोर्यो युवतिगणाः।
प्रौढाः वृद्धाः सम्भूय वद-
न्त्वाक्रमणं कुरु, आक्रमणं कुरु॥२९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अधिवक्तारः कवयश्च नटाः
साहितीकलासङ्गीतकराः ।
सञ्चारमाध्यमीयाश्च वद -
न्त्वाक्रमणं कुरु, आक्रमणं कुरु॥३०॥

हे वैज्ञानिकाः शोधकाराः
दार्शनिकाः संन्यासिनः समे।
कुरुतोच्चैःस्वरेण सिंहनाद-
माक्रमणं कुरु आक्रमणं कुरु॥३१॥

अभिनेतारः क्रीडकास्तथा
धार्मिकाः कार्मिकाः शिल्पकराः।
सर्वे सम्भूय संवदध्वम्
आक्रमणं कुरु आक्रमणं कुरु॥३२॥

मानवता जयिनी जगति स्यात्
दानवता क्षीणबला च भवेत्।
सर्वत्र सन्तु सर्वे सुखिनः
आक्रमणं कुरु, आक्रमणं कुरु॥३३॥

प्रथमं दृश्यान् शत्रूंस्त्वं जय
तदनु च गूढान् शत्रूंस्त्वं जय।
अन्तर्लीनेष्वपि रिपुषु त्वम्
आक्रमणं कुरु, आक्रमणं कुरु॥३४॥

पार्थिवाः जलीयास्तैजस्काः
वायव्या नभोगता रिपवः।
तव सन्तु विजेतव्या नूनम्
आक्रमणं कुरु, आक्रमणं कुरु॥३५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राष्ट्रस्वरेण यद् व्यक्तमस्ति
तन्मतमङ्गीकुरु आशु वीर!
निद्रां जागृहि, जहि आतंकिन-
माक्रमणं कुरु आक्रमणं कुरु॥३६॥

अशनाया वृत्तेर्न्यूनत्वं
दारिद्र्यं स्वास्थ्यहीनता च।
सर्वेऽपीमे रिपवस्तेष्वपि
आक्रमणं कुरु, आक्रमणं कुरु॥३७॥

अन्तरपि सन्ति बहिरपि च सन्ति
सर्वत्रात्मानं त्रासयन्ति।
तेषां समूलमुन्मूलनार्थ-
आक्रमणं कुरु, आक्रमणं कुरु॥३८॥

ज्ञानाभयसाम्यत्यागानाम् -
स्मृतिधृतिमेधानां रक्षार्थम् ।
एतद्विरुद्धरिपुनाशार्थम् ,
आक्रमणं कुरु, आक्रमणं कुरु॥३९॥

दुर्जेयाः षड् रिपवो जेयाः
गूढप्रवेशिनो हन्तव्याः।
उपकृतिरक्षार्थं त्वमपकृतौ
आक्रमणं कुरु, आक्रमणं कुरु॥४०॥

अथवा किं बहुना रमाकान्त
उन्नमय्य भालं चिरञ्जीव।
विजयस्व रिपून् अव निजराष्ट्रम्
आक्रमणं कुरु, आक्रमणं कुरु॥४१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राष्ट्रस्वर एष समुद्घुष्टः
राष्ट्रस्वर एष श्रोतव्यः।
उच्चैः स्वरेण सर्वे वदन्तु
आक्रमणं कुरु आक्रमणं कुरु॥४२॥

रचनातिथिः-२३.९.२०१६

इयं रचना सर्वप्रथमं २३.९.२०१६ तमे दिनांके नोएडास्थे इण्टरनेशलन चैम्बर ऑफ मीडिया एण्ड एण्टरटैनमैण्ट इण्टस्ट्री एण्ड एशियन एकेडेमी ऑफ आर्ट' द्वारा समायोजिते द्वितीयग्लोबललिटरेरीफेस्टिबल इत्यत्र संस्कृतकविसम्मेलने पठिता॥

२९.०९.२०१६तमे दिनांके दिल्लीस्थे पी.जी.डी.ए.बी (सान्ध्ये) महाविद्यालये श्राविता। तदनु १९.१०.२०१६तमे दिनांके लखीमपुर खीरी दशहरा संस्कृत कविसम्मेलने श्राविता।

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शोभनं कृतम्

जय जय भारतभट! साधु साधु
शोभनं कृतं शोभनं कृतम्।
आतङ्कवादशाला ध्वस्ता
शोभनं कृतं शोभनं कृतम्॥१॥

शल्यचिकित्साक्रमणं कृत्वा
कल्पनातीतकौशलं कृतम्।
आशीविषस्य दंष्ट्रोत्खाता
शोभनं कृतं शोभनं कृतम्॥२॥

आतङ्कवाद-शिक्षण-शाला
ध्वस्ता निहता आतङ्किनश्च।
हेलया निशीथेऽस्मद्वीरैः
शोभनं कृतं शोभनं कृतम्॥३॥

अष्टाविंशे सैतम्बरेऽह्नि
शास्त्रेन्दुखाक्षि (२०१६) वर्षे रात्रौ।
अस्मद्वीरैर्यत्कृतं तद्धि
शोभनं कृतं शोभनं कृतम्॥४॥

कः कदा कुत्र वा कथं गतः
किं कर्तुमना इति न ज्ञातम्।
केनापि कार्यपूर्तेः पूर्वं
शोभनं कृतं शोभनं कृतम्॥५॥

निर्दोषजना नो हता भटै-
स्तेषां सम्पत्तिर्नो ध्वस्ता।
आगस्कृत एव जना निहताः
शोभनं कृतं शोभनं कृतम्॥६॥

Padma Shri Rama Kant Shukla Collection at Deep Vani Parivar, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परिणामानुमेयकार्या ये
भारतवीरास्तेऽस्मद्वन्द्याः ।
आतङ्किनागनकुलैर्वीरैः ,
शोभनं कृतं शोभनं कृतम्॥७॥

सेनापराक्रमो जयत्यसौ
गरिमा देशस्यावितो येन।
सर्वे वदन्ति 'भारतवीरैः
शोभनं कृतं शोभनं कृतम्॥८॥

ज्ञातं न मया त्वयका न तेन
ज्ञातं न केनचन किं जातम्।
विद्युद्गत्या सैनिकैर्जितं
शोभनं कृतं शोभनं कृतम्॥९॥

कज्जललिप्तानन एषोऽस्मत्-
प्रतिवेशी किं ब्रवीतु संसदि।
निजकर्मफलास्वादं करोतु
भारतवीरैः शोभनं कृतम्॥१०॥

आयत्यामपि यद्यातङ्की
शान्तो न भवेद्दण्ड्योऽसौ स्याद्।
सेनयोद्घुष्य सुस्पष्टतया
शोभनं कृतं शोभनं कृतम्॥११॥

भूधराकाशतोयेषु सदा
रक्षातत्परैः स्फूर्तवीरैः।
इतिहासं नूत्नं संविलिख्य
शोभनं कृतं शोभनं कृतम्॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आतङ्कपोषको निजपरिषदि
आस्ते किंकर्तव्यविमूढः।
विक्रमं सैनिकैः स्वं प्रदर्श्य
शोभनं कृतं शोभनं कृतम्॥१३॥

नेतारो रक्षत वाक्संयम-
मथ रक्षत भारतगरिमाणम्।
राष्ट्रस्वरेण सह वदत 'भटैः
शोभनं कृतं शोभनं कृतम्'॥१४॥

राष्ट्रस्वरेण काङ्क्षितं हि यत्
तत् पूरितमस्मद्वीरभटैः।
यैः स्थाने काले संविचार्य
शोभनं कृतं शोभनं कृतम्॥१५॥

(२९/०९/२०१६ तमे दिनाङ्के रात्रौ भारतीयसेनया कृतं शल्यचिकित्साक्रमणं (Surgical Strike) इत्यभियानं विज्ञाय प्रणीतेयं रचना)

रचनातिथिः - ०८/१०/२०१६

●

Padma Shri Rama Kant Shukla Collection at Deena Nath Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अन्धं तमःप्रविष्टा देशस्य राजधानी

अन्धं तमःप्रविष्टा देशस्य राजधानी।
दिल्लीव नास्ति दिल्ली देशस्य राजधानी॥१॥

दीपावलीप्रयाणे कूहावृताश्रुपूर्णा।
श्वसने गृणाति रोगान् देशस्य राजधानी॥२॥

विद्यालयाः पिनद्धा नासा पटावृतास्ते।
सर्वंसहास्ति विवशा देशस्य राजधानी॥३॥

आग्नेयखेलधूमात् पवनावरोधहेतोः।
वातेश्च भीषितास्ते देशस्य राजधानी॥४॥

मुखनासिकापटानां मूल्यानि वर्धितानि।
यानावरोधभीता देशस्य राजधानी॥५॥

डेंगूचिकन्नगुनियाक्रान्ता पुराधुनेयम्।
श्वासावरोधदष्टा देशस्य राजधानी॥६॥

प्रतिवर्षमेव पश्यति विस्फोटकस्य धूमम्।
जातैषमा रहस्यं देशस्य राजधानी॥७॥

राजीवमन्दिराभां गाढान्धकारलीनाम्।
पश्यति विवर्णवदना देशस्य राजधानी॥८॥

घण्टापथेषु गन्त्र्यो रिङ्गन्ति मन्दमन्दम्।
ग्रस्ताव्यवस्थया हा! देशस्य राजधानी॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ट्रककारबससमुत्सृष्टेन प्रदूषणेन।
नेत्रश्रुतिज्वरार्ता देशस्य राजधानी॥१०॥

भिषजोऽथ भेषजज्ञा रात्रिन्दिवं सुलभ्याः।
लाभं ददाति तेभ्यो देशस्य राजधानी॥११॥

नेतार आसतेऽस्मिन् कालेऽपि बद्धलक्ष्याः।
तान् प्रेक्ष्य विस्मतास्ते देशस्य राजधानी॥१२॥

षष्ठीव्रतस्थघट्टा ग्रस्ताः प्रदूषणेन।
फेनाम्बु वीक्ष्य ह्रीणा देशस्य राजधानी॥१३॥

षष्ठीव्रतं सुपूर्णं सूर्यः प्रतीक्ष्य एव।
भवतादियं प्रहृष्टा देशस्य राजधानी॥१४॥

विद्यालयावकाशे बाला गृहे निषण्णाः।
तत्क्रीडनैस्तु सुहासा देशस्य राजधानी॥१५॥

प्रभुरेव रक्षकोऽस्याः नो कोऽपि सर्वकारः।
निजयैव याति गत्या देशस्य राजधानी॥१६॥

राष्ट्रस्वरोऽस्ति कासश्वासादिरोगभीतः।
काङ्क्षति भवेत्प्रसन्नादेशस्य राजधानी॥१७॥

(रचनातिथिः - ७.११.२०१६)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दशमगुरुवरं नमामि

सर्वं वंशं स्वकीयं बलिमकुरुत यो धर्मयज्ञस्य वह्नौ,
संख्ये चम्कौरसंज्ञे प्रकटितमतुलं येन शौर्यं च धैर्यम्।
प्रादाद् यो धर्ममार्गं सकलजनहितं खालसाख्यं पवित्रं,
तं श्रीगोविन्दसिंहं दशमगुरुवरं श्रद्धयाहं नमामि॥१॥

यस्याम्बा गूजरी देवी पिता तेगबहादुरः।
गोविन्दाय नमस्तस्मै सर्ववंशप्रदायिने॥२॥

दशमं गुरुमीडेऽहं धर्मरक्षार्थमागतम्।
पिता पुत्राश्च धीरेण येन धर्मार्थमर्पिताः॥३॥

सेनानी काव्यकर्ता च समाजस्य सुधारकः।
योऽन्यायस्य विरोधार्थं त्यक्तसर्वस्व आत्मवान्॥४॥

फतेहसिंहनामानं सिंहं जोरावरं तथा।
अपरावपि यः पुत्रौ धर्मरक्षार्थमार्पयत्॥५॥

बलिदानं पितुर्दृष्ट्वाप्यासीद्यो धर्ममार्गगः।
अन्यायोन्मूलनार्थं यः सदा जागरितोऽभवत्॥६॥

निर्बलान् बलिनः कृत्वा भीतान् कृत्वा तथाभयान्।
श्येनैः साकं खगा युद्धे योजिता येन सत्वरम्॥७॥

शुभकर्माणि कर्तुं यो देवीं वरमयाचत।
युद्धात्पलायनं यस्य मतं नासीत् सुधर्मिणः॥८॥

कवीनां सारसर्वस्वं ज्ञानभक्तिक्रियात्मकम्।
ग्रन्थं यो गुरुरूपेण शिष्येभ्यो दत्तवान् गुरुः॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीमद्गोविन्दसिंहस्य तस्य जन्ममहोत्सवे।
पञ्चाशदूर्ध्वत्रिशते वर्ध्याप्यन्ते जना मया॥१०॥

रणे वीरगतिं प्राप्तान् सैनिकान् स्वसुतं च यः।
दृष्टवान् समया दृष्ट्या तस्मै स्युर्वन्दनानि नः॥११॥

शस्त्री शास्त्री च सेनानी धर्मरक्षाव्रती कृती।
साहित्यकर्ता यश्चासीत् तस्मै श्रीगुरवे नमः॥१२॥

●

विमुद्रीकरण-प्रश्नोत्तरम्

कोपिनी प्रेयसी उवाच-

साहस्री पञ्चशती व्यवहारात्प्रच्युतास्ति यथा।
तद्वन्मच्चित्तादपि कितव! विमुद्रीकृतोऽसि त्वम्॥१॥

चाटुकारः प्रिय उवाच-

विश्वासं जित्वा ते पुनरपि हृदयं प्रविष्टः स्याम्।
द्विसहस्रात्मकमुद्रा यथा पुनर्विपणिमाविष्टा॥२॥

●

Rama Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राजकवित्वाकांक्षा

कविरुवाच-

राजकविः स्यामहमिति कांक्षां कुर्वे शुभे देहलि!
वद तव कोऽस्तीश्वर इति कुर्यां तस्य प्रशस्तिगानमहम्।

विद्युज्जलयोर्मूल्यं नो वर्धितमस्ति यत्कृपया।
तस्य प्रशस्तिगानं डिण्डिमघोषेण कुर्वेऽहम्॥१॥

प्रथमो ध्वनिरुवाच-

अहमस्मि मुख्यमन्त्री यस्य प्रयत्नैरिदं जातम्।
लब्ध्वा प्रभूतबहुमतमहमस्यां दिशि प्रयत्नशीलोऽस्मि॥२॥

द्वितीयो ध्वनिरुवाच-

इदमास्ते मम कार्यं जलविद्युत्पूर्तिकर्ताहम्।
दिल्लीनगरनिगम इति मम नाम न किं श्रुतं भवता? ३॥

तृतीयो ध्वनिरुवाच-

उपराज्यपालनामा दिल्लीसर्वोच्चशासकोऽहं वै।
केन्द्रीयसर्वकारः शासनकार्याय मां नियोजयति॥४॥

इष्टं राजकवित्वं यदि त्वदीयं कवे! तस्मात्।
राजप्रशस्तिगानं कुर्ववहितमानसेन त्वम्॥५॥

कविरुवाच-

देहलि! ब्रूहि को भर्ता तवास्ते प्राणरक्षकः?
महापौरो मुख्यमन्त्री महामात्योऽथवाऽपरः?॥६॥

देहली उवाच-

प्रभुरेवास्ति मे भर्ता स एव प्राणरक्षकः।
अजागलस्तनाः शेषे कालयापनतत्पराः॥७॥

चिकन्नगुनिया वा स्यात् डेंगू वा स्यान्महाज्वरः।
शूकरज्वरकोपो वा स्वयमायान्ति यान्ति च॥८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यानावरोधकष्टं वा पीडा नालावरोधजा।
मार्गभङ्गापघाता वा सह्या स्युः प्रभुलीलया॥९॥

वायुप्रदूषणं वास्ताम् ध्वनिदूषणमस्तु वा।
जलप्रदूषणं वा स्यात् स्वयमायान्ति यान्ति च॥१०॥

उत्कोचाचार आस्तां वा भ्रष्टाचारोऽथवा भवेद्।
केनाप्युन्मूलनीयो नो द्रष्टव्यस्तु पदे-पदे॥११॥

तर्कभट्टारकाः सर्वे सर्वे जनहितैषिणः।
सर्वे चासन्दिकाप्राणाः सांख्यपूरुषसन्निभाः॥१२॥

प्रभुरेवास्ति मे भर्ता प्रशस्तिं कुरु तस्य वै।
मत्क्रोडस्थजनानां यो रक्षकोऽस्ति स्वमायया॥१३॥

तस्य प्रशस्तिगानेन त्वं शान्तिं लप्स्यसे पराम्।
राजप्रशस्तिगानेन पश्चात्तापं त्वमाप्नुयाः॥१४॥

इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥१५॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतघोषगीतम् -

राष्ट्रभाषा संस्कृतम्

राष्ट्रभाषा संस्कृतम्
विश्वभाषा संस्कृतम्
लोकभाषा संस्कृतम्
सर्वभाषा संस्कृतम्॥१॥

ज्ञानभाषा संस्कृतम्
कर्मभाषा संस्कृतम्
भक्तिभाषा संस्कृतम्
योगभाषा संस्कृतम्॥२॥

शास्त्रभाषा संस्कृतम्
काव्यभाषा संस्कृतम्
नाट्यभाषा संस्कृतम्
शिल्पभाषा संस्कृतम्॥३॥

गद्यभाषा संस्कृतम्
पद्यभाषा संस्कृतम्
मिश्रभाषा संस्कृतम्
हृद्यभाषा संस्कृतम्॥४॥

नृत्यभाषा संस्कृतम्
गीतभाषा संस्कृतम्
कृत्यभाषा संस्कृतम्
वृत्तभाषा संस्कृतम्॥५॥

शोधभाषा संस्कृतम्
बोधभाषा संस्कृतम्
न्यायभाषा संस्कृतम्
सांख्यभाषा संस्कृतम्॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

धर्मभाषा संस्कृतम्
अर्थभाषा संस्कृतम्
कामभाषा संस्कृतम्
मोक्षभाषा संस्कृतम्॥७॥

शैवभाषा संस्कृतम्
शाक्तभाषा संस्कृतम्
वैष्णवी वाक् संस्कृतम्
सात्वती वाक् संस्कृतम्॥८॥

जैनभाषा संस्कृतम्
बौद्धभाषा संस्कृतम्
आस्तिकानां संस्कृतम्
नास्तिकानां संस्कृतम्॥९॥

ब्रह्मभाषा संस्कृतम्
क्षत्रभाषा संस्कृतम्
वैश्यभाषा संस्कृतम्
कर्मिभाषा संस्कृतम्॥१०॥

प्रीतिभाषा संस्कृतम्
नीतिभाषा संस्कृतम्
शूरभाषा संस्कृतम्
धीरभाषा संस्कृतम्॥११॥

प्रेमभाषा संस्कृतम्
हास्यभाषा संस्कृतम्
शोकभाषा संस्कृतम्
क्रोधभाषा संस्कृतम्॥१२॥

वीरभाषा संस्कृतम्
भीतिभाषा संस्कृतम्
विस्मयाढ्यं संस्कृतम्
शान्तभाषा संस्कृतम्॥१३॥

Pandita Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वैद्यभाषा संस्कृतम्
वेद्यभाषा संस्कृतम्
सूत्रभाषा संस्कृतम्
भाष्यभाषा संस्कृतम्॥१४॥

वेदभाषा संस्कृतम्
आदिभाषा संस्कृतम्
उपनिषद्वाक् संस्कृतम्
भारतात्मा संस्कृतम्॥१५॥

सूरिभाषा संस्कृतम्
नेतृभाषा संस्कृतम्
श्रमिकभाषा संस्कृतम्
संगणकवाक् संस्कृतम्॥१६॥

सत्कलावाक् संस्कृतम्
साहितीवाक् संक्कृतम्
हर्षदा वाक् संस्कृतम्
तोषदा वाक् संस्कृतम्॥१७॥

दृश्यभाषा संस्कृतम्
श्रव्यभाषा संस्कृतम्
प्राच्यभाषा संस्कृतम्
नव्यभाषा संस्कृतम्॥१८॥

पाठ्यमास्ते संस्कृतम्
लेख्यमास्ते संस्कृतम्
श्रव्यमास्ते संस्कृतम्
वाच्यमास्ते संस्कृतम्॥१९॥

पूजनीयं संस्कृतम्
कीर्तनीयं संस्कृतम्
गोपनीयं संस्कृतम्
सेवनीयं संस्कृतम्॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तावकी वाक् संस्कृतम्
मामकी वाक् संस्कृतम्
तस्य भाषा संस्कृतम्
कस्य नास्ते संस्कृतम्॥२१॥

सूक्तिसिन्धुः संस्कृतम्
युक्तिगेहः संस्कृतम्
विश्वबन्धुः संस्कृतम्
विश्वनीडं संस्कृतम्॥२२॥

व्यासभाषा संस्कृतम्
न्यासभाषा संस्कृतम्
अस्ति सरलं संस्कृतम्
अस्ति सरसं संस्कृतम्॥२३॥

नम्रतावाक् संस्कृतम्
कम्रतावाक् संस्कृतम्
मोहिनी वाक् संस्कृतम्
शोभना वाक् संस्कृतम्।२४॥

गर्जनावाक् संस्कृतम्
तर्जनावाक् संस्कृतम्
वर्जनावाक् संस्कृतम्
सर्जनावाक् संस्कृतम्॥२५॥

पुष्पभाषा संस्कृतम्
वज्रभाषा संस्कृतम्
वह्निभाषा संस्कृतम्
नीरभाषा संस्कृतम्॥२६॥

स्वस्तिभाषा संस्कृतम्
शास्तिभाषा संस्कृतम्
आर्यभाषा संस्कृतम्
कार्यभाषा संस्कृतम्॥२७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad Dham Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्रान्तिभाषा संस्कृतम्
शान्तिभाषा संस्कृतम्
क्षान्तिभाषा संस्कृतम्
व्यक्तिभाषा संस्कृतम्॥२८॥

सामभाषा संस्कृतम्
दानभाषा संस्कृतम्
भेदभाषा संस्कृतम्
दण्डभाषा संस्कृतम्॥२९॥

घोषभाषा संस्कृतम्
रोषभाषा संस्कृतम्
तोषभाषा संस्कृतम्
कोशभाषा संस्कृतम्॥३०॥

संस्कृतेर्वाक् संस्कृतम्
निर्भया वाक् संस्कृतम्
शक्तिभाषा संस्कृतम्
रक्षिणी वाक् संस्कृतम्॥३१॥

स्वस्थभाषा संस्कृतम्
स्वच्छभाषा संस्कृतम्
श्रेष्ठभाषा संस्कृतम्
ऐक्यभाषा संस्कृतम्॥३२॥

भावनावाक् संस्कृम्
प्रेरणावाक् संस्कृतम्
देशनावाक् संस्कृतम्
साधनावाक् संस्कृतम्॥३३॥

बालकानां संस्कृतम्
नव्ययूनां संस्कृतम्
प्रौढनृणां संस्कृतम्
वृद्धनृणां संस्कृतम्॥३४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रेयसी वाक् संस्कृतम्
श्रेयसी वाक् संक्कृतम्
ज्यायसी वाक् संस्कृतम्
नव्यसी वाक् संस्कृतम्॥३५॥

सद्गुरोर्वाक् संस्कृतम्
शिष्यवाणी संस्कृतम्
संगणकवाक् संस्कृतम्
जालभाषा संस्कृतम्॥३६॥

गौडभाषा संस्कृतम्
लाटभाषा संस्कृतम्
कैशिकीवाक् संस्कृतम्
भारतीवाक् संस्कृतम्॥३७॥

ब्रह्मभाषा संस्कृतम्
जीवभाषा संस्कृतम्
मायिकी वाक् संस्कृतम्
जगद्भाषा संस्कृतम्॥३८॥

द्वैतभाषा संस्कृतम्
अद्वया वाक् संस्कृतम्
सद्गुणा वाक् संस्कृतम्
निर्मला वाक् संस्कृतम्॥३९॥

मुस्लिमानां संस्कृतम्
क्रैस्तवानां संस्कृतम्
सिक्खभाषा संस्कृतम्
भारतानां संस्कृतम्॥४०॥

संस्कृतेर्वाक् संस्कृतम्
सत्कृतेर्वाक् संस्कृतम्
उन्नतेर्वाक् संस्कृतम्
सद्गतेर्वाक् संस्कृतम्॥४१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रक्तभाषा संस्कृत३म्
पीतभाषा संस्कृतम्
कृष्णभाषा संस्कृतम्
शुक्लभाषा संस्कृतम्॥४२॥

स्कन्धभाषा संस्कृतम्
पर्वभाषा संस्कृतम्
अङ्कभाषा संस्कृतम्
सर्गभाषा संस्कृतम्॥४३॥

पुण्यभाषा संस्कृतम्
गुण्यभाषा संस्कृतम्
युद्धभाषा संस्कृतम्
शुद्धभाषा संस्कृतम्॥४४॥

नर्मभाषा संस्कृतम्
मर्मभाषा संस्कृतम्
वर्मभाषा संस्कृतम्
शर्मभाषा संस्कृतम् ॥४५॥

मातृभाषा संस्कृतम्
भ्रातृभाषा संस्कृतम्
पित्र्यभाषा संस्कृतम्
मित्रभाषा संस्कृतम्॥४६॥

भूमिभाषा संस्कृतम्
व्योमभाषा संस्कृतम्
वायुभाषा संस्कृतम्
सूर्यभाषा संस्कृतम्॥४७॥

उत्तरावाक् संस्कृतम्
दक्षिणावाक् संस्कृतम्
पूर्वभाषा संस्कृतम्
वारुणीवाक् संस्कृतम्॥४८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रत्नरत्नैः पूरितम्
नव्यकाव्यैः संभृतम्।
भातु राष्ट्रे संस्कृतम्
भातु भूमौ संस्कृतम्॥४९॥

आदिकविना सेवितं
नव्यकविभिः सेवितं
भातु राष्ट्रे संस्कृतम्
भातु भूमौ संस्कृतम्॥५०॥

अन्वितेर्वाक् संस्कृतम्
संगतेर्वाक् संस्कृतम्
मित्रतावाक् संस्कृतम्
संवदध्वम् संस्कृतम्॥५१॥

(रचनातिथिः- १३.०७.२०१७)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जलप्लावनं जम्मुकाश्मीरराज्ये

प्रकृत्याः प्रचण्डः प्रकोपो जलौघ-
स्वरूपेण दृष्टोऽभवत् भीतिदाता॥
क्षणेनैव लोकाः विपद्ग्रासभूता,
हता आहता जम्मुकाश्मीरराज्ये॥१॥

निमग्ना अनेके जना वारिपूरे,
प्रवाहे निलीनाः पशूनां समूहाः।
समूलं तदोन्मूलिताः पादपाः हा,
महद्भीतिदाता जलौघोऽयमास्ते॥२॥

इयं चन्द्रभागा शुतुद्रिस्तथेयं,
मता जीवनस्य प्रदात्री समेषाम्।
ह हा दृश्यते जीवनं नाशयन्ती
कथं साद्य तुङ्गैस्तरङ्गैः समेषाम्॥३॥

कथञ्चिज्जनाः केऽपि संभारशीर्षाः,
जलौघाद्बर्हिस्त्वागताः किन्तु तेषाम्।
अनेके सदस्याः कुटुम्बस्य पश्चात्,
विपत्त्यावृता हन्त! वैवश्यबद्धाः॥४॥

अमात्यः प्रधानो विमानेन नृणां,
विपत्तिं विलोक्याभवत् चिन्तितोऽथो।
विनष्टिं जनानामिमां भीतिदात्रीं
विलोक्यागमत् वाहिनी सैनिकानाम्॥५॥

जना रक्षिताः सैनिकैः स्वप्रयत्नैः,
परित्राणमापद्गतानां तथाभूत्।
क्वचित्सेतुभङ्गः क्वचिद्गेहभङ्गः,
बुभुक्षा पिपासा क्वचिज्जृम्भमाणा॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्वचिच्चौषधानामभावोऽनुभूतः,
कुटुम्बाद् वियुक्ताः अनेके मनुष्याः।
इतीत्थं समस्याः अनेकाः प्रवृद्धाः,
जनान् व्यावृतास्याः भृशं भाययन्त्यः॥७॥

समाधिः कृतः सैनिकैस्तूर्णमासां,
जयन्त्यस्मदीयाः भटाः भारतस्य।
इमे सैनिकाः देवदूता इवासन्,
भयादुद्धृतानां जनानां कृते वै॥८॥

जनान् लक्षशस्त्रातुमेते प्रयत्नान्,
अनेकानकुर्वन् समर्थाः प्रवीराः॥
विमानानि नौकास्तदा त्राणकार्ये,
न्ययुज्यन्त रात्रिन्दिवं शासनेन॥९॥

प्रधानमन्त्री स्वयमेत्य तत्र,
प्रत्यं शृणोत्साह्यमतन्द्रितः सन्॥
सहस्रकोटिप्रमितं स राशिं,
दातुं स्वकोशादुदघोषयच्च॥१०।

चिकित्साप्रवीणाः गतास्तत्र वैद्याः,
विपद्ग्रस्तलोकावनार्थं सुविज्ञाः।
विमानात्प्रदत्तं जलं वस्त्रमन्नं,
तथा भेषजं सैनिकैः पीडितेभ्यः॥११॥

भवेन्नो महामारिका येन तत्र,
प्रयासाः कृता द्राक्तरैः सावधानम्।
विपद्धर्षितास्तत्र नार्यो नराश्च,
बलैः रक्षिताः लक्षशः स्वप्रयत्नैः॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अये जम्मूकश्मीरलोका इदानीं,
पुनर्निर्मितिं स्वीयभूमेः कुरुध्वम्॥
कृतज्ञाः भवन्तः स्वदेशस्य तूर्णम्,
सुपुष्ट्यै सुतुष्ट्यै प्रगत्यै यतध्वम्॥१३॥

परित्राणकार्येषु लग्नाः जना ये,
समे सन्ति वन्द्यास्तथैवाभिनन्द्याः॥
इमे सैनिकाः कर्मवीराः जयन्तु,
स्वदेशस्य रक्षापरा नायकाश्च॥१४॥

धरास्वर्ग आपत्समुद्रे निमग्नः,
पुनः स्वास्थ्यमाप्नोति येषां प्रयासैः॥
समे तेऽभिनन्द्याः सुकर्मप्रवीराः,
पुनः कान्तिमाप्नोति काश्मीरभूमिः।१५॥

●

Padma Shri Rama Kanta Shukla Gaushala Sarayu Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारत-मुक्तकानि

यत्र गोविन्दसिंहो गुरुः खालसा-
पन्थ-संस्थापको धर्मरक्षापरः।
सर्ववंशस्य दानी जनैः स्मर्यते,
भूतले भाति तन्मामकं भारतम्॥१॥

(१०/०१/२०१७)

सप्तपर्णद्रुमैः पूगमोचावनैः,
शाल्मली-वंश-तालद्रुमैः शोभितः।
चायसूद्यानरम्यश्च यस्यासमो,
भूतले भाति तन्मामकं भारतम्॥२॥

खड्गिभिर्दन्तिभिः सैरिभैः सूकरैः,
कच्छपैश्चान्यसत्त्वैस्सदैवाद्भुतम्।
काजिरंगाख्यमुद्यानमंके दधत्,
भूतले भाति मेऽनारतं भारतम्॥३॥

भ्रष्टमाचारमुच्छेत्तुमाकांक्षिणो,
निर्भया यत्र दृश्याः समुत्साहिनः।
रक्षितुं स्वाभिमानं स्वराष्ट्रस्य तद्,
भूतले भाति मेऽनारतं भारतम्॥४॥

(ए.वी.एस ०९/०२/२००९)

खासि-गोरो-जयन्तीति नामांकिता,
यत्र भाषा नगा जातयः शोभिताः।
ईदृशो यस्य मेघालयो राजते,
भूतले भाति तन्मामकं भारतम्॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य शीलांगसंज्ञा शुभा राजते,
राजधानी यथानामसंशोभिता।
ईदृशो यस्य मेघालयो भ्राजते,
भूतले भाति तन्मामकं भारतम्॥६॥

कृष्णपौत्रोऽनिरुद्धो निरुद्धोऽभवद्,
कामरूपे यदीये पुरे शोणिते।
चित्रलेखाहृतो बाणकन्याज्ञया,
भूतले भाति तन्मामकं भारतम्॥७॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हरियाणा-धरणी

जयतु जयतु हरियाणा-धरणी।
भारत-वसुधा-सौख्यवितरणी।।
भारतभूमेर्मङ्गलकरणी।

मनु-शतरूपा-तपस्थलीयम्।
कौरव-पाण्डव-रणस्थलीयम्।
गीता-ज्ञानाविष्करणीयम्
जयतु जयतु हरियाणा-धरणी।।

बाणभट्टवर्णितसौन्दर्या।
अस्या भाषामृतसोदर्या।।
व्यासकपिलमनुचिन्तनशरणी।
जयतु जयतु हरियाणा-धरणी।।

वत्सलरसप्रवाहकसूरा।
बालमुकुन्द-व्यङ्ग्यसुपूरा।।
वैदिकधारा-मङ्गलकरणी।
जयतु जयतु हरियाणा-धरणी।।

श्रेयांसः प्रेयांसो धीराः!
नेतारो नागरिकाः वीराः!
क्रियतामेषा सौख्यवितरणी!
जयतु जयतु हरियाणा-धरणी।।
(रचनातिथिः - १९.३.२०१७)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्फुटपद्यानि

वितर-वितर ग्रामे ग्रामे जलं घन सत्वरं
विटपनिवहो दग्धो दग्धः प्रचण्डदवानलैः।
प्रसरति वने क्रूरो दावानलोऽतिभयङ्करः
विपदि यदि नालम्बो भूम्यास्तदा किमु ते जलैः?॥१॥

कुरुत कुरुत शत्रोर्मानभङ्गं सुवीराः
नयत नयत देशस्य प्रतिष्ठां सदाग्रे।
हरत हरत शोकं मातृभूमेः सुधीराः
जयत जयत युद्धे सैनिकाः भारतीयाः॥२॥

भो नेतारः शृणुत वचनं मामकीनं समेताः
देशोद्धारं कुरुत सततं हार्दभावेन यूयम्।
देशेऽस्मिन् या विवृतवदनाः सन्ति नैकाः समस्याः
तासां कर्तुं सपदि! सुसमाधिं यतध्वम् यतध्वम्॥३॥

वितर भगवन्! सद्बुद्धिं मे मनो विमलीकुरु
परगुणगणान् वीक्ष्याहं स्यां सदैव मुदान्वितः।
मदहितपरान् सर्वान् जन्तूनुपेक्ष्य कदान्वहम्
अखिलभुवने व्याप्तं साम्बं शिवं प्रणमाम्यहम्॥४॥

जाति-द्वेष-भावना नश्यतु
विधिशासनं सर्वतो जयतु।
जनो जनोऽत्र कार्यमाप्नोतु
कर्मरतं मे भवतु भारतम्॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गोम्मटेशं जिनं तं मुदा भावये

भारतस्य प्रदेशोऽस्ति कर्णाटकः
यस्य पुन्नाटसंज्ञान्तरं राजते।
श्रीभृतक्षेत्रपार्श्वे च योऽस्ति स्थितः
गोम्मटेशं जिनं तं मुदा भावये॥१॥

षट्शतीं यस्य सोपान पङ्क्तिर्जनः
श्रद्धया लंघयित्वाऽतिहर्षान्वितः।
विग्रहं वीक्ष्य शान्तिं परां प्राप्नुयात्
गोम्मटेशं जिनं तं मुदा भावये॥२॥

दिव्यमूर्धास्ति यो दिव्यभालोऽस्ति यो
दिव्यकेशोऽस्ति यो दिव्यकर्णोऽस्ति यः।
दिव्यनेत्रस्तथा योऽस्ति मन्दस्मितो
गोम्मटेशं जिनं तं मुदा भावये॥३॥

कम्बुकण्ठो महाबाहुरास्ते च यो
दिव्यवक्षास्तथा दिव्यनाभिश्च यः।
निर्विकारस्तथा दिव्यकान्तिश्च यो
गोम्मटेशं जिनं तं मुदा भावये॥४॥

द्वादशेऽब्देऽभिषेकं महामस्तके
श्रद्धया यस्य कृत्वा कृतार्थाः नराः।
स्नाप्यते यश्च मेघैः प्रहृष्टैः स्वयम्
गोम्मटेशं जिनं तं मुदा भावये॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पादपृष्ठे च जंघे तथोरू शुभे
यस्य चाजानबाहू विलोक्य श्रुतौ।
दर्शको भक्तिसिन्धौ निमग्नो भवेत्
गोम्मटेशं जिनं तं मुदा भावये॥६॥

पीतवस्त्राणि धृत्वा जनो यत्पदौ
पूजयित्वा प्रमोदं परं प्राप्नुते।
यस्य कृत्वाभिषेकं नरो मोदते
गोम्मटेशं जिनं तं मुदा भावये॥७॥

यत्पुरः प्राङ्गणस्था जनाः श्रद्धया
स्तोत्रपाठं विधायार्चनं कुर्वते।
संस्कृत-प्राकृतादिप्रयोगान्विता
गोम्मटेशं जिनं तं मुदा भावये॥८॥

दर्शनं यस्य कर्तुं ह्यशक्तो जनो
डोलयानेन यात्रां विधत्ते धनी।
यं यतीनां गणश्चान्वहं वन्दते
गोम्मटेशं जिनं तं मुदा भावये॥९॥

स्वस्तिशब्दोत्तरश्रीयुतः स्वामिराट्
चारुकीर्तिर्महापूर्वभट्टारकः।
यस्य सोपानमार्गे मया भाषितो
गोम्मटेशं जिनं तं मुदा भावये॥१०॥

मस्तकस्नानकार्ये क्षमो नाऽभवत्
यर्हि चामुण्डरायश्चमूनां पतिः।
स्नापयामास कूष्माण्डदेवी हि यं
गोम्मटेशं जिनं तं मुदा भावये॥११॥

(रचनातिथिः - ८.६.२०१७)

●

Padma Shri Rama Kant Shukla Collection at Jivaji Rao Sarvamani Parishad, Uttam Nagar New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जयतु भारतं लसतु भारतम्

जयतु भारतं जयतु भारतम्!
लसतु भारतं लसतु भारतम्!

एकभारतं श्रेष्ठभारतम्
स्वच्छभारतं स्वस्थभारतम्
भव्यभारतं दिव्यभारतम्
नव्यभारतं लसतु भारतम्॥१॥

जाति-धर्म-विद्वेषविहीनम्
वृत्तिहीनता-कष्टविहीनम्
कुटिलकुवृत्तच्छद्मविहीनम्
स्वस्वकर्मसन्तुष्टभारतम्!
जयतु भारतम् लसतु भारतम्!!२॥

शिक्षा सर्वेभ्यः सुलभाः स्यात्
स्वास्थ्यं सर्वेभ्यः सुलभं स्यात्
कार्यं सर्वेभ्यः सुलभं स्यात्
विश्वभूषणं भवतु भारतम्!
जयतु भारतम् लसतु भारतम्!!३॥

योगाभ्यास-निरतजनता स्यात्
देशदेवता जनता भूयात्
सर्वातङ्कविलोपो भवतात्
परितो रक्षितमस्तु भारतम्
लसतु भारतं जयतु भारतम्॥४॥

सकलकला अस्मिन् विलसेयुः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शिल्पाद्यस्मिन्नतिहृष्येयुः
सर्वे हस्ताः कर्मरताः स्युः
पुष्ट-समृद्धं भवतु भारतम्!
जयतु भारतं लसतु भारतम्॥५॥

आत्मघातविवशाः न नराः स्युः
बलात्कारघटना नेह स्युः
सर्वे निरामयाः सुखिनः स्युः
दैन्यविहीनं भवतु भारतम्
लसतु भारतं जयतु भारतम्!!६॥

साहित्यस्योन्नत्या दीप्तम्
विज्ञानस्योन्नत्या दीप्तम्
वाणिज्यस्योन्नत्या दीप्तम्
आत्मनिर्भरं भवतु भारतम्!
जयतु भारतं लसतु भारतम्!!७॥

कर्मकुशलतायाः प्रशिक्षणम्
उपग्रहाणां सफलमोक्षणम्
सेवावस्तुकरस्य योजनम्
प्रक्षेपास्त्रसफलपरीक्षणम्
कुर्वद् विश्वे लसतु भारतम्
जयतु भारतं लसतु भारतम्!!८॥

शत्रुदर्पदलने निष्णातम्
कीलकमिव रिपुवक्षसि खातम्
दारिद्र्ये कुर्वत् पदघातम्
विश्वबन्धुतां किरतु भारतम्!
जयतु भारतं लसतु भारतम्!!९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रजातन्त्ररक्षायां दक्षम्
निजसीमासंगोपनदक्षम्
गृह्णत्सदा साधुतापक्षम्
शृणवद् धीरतया च विपक्षम्
लक्ष्यं स्वं प्राप्नोतु भारतम्
जयतु भारतं लसतु भारतम्!!१०॥

परिहरतात् कार्येषु विलम्बम्
असहायेभ्यो ददद्वलम्बम्
भ्रष्टाचारं हरदविलम्बम्
हृष्टं पुष्टं लसतु भारतम्
जयतु भारतं लसतु भारतम्!!११॥

नेतृजनो जनसेवां कुरुतात्
आलस्यं लोभं परिहरतात्
जनता कर्मसु निरतां जयतात्
शिक्षास्वास्थ्यदमस्तु भारतम्
जयतु भारतं लसतु भारतम्!!१२॥

दण्ड्योऽवश्यं भवताद् दण्ड्यः
दण्ड्यो न स्तात्कदाप्यदण्ड्यः
देशोऽस्माकं जयत्वखण्डः
लभतां मोदं सदा भारतम्
जयतु भारतं लसतु भारतम्!!१३॥
(३०/०६/२०१७)

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सामान्यजनोऽहं भारतस्य

भारतभूमिं स्वर्गं मन्ये,
भारतभूमिं शिरसा नमामि।
दुःखं सुखञ्च सममेव सहे,
सामान्यजनोऽहं भारतस्य॥१॥

स्वातन्त्र्यं दृष्टं देशस्य,
प्रोन्नतिरार्थिकी तथा दृष्टा।
पश्यामि चापराधान्नित्यं,
सामान्यजनोऽहं भारतस्य॥२।

निर्वाचनपर्वण्यहमीक्षे,
प्रतिलोभकानि चाकर्णयामि।
प्रतिवर्षं माहार्घ्यं वहामि,
सामान्यजनोऽहं भारतस्य॥३॥

जीवनं व्यतीतं मया हन्त!
तत्तत्प्राप्त्यै पंक्तिस्थितेन।
शुभदिवसानामाशाङ्कुरोमि,
सामान्यजनोऽहं भारतस्य॥४॥

वृद्धिं भजन्ति यदि वेतनानि,
वस्तूनां मूल्यवृद्धिरधिका।
क्रयशक्तिर्नास्ते मुद्रायाम्,
सामान्यजनोऽहं भारतस्य॥५॥

Padma Shri Rama Kant Shukla Collection at Devarshi Parishad, Uttam Nagar New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रतिमासं यद्वेतनं लभे,
तत्पर्याप्तं नोदरपूर्त्यै।
निजगेहं स्वप्नमेव मन्ये,
सामान्यजनोऽहं भारतस्य॥६॥

अनिवार्यतया क्रेतुं बाध्यो,
जङ्गभाषं हा हन्ताहम्!
तत्कृते वित्तचिन्तां कुर्वे,
सामान्यजनोऽहं भारतस्य॥७॥

सर्वे निन्दन्ति जातिवादं,
सर्वे च जातिवादं श्रयन्ति।
गुण उपेक्षितो रोदिति कोणे,
सामान्यजनोऽहं भारतस्य॥८॥

उत्कोचं दातुमहं विवशो,
गृहनिर्माणार्थं पदे पदे।
यदि नो ददामि गृहविध्वंसः,
सामान्यजनोऽहं भारतस्य॥९॥

रुग्णालयेषु नो लभे स्थान-
मुपचारार्थं सामान्यतया।
तत्कृतेऽपि संस्तुतिमाकांक्षे,
सामान्यजनोऽहं भारतस्य॥१०॥

घण्टापथेषु रथ्यासु तथा-
पणवीथिषु नाहं सुरक्षितः।
परिमुषितो जाये लुण्टाकैः,
सामान्यजनोऽहं भारतस्य॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुविधाशुल्कं यदि नो ददामि,
कार्यं न मदीयं सिद्धं स्यात्।
अक्षिणी निमील्य सहे सर्वं
सामान्यजनोऽहं भारतस्य॥१२॥

पञ्चसु वर्षेषु महत्त्वं मे,
जायते स्वल्पकालाय परम्।
मतदानोत्तरं पूर्वसदृशः,
सामान्यजनोऽहं भारतस्य॥१३॥

भाषाभूषाशनजातिधर्म-
सम्प्रदायलिंगक्षेत्रगतैः।
वादैर्बद्धश्चतुरैः मूढः,
सामान्यजनोऽहं भारतस्य।१४॥

भारतभाग्यस्य विधाताहं,
कोटिशोऽस्ति संख्या यद्यपि मे।
किन्तु स्वकीयप्रतिनिधिमुषितः,
सामान्यजनोऽहं भारतस्य॥१५॥

नेतारोऽधिकारिणो मिलिता,
लुण्ठन्ति दिवानिशमेव माम्।
मम रक्षकोऽस्ति केवलं प्रभुः,
सामान्यजनोऽहं भारतस्य॥१६॥

वासोऽन्नं वासं लब्धुमहं,
नाद्यावधि लब्धप्रतिभूतिः।
नभसि त्रिशंकुरिव लम्बे हा!
सामान्यजनोऽहं भारतस्य॥१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्मिन् विश्वासो मया कृत-
स्तेनैव निर्दयं परिमुषितः।
स्वैरेव लुण्ठितः कं निन्द्याम्,
सामान्यजनोऽहं भारतस्य॥१८॥

टी.वी.-सरणीषु विलोकयामि,
कलहात्मकवादविवादमहम्।
विवशो भवामि सर्वं सोढुं,
सामान्यजनोऽहं भारतस्य॥१९॥

बाबासंज्ञकवञ्चकं नृणा-
माख्यानाकर्णनदुःखी सन्।
प्रतिकर्तुं किमपि न पारयामि,
सामान्यजनोऽहं भारतस्य॥२०॥

सांसदाश्चिता प्रतिपक्षार्थं,
सदनेऽन्योन्यं कण्ठे लगन्ति।
पेंशनं लभन्ते मद्वित्तात्,
सामान्यजनोऽहं भारतस्य॥२१॥

न्यायालयोऽपि तूष्णीं सहते,
शासनोत्तरं सोऽङ्गीकरोति।
विवशः सन् प्रेक्षे लुण्टाकान्,
सामान्यजनोऽहं भारतस्य॥२२॥

आङ्ग्लैरपि परिमुषितो न तथा,
स्वप्रतिनिधिभिर्वञ्चितो यथा।
भ्रष्टाचाराक्रान्तोऽस्मि हन्त!
सामान्यजनोऽहं भारतस्य॥२३॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शुद्धिपत्रम्

पृष्ठे	पद्ये	पङ्क्तौ	अशुद्धं	शुद्धम्
२४५	२	१	पङ्क्ति	पङ्क्ते
२४६	७	१	पद्दौ	पदे
२४८	१३	३	निरतं	निरतं
२५०	३	११	पर्वण्य	पर्वाण्य
२५१	७	२	जङ्ग	जङ्गम
२५३	२३	३	कान्तो	क्रान्तो

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मैथिलीशरण
भारतभारती
मैथिली-शरण
(बचपन की कविता)
पढ़ने आए
लोकनिकेतन
पाठकगण के लिए
विनम्र :
सादर - रिना महतो दाहुई
उपाध्यक्ष पाठकगण परिषद
24.10.2018
दशहरा रा 2075

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

काव्यप्रणेता रमाकान्तशुक्लः



जन्मतिथिः २४-१२-१९४० ई०

जन्मस्थानम् खुर्जा (उ०प्र०)

पिता (स्व०) श्री ब्रह्मानन्द शुक्लः

माता श्रीमती प्रियम्बदा शुक्ला

शिक्षास्थले खुर्जास्थश्रीराधाकृष्ण-संस्कृतकालेजः, एन.आर.ई.सी.कालेजश्च।

शिक्षा एम.ए. (हिन्दी-संस्कृतयोः) पीएच०डी० (आगरा), साहित्याचार्यः

राष्ट्रपतिसम्मानप्रमाणपत्रेण पद्मश्री-सम्मानेन चालङ्कृतः संस्कृतविद्वान्।

प्रकाशिता ग्रन्थाः जैनाचार्य रविषेणकृत पद्मपुराण और तुलसीकृत रामचरितमानस (उ०प्र० शासनपुरस्कृतः), उत्तररामचरितप्रियम्वदाव्याख्या (सहलेखनम्)।

प्रकाशितानि काव्यानि भाति मे भारतम्, जय भारतभूमे (उ०प्र० संस्कृत-अकादमी-पुरस्कृते काव्ये), भाति मौरीशसम् (काव्यम्), भारतजनताहम् (उ०प्र० संस्कृतसंस्थानस्य कालिदास-सम्मानेन पुरस्कृतं कवितासंकलनम्), सर्वशुक्ला (कवितासंकलनम्) सर्वशुक्लोत्तरा, आशाद्विशती, मम जननी, राजधानी-रचनाः (उप्रसंसं पुरस्कृत)।

नाट्यकृतयः पण्डितराजीयम् (उ०प्र० संस्कृत अकादमी-पुरस्कृतं ध्वनि- नाटकम्), अभिशापम् (उ०प्र० संस्कृत अकादमी-पुरस्कृतं ध्वनिनाटकम्), द्वयोरपि मञ्चप्रस्तुतिः नैकधा जाताः । पुरश्चरणकमलम्, नाट्यसप्तकम्, (दिल्लीसंस्कृतअकादम्या अखिलभारतीयमौलिकसाहित्यरचनापुरस्कारेण सम्मानितम्)।

सम्पादिता ग्रन्थाः संस्कृतसुधा, संस्कृगद्यगुच्छः, अर्वाचीनसंस्कृत- महाकाव्यविमर्शः (खण्डत्रयम्), अर्वाचीनसंस्कृत-साहित्य-परिचयः (खण्डद्वयम्), अर्वाचीनसंस्कृत-संग्रहः (खण्डत्रयम्), अर्वाचीनसंस्कृतम् (त्रैमासिकपत्रम्) १९७९ तः अद्यावधि (दिल्लीसंस्कृतअकादम्या अखिलभारतीय संस्कृतपत्रकारिता- सम्मानेन सभाजितम्), स्तुतिकुसुमाञ्जलिः। **अनूदितग्रन्थः** - अमीना(उपन्यासः)।

काव्यपाठः विदेशेषु मौरीशस-अमेरिका-इटली-यू०के० प्रभृतिषु देशेषु भारतवर्षस्य विविधराज्येषु च समायोजितेषु विविधसमारोहेषु किञ्च आकाशवाणी-दूरदर्शनयोः १९६३ तः अद्यावधि संस्कृतकाव्यपाठः कृतः। आकाशवाण्याः सर्वभाषा- कविसम्मेलने संस्कृतकविरूपेण अनुवादकर्तृकविरूपेण च सहभागिता कृता।

साम्प्रतिकवृत्तिः प्रधान-सम्पादकः - अर्वाचीनसंस्कृतम् (त्रैमासिकपत्रम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

ISBN - 978-81-85924-34-2